उपदेशसाहस्री

upadeshasahasri

तु

सर्वगमित्युक्ते सर्वमन्यत्तद्गतं च ब्रह्मणोऽन्यदिति तस्य वस्तुपरिच्छेदप्रतिभासात्सांख्यादिवादिमतवत्सजातीयविजातीयभेदवत्त्वप्राप्तमित्यत आ
ह । सर्वमिति । सर्वं खल्विदं ब्रह्मेदं सर्वं यदयमात्मा । आत्मैवेदं सर्वमित्यादिश्रुतेरित्यर्थः । अनेन सर्वोपादानत्वमुक्तं । उपादानं हि स्वकार्यं सर्वं व्या
प्य व्यापकं भवति नानुपादानं तद्वदेकदेशेन संस्थमानमव्यापकमेव भवतीत्यतः सर्वोपादानत्वात्सर्वमित्यभिप्रायः । सर्वात्मकमपि ब्रह्म जीव
व्यावृत्तं जीवस्य ब्रह्मणो भिन्नत्वात्तद्धर्मसंसारित्वासंसारित्वभावेन विरुद्धधर्मवतोरैक्यं संभवति दहनतुहिनवदित्यत आह । सर्वभूतगुहाशयमिति ।
सर्वभूतानां स्थावरजंगमानां गुहा स्वबुद्धिस्तु शेते इति सर्वभूतगुहाशयं । गूढा अस्यां तत्तानि ज्ञेयज्ञातृपदार्था इति गुहा बुद्धिः गूहतेः संवरणार्थस्य धा
तोरिदं रूपं सर्वप्राणिबुद्ध्यन्तः साक्षितया निर्विकारं वर्त्तत इत्यर्थः । तथा च श्रुतिः । यो वेद निहितं गुहायां परमे व्योमन् हृद्यन्तर्ज्योतिः पुरुषः । सवा
एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमित्याद्या । तथा च तत्सृष्ट्वा तदेवानुप्राविशदित्यादिना स्रष्टुरेव ब्रह्मणो जीवरूपेण प्रवेशश्र
वणादयमात्मा ब्रह्मेत्यादितादात्म्यश्रुतेश्च न ब्रह्मणोऽन्यो जीवः तस्य च धार्यते विरुद्धधर्मसंसर्गप्रतिभासस्तूपाधिनिबंधनो न स्वरूपनिबं
धन इति भावः । एतेन जीवो नाम ब्रह्मणोंऽशो विकारो वा स्वतंत्र एव वेति भेदाभेदवादिपक्षा निराकृता वेदितव्याः । ननु सर्वभूतगुहाशयत्वे
ब्रह्मणो मानसवेद्यत्वं स्यात्तथा सर्वात्मत्वे प्रपंचात्मत्वप्राप्तिरिति शंकायामाह । परं सर्वविषयातीतमिति । सर्वमविद्यातत्कार्यात्मकं विषय
मतीत्य वस्थितमित्यर्थः । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुतेः । परमेश्वराधिष्ठितमायाविवर्त्तत्वावगमात्सर्वस्य
मायायाश्चानिर्वचनीयत्वान्न परमार्थं किमपि ब्रह्मणो भिन्नं वस्त्वस्तीति ध्यानं तत्सर्वतः करणात्स्व ॥ ॥

भेदाभेद

वांरसाद्विरागोनमात्रसवेद्यत्वंसंभाव्यतेनहिमिथ्यादृष्टिगृहीतेनमरीचुदकादिनाभूम्याद्युदकादिमत्परमार्थतोभवतिनवाकाष्ठेनाग्निःप्रकाश्यते
दह्यतेवाअतोयुक्तंसर्वविषयातीतत्वमितिभावः॥तथाचश्रुतिः॥नेहनानास्तिकिंचनयतोवाचोनिवर्त्तंतेअप्राप्यमनसासहेत्याद्याअत्रचैतन्यमि
२ त्यादिविशेषणत्रयेणत्वंपदार्थसाधारणंसर्वभूतगुहाशयमितिचबुद्ध्यादिसाक्षीत्वंपदार्थउक्तः॥सर्वविदित्यनेनतत्पदवाच्यंब्रह्मोच्यतेसर्वविष
यातीतमितितत्पदलक्ष्यमुक्तंयत्तद्भ्योःसामानाधिकरण्यादेकार्थवृत्तित्वेसतितत्त्वंपदार्थयोरैक्यमखंडवाक्यार्थस्तात्पर्यवृत्त्याप्रतिपा

श्रीगणेशायनमः। चैतन्यंसर्वगंसर्वंसर्वभूतगुहाशयं य
त्सर्वविषयातीतंतस्मैसर्वविदेनमः १

दितोभवतीतिदेवंमंगलाचरणव्याजेनवेदांतशास्त्रीयविषयाद्यनुबंधोऽप्यत्रप्रपंचितोऽस्यतत्प्रकरणत्वद्योतनाय तथाहिउक्त
वाक्यार्थःविषयश्चैतन्यंसर्वविषयातीतमितिचविदात्मनःसर्वानर्थसंस्पर्शित्वाभावोक्तेरशेषानर्थनिवृत्त्युपलक्षितेननिरतिशयानंदा राम
विर्भावात्मकेब्रह्मैवप्रयोजनमुक्तं।अर्थान्निकामोऽधिकारीसूचितएवभवति।उक्तविशेषणानांवेदांतेष्वेवप्रसिद्धेःशास्त्रब्रह्मणोःप्रतिपा २
द्यप्रतिपादकभावसंबंधोध्वनितः १

एवं देवतानमस्कारव्याजेन वेदांतप्रतिपाद्यपरदेवतातत्त्वमुपदिश्यमिदानीं वेदानां तत्परत्वं प्रतिपादयितुं कर्मकांडनिर्दिष्टमर्थमनूद्य तेन ज्ञानकांडस्य वेदांतानां संगतिमभिदधान स्तेषामगतार्थत्वमनन्यशेषत्वं च तावदाह समापय्येति वेद इदानीं ब्रह्मविद्यां वक्तुं प्रचक्रम इत्यन्वयः। इदानीमिति जिज्ञासारूपपद्धितिसमय उक्तः। अथेति जिज्ञासाप्रवृत्तिप्रयोजकहेतुसाधनचतुष्टयसंपत्त्यानंतर्यमुच्यते। तथा च विवेकवैराग्यशमादिसाधनसंपन्नस्य मुमुक्षोर्मोक्षसाधनब्रह्मविद्यां साक्षात्प्रतिपादयितुं ज्ञानकांडात्मको वेदः प्रवृत्त इत्यर्थः। कुतोऽस्य साधनसंपत्तिरित्यपेक्षायां कर्मकांडेनोक्तकर्मानुष्ठानजनितबुद्धिशुद्धित इत्यभिप्रेत्याह समापय्येत्यर्द्धेन। दाराग्न्याधानपूर्विका इति विहितक्रियामात्रोपलक्षणं नित्यनैमित्ति

समापय्य क्रियाः सर्वा दाराग्न्याधानपूर्विकाः। ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे २

कप्रायश्चित्तोपासनारूपाः सर्वाश्रमप्रयुक्ता विधिविहिताः सर्वाः क्रियाः समापय्य समाप्तिं प्रापय्य कर्मकांडात्मना अनुष्ठेयकर्माणि प्रतिपादयित्वा वेद इति संबंधः। अयं भावः। वेदो हि स्वतः प्रमाणभूतः सर्वार्थप्रकाशको नित्यनिरतिशयपुरुषार्थमर्थयमानस्य तदुपायं मृगयतः सर्वात्मना हे प्रयतमानस्यापि तमलभमानस्य तत्राहत्य पुरुषार्थसाधने प्रत्यक्षादिभिरनवगम्यमानस्तु पदार्थेषु प्रवर्त्तते नित्यनिरतिशयपुरुषार्थश्च मोक्ष एव नान्य इति। मोक्षोपायप्रतिपादने वेदतात्पर्यमवगम्यते। श्रुतिस्मृती चात्र भवतः। सर्वे वेदा यत्पदमामनन्ति सर्वे वेदा यत्रैकीभवंतीति समा॥

नहीन आत्माज्ञ नानामिति। वेदैश्च सर्वैरहमेव वेद्य इति च। मोक्षसाधनं च साक्षादात्मतत्त्वज्ञानमेव। तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्य
तेऽयनायेतिश्रुतेः। तच्च नाशुद्धांतःकरणस्योपदेशंसुसक्तेन स्यात् तद्ग्रहणसामर्थ्याभावात्। श्रुतिश्च भवति नाविरतो दुश्चरितान्नाशांतो नासमाहित
२ ः। नाशांतमानसो वापि प्रज्ञानेनैनमाप्नुयादिति। अतस्तत्प्रज्ञानोत्पत्तिप्रतिबंधकदुरितक्षयार्थानि नित्यानि कर्माणि प्रथमं विधेयानि। तानि च संयोग
रूपचोदनासमाख्यानामविशेषेण सर्वशाखाप्रत्ययन्यायेनेतिकर्त्तव्यतांगकलापपरिमाणाधिकारिविशेषोक्तिपूर्वकं यत्नं प्रापयति। धर्मेण पाप
ममपनुदतीति। न कर्म लिप्यते नरे। अविद्यया मृत्युं तीर्त्वेत्यादिश्रुतेः। दुरितक्षय एव धर्मस्यानुष्ठानेन परं प्रयोजनं परंपरया परमपुरुषार्थोपयोगि पस्थ
त्वात्। तत्तु कर्मणा पितृलोक इत्याद्युक्तः पितृलोकादिः प्रयोजनं त[illegible]स्य तत्पादिदोषदुष्टतया हेयत्वात्। आनुषंगिकं हि तत्कर्मफलं भवति त ५
भवदपि नेदं चित्तशुद्धिप्रतिबंधकं। तदुक्तं सुरेश्वराचार्यैः। नित्येषु शुद्धिप्राधान्याद्भोगोऽप्य प्रतिबंधकः। भोगं भंगुरमीक्ष्यं नैव बुद्धिः शुद्धिस्त
रोचत इति। काम्याभिचारादिकर्मविधानं तु पुरुषवशीकरणेन स्वाभाविकप्रवृत्तिनिवारणार्थमित्येषा दिक्। तथा च चित्तशुद्धेः प्रथ
मापेक्षितत्वात्तदर्थकर्मविधानं प्रथमं प्रवर्त्तते पश्चाद्ब्रह्मज्ञानोपदेश इति कर्मज्ञानकांडयोरर्थद्वारा हेतुहेतुमद्भावेन पौर्वापर्यं संबं राम
धउक्तो ज्ञानकांडस्य साक्षात्फलार्थविषयत्वात्कर्मभिरनपेक्षितार्थत्वात् आगतार्थत्वमनन्यशेषत्वं च तत्सिद्धमिति॥ ॥ ३

[illegible]

हेतु

ननु कर्माणि कृतानि कर्त्तुः फलप्रदानि लोके दृष्टानि यथा पित्रादिभिः रूपादि दृष्टविषयाणि इष्टफलानि तैर्निषिद्धविषयाण्यनिष्टफलानि तद्वदा
स्तविषयाणि दैवाधीनतयोभयार्थानि तथा वेदविहितानि कर्माणि इष्टफलानि निषिद्धान्यनिष्टफलानि विहितप्रतिषिद्धव्यामिश्रकर्माणि
इष्टानिष्टव्यामिश्रफलानि भवंति। तथा च शास्त्रं अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलमिति। एवं च कर्मणः फलाव्यभिचारान्मोक्षस्य च फ
लविशेषत्वात्कर्मविशेषसाध्यत्वोपपत्तेः न विद्यया कृत्यमस्तीति न तदर्थानि ज्ञानकांडानि मुमुक्षुणा विचारणीयानि किं तु कर्माण्येव क
नि विचार्यातु मीमांसादीन्यदृष्टफलार्थान्यनुष्ठेयानीति कर्मजडानां प्रत्यवस्थानमाशंक्याह कर्माणीति द्वाभ्यां कर्मफलं हि जातं तावदुभौ ग

कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः ३

लक्षणं तच्च देहसंबंधं विना नोपपद्यत इति कर्माणि देहयोगार्थमेवेत्यर्थः। देहयोगे च संसारो दुर्वार इत्याह देहयोग इति देहसंबंधे सति
प्रियाप्रिये सुखदुःखे ध्रुवे स्यातां भवितामेव न ह्येव सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतेः॥ ततः सुखदुःखयोस्तत्साधनयोश्च क्रमा
संस्मं रागद्वेषौ वासनारूपौ स्यातां ततो रागद्वेषाख्यान्निमित्तात्क्रियाः वाङ्मनःकायचेष्टाः स्युरित्यर्थः॥ ३॥

४ अज्ञस्य प्रत्यगात्मतत्त्वं ब्रह्माज्ञानतोऽहंकारस्य परवशस्य ततः क्रियाभ्यो विहितप्रतिषिद्धरूपाभ्यो धर्माधर्मौ पुनर्भवेतां पुनस्ततो देहयोगस्ततः
प्रियाप्रिये इत्येवं संसारो जन्ममरणकर्मकरणतत्फलभोगलक्षणः कुलालचक्रचभ्रुशमत्यर्थमविश्रमं यथास्यात्तथा नित्यप्रवृत्तोऽनादिका
लमारभ्य प्रवर्त्तते अयं प्रत्यक्षद्वन्द्व इत्यर्थः। तस्माद्देहिकार्थानां कर्मणामनित्यफलत्वस्य लोके दृष्टत्वादामुष्मिकफलार्थानामपि कर्मत्वादनि

धर्माधर्मौ ततोऽज्ञस्य देहयोगस्तथा पुनः एवं नित्यप्रवृत्तोऽयं संसारश्चक्रचद्भृशं ॥४॥

त्यफलत्वानुमानात्तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते इति वस्तुबलावलम्बं श्रुतेश्चाद्यप्यंहवैचान् राम
मीसिषाजिनः स्तुकृतमित्याद्यर्थवादश्रुत्यवलंबनेन कर्मफलस्यानित्यत्वाशानकार्येति भावः ॥४॥ वि ४

नन्वेवमपिनमोक्षार्थिनोज्ञानेनप्रयोजनमस्तिकृतकर्मणांसंसारनिमित्तानांफलभोगानंतरंनाशेसतिनिमित्ताभावान्नैमित्तिकाभावइतिन्याया
दयत्नलभ्यत्वान्मोक्षस्येत्याशंक्याऽज्ञानमूलत्वात्कर्मणांतस्मिन्सतितदुपरमान्नैवमितिआह।ऽज्ञानमिति। यद्वाऽज्ञस्यकर्मप्रवृत्त्यविरमात्सं
साराविरमः। कृतकर्मफलभोगसमयेपिकर्मप्रवृत्त्यवश्यंभावात्पुनर्भोगसंतानाविच्छेदस्यसत्त्वात्कथंतर्हिकर्मनिवृत्त्यामोक्षसिद्धिरितिविवक्षायामाह
अज्ञानमिति। अयमर्थः। नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंति। एकःशत्रुर्नद्वितीयोस्तिशत्रुरज्ञानतुल्यःपुरुषस्यराजन्येनावि
ष्टःकुरुतेकार्यतीव्रघोराणिकर्माणिसुदारुणानीत्यादिश्रुतिस्मृतिभ्योऽज्ञानेतस्यपूर्वोक्तस्यकर्मतत्फललक्षणस्यसंसारस्यमूलंस्यादिति

अज्ञानंतस्यमूलंस्यादितितद्धानमिष्यते ब्रह्मविद्यातआरब्धाततोनिश्रेयसंभवेत ५

हेतोस्तस्याज्ञानस्यहानमात्यंतिकोपरमइष्यतेयत्नेनसंपादनीयतयाभिप्रेयतेमूलोन्मूलनमंतरेणप्ररोहाविच्छेदादित्यर्थः। तरतिशो
कमात्मवित्। यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः तदादेवमविज्ञायदुःखस्यांतोभविष्यति। ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनः तेषा
मादित्यवज्ज्ञानंप्रकाशयतितत्परमित्यादिश्रुतिस्मृतिभ्योयत्नोविधेयाज्ञानहानहेतुत्वगतः।ऽतोब्रह्मविद्यारब्धाततोब्रह्मविद्यायानिश्रेयसं
कैवल्यंभवेत्तदुदयनांतरीयकतयाऽज्ञाननिवृत्तौकेवलात्मस्वरूपावस्थानरूपोमोक्षोलब्धइवभवेदित्यर्थः ५

५ व

नत्तुकर्मणो विविक्तशान्तित्वाद्धिरण्यपदात्मन्नत्वेमन्जेत न इत्यादिश्रुतेश्च कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादिस्मृतेश्च कर्मभिरेव मोक्ष
सिद्धेः। कृतं तद्विद्या विधेयेति शंकामपाकुर्वन्ननंतरोक्तमर्थमुपपादयति द्वाभ्यां विद्यैवेति संसारमूलाज्ञानहानाय विद्यैव समर्थेत्यध्याहारः। एवका
रार्थमाह न कर्मेति तत्र हेतुरप्रतिकूलत्वं तदस्य विरोधादित्यर्थः। विद्यैव प्रकाशरूपत्वादप्रकाशरूपामविद्यां तत्कार्यं च निवर्तयति। यथा रज्ज्वावर
णांऽविद्यां तमसि तत्कल्पितसर्पाद्याकारं च रज्जुतत्त्वज्ञानप्रदीपो निवर्तयति तं स्वभावविरोधात्। कर्म तु नाज्ञानतमो निवर्तकं तदविरोधित्वाद
प्रकाशात्मकत्वाद्धानौ हारस्तोमवदित्याघट्टमानेनीत्यादिः पंथा इत्यादिश्रुतिभिश्च विरोधाद्धिरण्यपदाः इत्यादावापेक्षिकममृतत्वं पर्यवस्यति कर्म
णो वहीति स्मृतिः। न कर्मणा न प्रजयेति श्रुतिविरोधेऽन्यपरित्वतो न तद्बलात्कर्मभिरज्ञानहानशंकेत्यभिप्रायः। विद्यां विनाऽज्ञानक्षयाभावश्चेद

विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः। नाज्ञानस्याप्रहाणे हि रागद्वेषक्षयो भवेत् ६
रागद्वेषक्षयाभावे कर्म दोषोद्भवं ध्रुवं तस्मान्निःश्रेयसार्थाय विद्यैवात्र विधीयते ७

तान्नक्षयार्थमेव विद्या विधीयतां तत्कार्यस्य तु परमार्थत्वाद्विषयनाशानुपपत्तेस्तन्नाशहेतुत्वं तरमन्वेषणीयमित्यत आह। नाज्ञानस्ये
ति। अज्ञानस्याप्रहाणे रागादिक्षयो न भवेद्विवेकपूर्वकत्वस्य रागादिक्षयस्यान्वयव्यतिरेकसिद्धत्वाद् ज्ञानमया रागादयो न परमार्था इत्यज्ञान
निवृत्त्यैव निवर्तेरन्निति न तत्र हेत्वन्तरान्वेषणेत्यर्थः ६ रागाद्यनिवृत्तौ का हानिरिति तत्राह रागद्वेषेति दोषाः रागद्वेषमोहाः तदुद्भवं त
द्धेतुकं कर्म ध्रुवं पुनः स्यादेवेति पुनः संसारो दुर्वार इत्यर्थः। उपपादितमर्थमुपसंहरति तस्मादिति। अत्रेति वेदान्तोक्तिः। विधीयते प्रकाश्य
त इत्यर्थः ७

राम ५

तदेवमज्ञानमूलत्वात्संसारस्याज्ञानमेवतन्निवर्त्तकंमोक्षहेतुर्नकर्म्म स्यात्तत्रयदिकर्मणोस्वातंत्र्येणमोक्षहेतुतानसंभवेत्तर्हिज्ञानेनसमुच्चये
सतितद्धेतुतास्यादितिसमुच्चयवादिमतमुत्थापयति ननुकर्मेति नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत् कार्यतेह्यवशःकर्मसर्वःप्रकृति
जैर्गुणैः। इतिस्मृत्युक्तन्यायेनावशेनापिजीवतापुरुषेणकर्मकर्त्तव्यमेवविद्यायथातथानित्यंकर्मावश्यंकर्त्तव्यंयावज्जीवमित्यादिश्रुतिविहि
तत्वादित्यर्थः। उपयोगाभावान्मुमुक्षुणानित्यंकर्मनकर्त्तव्यमित्यतआह विद्याया इति विद्यायामोक्षंप्रतिकारणभूतायाः सहकारित्वमितिकर्त्तव्य
भावेहियस्मान्नित्यकर्मवर्जे प्राप्नुयादतस्तत्कार्यंमुमुक्षुणेत्यर्थः विद्ययामृतमश्नुत इति तृतीययाज्ञानस्यमोक्षकरणत्वावगमात्करणस्यचे
तिकर्त्तव्यतासापेक्षत्वादन्यस्यचेतिकर्त्तव्यसंज्ञाभावात्कर्मभिरेवप्रयाजादिभिर्दर्शादीवफलोपकार्यंगैर्ज्ञानंसमुच्चीयतइतिभावः ८ क

ननुकर्मतथानित्यंकर्तव्यंजीवनेसति। विद्यायाःसहकारित्वंमोक्षंप्रतिहितद्भजेत ८
यथाविद्यातथाकर्मचोदितत्वाविशेषतः। प्रत्यवायस्मृतेश्चैवकार्यंकर्ममुमुक्षुभिः ९

र्मणाबध्यतेजंतुर्विद्ययाचविमुच्यते। तस्मात्कर्मनकुर्वंतियतयःपारदर्शिनः इत्यादिस्मृतेर्मुमुक्षुभिःकर्मनकर्त्तव्यमेवेतिचेत्तत्राह यथावि
द्येति॥ यथाविद्यामुमुक्षुभिःकार्यातथाकर्मापिकर्त्तव्यंकुतः विद्यांचाविद्यांचयस्तद्वेदोभयंसहेतिसमुच्चयविधिनाऽविशेषेणचोदितत्वा
दित्यर्थः। किंचअकुर्वन्विहितंकर्मनिंदितंचसमाचरन्। प्रसक्तश्चेन्द्रियार्थेषुनरःपतनमृच्छतीत्यननुष्ठानेप्रत्यवायस्मृतेश्चकर्मकार्यमि
त्यर्थः। तथाचोदाहृतश्रुतिस्मृतिविरोधेतस्मात्कर्मनकुर्वंतियतयइतिइयमपस्मृतिर्ज्ञानप्रशंसार्थावाभविष्यतीतिभावः ९

६

अत्रसिद्धांतीविद्यायाःसहकार्यपेक्षित्वमुक्तमाक्षिपति नन्विति ब्रह्मविद्यासहकारिनिरपेक्षाध्रुवफलत्वाद्घटादिज्ञानवदित्यर्थः।पूर्ववादी व्यभिचारेणपरिहरतिनेति।अवश्यंभाविफलोप्यग्निष्टोमोयथोद्गीथशस्त्रादितद्गतदेवताज्ञानसहकारिकर्मापेक्षतेतथाविद्यापीत्यर्थः १० पूर्वपक्षमुपसंहरतिइत्येवंकेचिदिच्छंतीति।सिद्धांतंतुवक्तुमुपक्रमतेनेत्यादिना।विद्यास्वकार्येनकर्मापेक्षतेतत्प्रतिकूलत्वात्तद्विरोधित्वादितियावत्।नहिस्वप्रतिकूलःस्वसहायोभवति।माभूत्तिमिरंतेजसःसहायभूतमित्यर्थः।कर्मणोविद्याप्रतिकूलत्वमुक्तंसाधयतिविद्याया इत्यर्धेन।हिशब्दःप्रसिद्धिवद्योतकः।साभिमानतइतिब्राह्मणत्वाद्यभिमानसहितपुरुषनिर्वर्त्यत्वात्कर्मणोविद्यायाश्चकूटस्थात्माकारतयाज्ञात्मा

ननुध्रुवफलाविद्यानान्यत्किंचिदपेक्षते।नाग्निष्टोमोयथैवान्यद्ध्रुवकार्योप्यपेक्षते तथाध्रुवफलाविद्याकर्मनित्यमपेक्षते १० इत्येवंकेचिदिच्छंति नकर्मप्रतिकूलतः।विद्यायाःप्रतिकूलंहिकर्मस्यात्साभिमानतः ११ निर्विकारात्मबुद्धिश्चविद्येतीहप्रकीर्तिता अहंकर्त्ताममेदंस्यादितिकर्मप्रवर्त्तते १२

द्यभिमानहीननिष्पन्नत्वात्प्रसिद्धोविद्याकर्मणोर्विरोधइत्यर्थः ११ हिशब्दद्योतितांप्रसिद्धिमुपपादयति निर्विकारेति नाहंकर्त्ता भोक्ताकिंतुकूटस्थोब्रह्मैवास्मीत्येवमात्माकारांतःकरणवृत्तिर्विद्येतीहवेदांतेषुविद्वद्भिःप्रकर्षेणोक्तेत्यर्थः।कर्मत्वहंब्राह्मणोस्यकर्मणःकर्त्ताममेदंकर्मसाध्यंफलंभविष्यतीत्यभिमानपूर्वकंप्रवर्त्ततेइतिप्रत्यक्षमतोस्फुटोविरोधइत्यर्थः १२

राम
६

ज्ञानकर्मणोरंतर्मुखत्वबहिर्मुखत्वाभ्यां प्रवृत्तितो विरोधमुक्त्वोत्पत्तितोऽपि विरोधमाह वस्त्वधीनेति। प्रमाणवस्त्वधीना विद्या यथाप्रमाणं यथावस्तु च
जायते न तत्र पुरुषस्वातंत्र्यं संभवतीत्यर्थः। विधिर्विधेयं कर्म कर्त्रधीनं पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यमतः पुरुषस्वातंत्र्याऽस्वातंत्र्यरूपविरु
२ द्धहेतुजन्यत्वाच्च कर्मज्ञानयोः समुच्चयो न त्वर्थः। किं च विद्यायाः सत्याः कर्मणो निराश्रयतया स्वरूपालाभाच्च ज्ञानसहकारितेति विधान्तरेण विरोधमाह का
रकाणीति॥ उखरदेशज्ञानामुदकबुद्धिं यथोखरस्वभाववत्ते विनी विद्योपमर्द्दातीति यथात्मन्यविद्याध्यस्तकारकबुद्धिमात्मस्वभाववत्तेविनीवि

वस्त्वधीना भवेद्विद्या कर्त्रधीनो भवेद्विधिः। कारकाण्युपमर्द्दाति विद्या बुद्धिमिवोखरे॥ इति तत्सत्यमादायक
र्म कर्तुं व्यवस्यति १३ विरुद्धत्वादतः शक्यं कर्म कर्तुं न विद्यया सहैव विदुषा तस्मात्कर्म हेयं मुमुक्षुणा १४

द्योपमर्द्दातीत्यर्थः। इति तत्सत्यमित्यर्द्धश्लोकः पूर्वेणैवान्वेति। उपमर्द्दातीति यतो तस्मात्कारकजातं सत्यमादाय कर्मकर्तुं ज्ञानी कथं व्यव
स्यतीति कथंशब्दाध्याहारेणायं योजनीयः। विरुद्धत्वहेतुं समुच्चयासंभवं फलितमाह विरुद्धत्वादिति अतो विरुद्धत्वादिति सामाना
१३२ धिकरण्ये विद्यया सहकर्म कर्तुं विदुषा न शक्यमेवेत्यन्वयः॥ समुच्चयनिराकरणफलमाह तस्मादिति १४

ननुज्ञात्वा कर्म समाचरेदित्यादिवचनात्स्वर्गकामादिविध्यन्यथानुपपत्त्या देहादिव्यतिरिक्तात्मज्ञानवतः कर्माधिकारात्तज्ज्ञानकर्मणोर्विरोधेच
तदध्यासादधिकार्यभावेन कर्मकांडस्याप्रामाण्यप्राप्तमित्याशंक्य कर्मस्वरूपभेदांगविशेषप्रवृत्तिक्रमाधिकारादिविशेषज्ञानस्य देहादिव्यति
८ रेकात्मज्ञानस्य च कर्मविशेषाधिकारोपयोगित्वेपि न परमात्मतत्त्वज्ञानं तत्रापेक्ष्यतेऽनुपयोगादधिकारविरोधाच्चेत्यभिप्रेत्य समाधत्ते दे
हाद्यैरिति यद्यप्यौपनिषदं ज्ञानं कर्मकारकभेदोपमर्दकं स्यात्तदा ज्ञानकांडेन कर्मकांडस्य निर्विषयीकरणाद्बाधितविषयं कर्मकांडमप्रमा
णं स्यात्तच्चानिष्टं स्वाध्यायाध्ययनविधिविरोधादित्याशंकां किमात्मतत्त्वज्ञानात्प्रागूर्ध्वं वा तदप्रामाण्यापत्तिरिति विकल्पाद्यं निराकरोति देहाद्यै त
रिति देहिनश्चात्मनो देहाद्यैर्देहेंद्रियमनोबुद्धिप्राणतद्धर्मैरविशेषेणाविवेकेन ग्रहणात्तद्विशिष्टत्वेनैवात्माभिमानरूपं निजं स्वाभाविकं न

देहाद्यैरविशेषेण देहिनो ग्रहणं निजं प्राणिनां तदविद्योत्थं तावत्कर्मविधिर्भवेत ॥१५॥

योषिदादावग्न्यादिभाववद्बुद्धिवृत्त्यधीनं यदेवं विधं प्राणिनामात्मज्ञानं तदविद्योत्थमनाद्यज्ञानजभ्रांतिसंस्कारोत्थं सर्वसाधारणत्वाद्बाधा
वदेवं ब्राह्मणोऽहं गृहस्थोऽहं सकलेंद्रियवान्हं सकामो बलवानित्यादिज्ञानमनुवर्त्तते तावत्कर्मविधिः कर्मकांडप्रमाणं भवेदित्यर्थः। प्रमि
तिजनकं हि प्रमाणं भवति स्वाधिकारिणं प्रमितिजनको वेदो नानधिकारिणमिति स्थिते कर्मप्रवृत्तिपर्यंतं प्रमितिजनकस्य विधिकांड राम
स्योक्ताधिकारित्वाभावे ब्रह्मात्मतत्त्वविद्योदयात्प्रागप्रामाण्यप्रसक्तिरिति नाध्ययनविधिविरोध इति भावः ॥१५॥ ८

मि

द्वितीयंकल्पमिष्टापत्त्याप्रत्याचष्टेनेतीतिनेतिनेतीतिविप्सार्थयाश्रुत्यादेहादीन्निष्प्याहृष्यात्मात्मीयभावेनगृहीतानशेषानपोह्यप्रतिषिध्यप्र
तिषेधावधिभूतआत्मावशेषितसत्यस्यसत्यमित्यादौकिमर्थमित्यतआह।अविशेषात्मबोधार्थमिति।अविशेषश्चासावात्माचेतितद्यात्तस्यबोधो
निर्विशेषचित्सदानंदस्वभावाविर्भावस्तदर्थमित्यर्थः।यत्तगर्थश्चयोहितेषुतदवधित्वेनप्रत्यगर्थएवावशिष्यतइति।प्रत्यक्तत्त्वबोधार्थमि

नेतिनेतीतिदेहादीनपोह्यात्मावशेषितः॥अवि
शेषात्मबोधार्थंतेनाविद्यानिवर्त्तिता॥१६

त्युक्तंभवति।बोधेसतिकिंस्यात्तदाहतेनेति।यस्त्वेवंचनोदेहादावात्माभिमानःकर्माधिकारहेतुःसाविद्यातेनबोधेननिवर्त्तिताबाधितेत्य
र्थः।अतोनिमित्ताभावान्नैमित्तिकाभावइतिन्यायेनात्मतत्त्वज्ञानवतोनकर्मविधिप्रतिपत्तिरितितंप्रतिफलत्वहिज्ञानजनकत्वाभावात्कर्मकां
डस्यतदानीमप्रामाण्यमिष्टमेव।निवृत्तनीबुक्तोधंचानभिचारविधिशास्त्रवदितिसर्वमनवद्यं १६

ननु निर्विशेषात्मबोधेन सकृन्निवृत्ताप्यविद्या पुनरुद्भविष्यतीति ततः कर्माधिकारहेतुसंभवात्कर्मविधिः स्यान्नुक्तितत्त्वावगमान्नदज्ञाननिवृत्ता
वविद्युन सत्त्वसमर्थांतरेरजंतप्रमोदयोपलंभादित्याशंक्याह निवृत्तेति प्रमाणतो निवृत्ताप्रमाणाग्निनादग्धासाऽविद्या भूयः पुनः कथं प्र
८ सूयेत जायेत न हि मत्तादग्धा च भार्या पुनः प्रसवायोद्भवतीति हृदि त्यर्थः॥ अविद्यांतरं जायेतेति चेन्न तु वक्तव्यं किं निर्निमित्तं जायेत निमित्ताद्वा ना
द्योऽकारणकार्योत्पत्त्यावतिप्रसंगद्वितीये किमात्मा निमित्तमनात्मा वा नाद्य इत्याह सत्यवेति। अविशेषे केवलत्वे इत्यनयो व्याख्यानव्याख्येयभा
वः॥ यद्वाऽविशेषइत्यस्यैव मूर्त्यादिकतिपयविशेषाभावे विविशेषांतरशंकास्यादतउक्तं केवल इति तावन्मुक्तेऽस्काकिनोपात्मनः श्यनादिगुणाये

निवृत्ता सा कथं भूयः प्रसूयेत प्रमाणतः । अस
त्यैवाविशेषेपि प्रत्यगात्मनि केवले ॥ १७ ॥ तमदन

मित्तविशेषशंकास्यान्नत्विह तत्प्येऽउ विशेष इत्युक्तं तथा चाविशेषे केवले प्रत्यगात्मनि सर्वांतरे परमार्थवस्तुनि साऽविद्याऽसती एव २
न सत्तां लभते असहायस्यात्मनः कूटस्थस्य कर्तृत्वाद्युपपत्तेः॥ अविद्यांतरसहायाभ्युपगमे चानवस्थापि न चेष्टा वा प्रसज्येतेत्यर्थः॥
संपिंडितेन पक्षांतरं निरस्यते अनात्मन्यप्यसत्यैव सा। अविद्याकार्यस्यानात्मनोऽविद्याहेतुत्वाद्युपपत्तेरित्यर्थः॥ मुक्तिकादौ तु रजता रम
दिविक्षेपोपादानाशस्यैवाविद्याशक्तिभेदस्य ज्ञानेन निवृत्त्यभ्युपगमान्मूलाज्ञानस्य तादृगनंतशक्तिमत्तो विद्यमानत्वान्नेहदृष्टांतमुन ८

अविद्यायाः पुनरभ्युदयसाधनफलमाह नचेदिति पादत्रयेण। सदेव ब्रह्मैवाहमस्मीति विज्ञाने विशिष्टज्ञाने अपरोक्षानुभवे सति द्वयं पश्चाच्च चेद विद्या प्रसू
येत कर्तृभोक्त्रेति धीः कर्माधिकारनिमित्तभूता कथं स्यात् स्यादेवेत्यर्थः। चकारः कर्तृत्वादेः पारमार्थिकत्वशंकानिवृत्त्यर्थः। कर्तृत्वादेः पारमार्थिकत्वे विद्या
निवर्त्यत्वायोगाद निर्मोक्षप्रसंग इति भावः ज्ञानकर्मसमुच्चयनिराकरणमुपसंहरति तस्मादिति यस्माद्विद्यायामुत्पन्नायां कर्मासंभवः सिद्धस्तस्माद स

नचेद्द्वयं प्रसूयेत कर्तृभोक्त्रेति धीः कथं सदस्मीति च विज्ञाने
तस्माद्विद्याऽसहायिका १८ अत्यरेचयदित्युक्तो न्यासः

हायाकेवलैव विद्याकैवल्यहेतुरित्यर्थः १८ विद्यायाः सहकारिनिरपेक्षत्वेनैव मोक्षहेतुत्वमिति युक्तोक्तेर्थे श्रौतलिंगमुपोद्बलयति।
अत्यरेचयदिति। तैत्तिरीयोपनिषत्सु सत्यं परं परं सत्यमित्युपक्रम्य सत्य तप आदिमानसांतानि कर्माणि श्रेयःसाधनत्वेन निर्दिश्य तानि वा एता
न्यवराणि तपांसीति तेषामफलत्वं फलत्वेन निंदामभिधाय न्यास इति ब्रह्मेत्युक्तो न्यास एवात्यरेचयदिति तत्त्वज्ञानांतरंगभूतः संन्यासः स्तूयते तस्मादि
दित्यस्योपादेयत्वात्तस्य चोपादेयत्वात्कर्म

३ त्व २

साधित्वेमोक्षस्य संन्यासविधानानुपपत्तेः सः संन्यासमात्मज्ञानमेव मोक्षसाधनं गम्यत इत्यर्थः अत एव हीति ज्ञानस्य स्वफले कर्मनिरपेक्षत्वादेवेत्यर्थ
ः लिंगांतरमाह एतावदिति वाजिनाममृतत्वे श्रुतमिति वाजसनेयिनामुपनिषत्सु आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमित्युपक्रम्या
६ ह्यमामत्र तत्त्वं दुंदुभ्यादिदृष्टांतैः प्रपंच्य नोपपाद्यो त्क्वानुशासनास्मि मे त्रैय्येतावदरे खल्वमृतत्वमिति ज्ञानस्यैवामृतत्वसाधनतावधारणा श्रुतं त
त्स्वकर्मनिरपेक्षत्वा लिंगमन्यथैतावदरे इत्यवधारणार्थवचनानुपपत्तेरित्यर्थः ॥ अमृतत्वस्य तु नाशास्ति वित्तेनेति च तत्रैवोक्तो वित्तसाध्यस्य कर्मणो
मृतत्वसाधनत्वाभावे लिंगमनुसंधेयं ॥ न च विद्यां चाविद्यां चेति समुच्चयविधानविरोधः ॥ तस्य देवतोपासनज्ञानकर्मसमुच्चयविषयत्वादन्यथा

श्रुत्यात एव हि ॥ कर्मण्यो मानसां ते स्यु एतावदिति वाजि
नां ॥ अमृतत्वं श्रुतं तस्मात्त्याज्यं कर्म मुमुक्षुभिः १६

हिरण्मयेन पात्रेणाग्ने नय सुपथेति च मार्गयाचनाद्यनुपपत्तेरिति सर्वमनवद्यं न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः
॥ त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमं त्यजतेव हितं तज्ज्ञे पंस्या क्रतुः प्रत्यक्परं पदमित्यादिशास्त्राद्यस्मात्त्यागोपलक्षितमात्मज्ञानमेव मुक्ति
साधनं तस्मादिति प्रकृतार्थमुपसंहरतीति तस्मात्त्याज्यं कर्म मुमुक्षुभिः साधनचतुष्टयसंपन्नैरात्मतत्त्वजिज्ञासुभिरित्यर्थः विविदिषोरपि राम ६
नास्ति कर्मावसरः कुतो विदुष इत्यभिप्रायः अत्रार्धश्लोको धिकः प्रायुक्तः पाक्षिकाद्यैर्न संख्येयः १६

तदेवं मुमुक्षुणा सर्वकर्मसंन्यासपूर्वकं ज्ञाननिष्ठेन भवितव्यमिति न्यायेनैव यद्येदानीं परोक्तं दृष्टान्तमनूद्य दूषयति अग्निष्टोमवदिति॰ अर्द्धश्लो
केन दूषणमुच्यत इति प्रतिज्ञाय श्लोकेन दूषणमाह नैकेति कर्मणोऽग्निष्टोमादेरनेककारकसाध्यत्वान्नियतद्रव्यमंत्रतंत्रप्रयोगसाध्यत्वा
दिति यावत् ॥ तथा फलान्यत्वात्फलभेदवत्त्वाद्यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुते विद्याद्यावीर्यवत्तरफल

अग्निष्टोमवदित्युक्तं तत्रेदमभिधीयते २० नैककारकसाध्यत्वा
त्फलान्यत्वाच्च कर्मणां विद्या तद्विपरीतातो दृष्टान्तो विषमो भवेत् २१

विशेषसंभवाच्च मुमुक्षुणा सहकार्यपेक्षेत्यर्थः २० नैवं विद्याया इत्याह विद्येति तद्विपरीता कर्मस्वभावविपरीतस्वभावेति यावत्
यथा वस्तुधीनप्रमाणनिबंधना या निरतिशयमोक्षैकफला या विद्या या न सहकार्यपेक्षा युक्तेत्यर्थः यत एवं स्वभावभेदः कर्मविद्य
योरतोऽग्निष्टोमदृष्टान्तो विषमो दार्ष्टान्तिकाननुरूपो भवेदित्यर्थः २१

१०

वैषम्यमेवोपपादयति कृष्यादिवदिति अग्निष्टोमः सातिशयः साध्यफलार्थत्वादन्यकर्मोपबृंहणमन्यैः कर्मभिः सहकारिभिर्विहितोऽङ्गीयाङ्ग
संश्रितोपासनादिरूपैरुपचयमपेक्षतेति योजना तत्र दृष्टान्तः कृष्यादिवदिति कृषिवाणिज्यादौ फलोपचयार्थं साधनविशेषोपचयः प्रसिद्ध
इत्यर्थः विद्यातु निरतिशयफलत्वादन्यत्सहकारिभूतं किं वस्त्वपेक्षते न किमपीत्यर्थः २२ यदुक्तमकुर्वन्विहितं कर्मेति प्रत्यवायस्तं ते

कृष्यादिवत्फलार्थित्वादन्यकर्मोपबृंहणं अग्निष्टोमस्त्वपेक्षेत विद्यान्यत्कि
मपेक्षते २२ प्रत्यवायस्तु तस्यैव यस्याहंकार इष्यते अहंकारफलार्थित्वे वि
द्येते नात्मवेदिनः २३

ष्वेति तत्राह प्रत्यवायस्त्विति अस्य कर्मणोऽहं कर्त्ता एतत्कृत्वेदं फलं मोक्ष्य इति यस्याहंकार इष्यते इष्टो भवति स्वाभाविकोऽव
र्त्तत इति यावत्तस्याधिकृतस्य विहिताकरणे प्रत्यवायो भवेदित्यर्थः आत्मवेदिनः आत्मतत्त्वज्ञाननिष्ठस्य तु अहंकारफलार्थित्वे
न विद्येते विषयाभावादतो निमित्ताभावाच्च प्रत्यवायस्तस्येत्यर्थः २३

राम १०

विधेर्वाज्ञानहानंन्यनकर्मप्रतिकूलत्वदन्यपक्षम्येयत्ताग्रंथेनकर्मणः स्वातंत्र्येणवाज्ञानसहकारितयावासर्वथानसाक्षान्मोक्षहेतुत्वमस्तीत्युप
पाद्यब्रह्मविद्यामथेदानींवक्ष्ये वेदः प्रचक्रमइतिपरमप्रकृतमुपसंहरतितस्मादिति॥ विद्यायाःकर्मनिरपेक्षत्वंतच्छब्दार्थः॥ अज्ञानहानायाज्ञा
नतानिरासःसिद्ध्यैपेक्षितब्रह्मविद्याविधानातुसंपादयितुमियंप्रारब्धोपनिषद्वेदांतभागःप्रारब्धेतियोजना॥ अज्ञानहानस्यविशेषणंसंसारविनि
वृत्तयइतिसंसारस्यविनिवृत्तिःसम्यङ्निवृत्तिर्यस्मादितिविग्रहः अलौकिकवस्तुमार्थस्योपनिषच्छब्दः तद्रूपायावेदांतग्रंथेषुप्रयुक्तः २४ तर्हि
कोस्यमुख्योर्थइतिवीक्षायांब्रह्मविद्यायांशब्दसामर्थ्यंदर्शयन्नुपनिषच्छब्दव्युत्पादनेनापितत्त्वविद्यामोक्षहेतुरितिसूचयति सदेरिति

तस्मादज्ञानहानाय संसारविनिवृत्तये ब्रह्मविद्याविधानाय प्रारब्धोपनिषत्त्वियं २४ सदेरुपनिपूर्वस्य त्र
क्विपि चोपनिषद्भवेत् मंदीकरणभावाच्च गर्भादेः शातनात्तथा २५ इति चैतन्यप्रकरणं

त्रे विशरणगत्यवसादनेष्विति धातोरुपनीत्युपसर्गद्वयपूर्वकस्य क्विपि प्रत्यये तस्योपनिषदिति रूपं अस्य त्रधात्वर्थत्रयं तथाहि ये मंदब्रह्मवि
दस्तेषां गर्भजन्मजराद्यनिष्टमुपनिषादयति शिथिलीकरोतीत्युपनिषदित्येकोर्थः॥ जिज्ञासोर्ब्रह्मोपसमीपे निश्चयेन ब्रह्म गमयतीति द्वितीयः
॥ तत्त्वविदां तु गर्भादि नाशयत्येवेति तृतीयः॥ एवं सम्यग्धात्वर्थयोगात्तद्विद्यैवोपनिषच्छब्दवाच्या तादर्थ्याद्ग्रंथोप्युपनिषदुच्यते लांग
ले जीवनमितिवदित्यर्थः २५ इत्युपोद्घातप्रकरणं प्रथमं विवृतं चैतन्यप्रकरणमिति टीकांतरे १

११

तदेवं मुमुक्षोर्मोक्षसाधनब्रह्मात्मविद्याप्रतिपत्तये वेदांतारंभ उपपद्यत इति स्थिते पुनः शंक्यते । ननु विद्योदयाय वेदांतारंभस्तदोपपद्यते यदि वि-
द्योदयः संभाव्येत स इहात्मनि संसारित्वग्राहकप्रत्यक्षादिविरोधाद्बा क्यशते नापि नोत्पादयितुं शक्यते असंजातविरोधित्वया प्रत्यक्षादेर्बलवत्वान्त-
दुपजीविनश्चागमस्य दुर्बलत्वात् कथंचिदुत्पन्नापि विद्या यदि प्रमाणसिद्धं संसारं बाधेत न तर्हि प्रत्यगात्मनोपि ब्रह्मरूपत्वं कथं प्रत्यक्षानुभवो न बाधे-
तेति अत उत्तरं वदति प्रतिषेद्धुमित्यादिना । नेति नेतीति विप्सया सकलदृश्यप्रतिषेधे शेषितमुर्वरितं यदात्मतत्त्वं तत्प्रतिषेधावधित्वेन प्रति-

प्रतिषेद्धुमशक्यत्वान्नेति नेतीति शेषितं । इ-
दं नाहमिदं नाहमित्यद्धा प्रतिपद्यते ॥

षेद्धुं स्वरूपत्वेन प्रतिषेधसाक्षितया अवस्थितं यत्तत्तः प्रतिषेद्धुमशक्यत्वादद्धा साक्षात्प्रतिपद्यते निःसंदिग्धमुपलभ्यत इति योजना । उ-
पलंभप्रकारमभिनयति इदमिति इदं देहरूपं नाहमात्मा इदमिंद्रियजातं मनो बुद्धिप्राणादि तदुपादानाचेतनपर्यंतं नाहं किं त्वेषां प्रकाशकमव्य-
भिचारि स्वयंप्रकाशं कूटस्थमसंगमंतरं यस्मिन्सर्वं जगदाप्ययो व्याहेनाकाश ओतप्रोतं तदेवाहं परममंतरमिति प्रतिपद्यत इत्यर्थः ।
अनेन विद्या नोदेतीत्येषा शंका निराकृता । प्रतिषेद्धुमशक्यत्वादित्यनेन तु यथा व्याख्याते न बाधायोग्यत्वं दर्शितमिति विवेक्तव्यं ॥ राम ११

नन्वहं ब्रह्मेति ज्ञानमुक्तविषयोत्पन्नमपि न प्रतिष्ठां लभते देहेन्द्रियाद्यभिमानस्यानवरतमनुवृत्तेरित्याशंक्य तस्य प्रमाणामूलत्वाभावाद्बाधितानु
वृत्तिमात्रस्वभावत्वाच्च विद्याप्रतिपक्षत्वमित्यभिप्रेत्य वाक्योत्थज्ञानस्य प्राबल्यमुपपादयति ॥ इदं धीरिति ॥ देहादावनात्मन्यात्मबुद्धिरहं धी
रित्युच्यते सा अहंकर्तृरिदमंशात्सर्वपूर्वाहंकारवासनावासितान्तःकरणरूपादिदमात्मनः सकाशादुत्थिताध्यासात्मिकेत्यर्थः ॥ स्वरूपतोऽस्यादो
वत्त्वमुक्त्वा विषयभेदादपि तदाह वाचारंभणगोचरेति ॥ निरूप्यमाणो स्वतः सत्ताहीनमपि यदयतो व्यवहारगोचरतया गम्यते तद्वाचारंभणम्

इदं धीरिदमात्मोत्था वाचारंभणगोचरा ॥ निषिद्धात्मोद्भ
वृत्त्यात्सा न पुनर्मीनतां व्रजेत ॥ २ ॥

न्तत्तजडानात्मकरूपं तदेव गोचरो विषयो यस्याः सा तथा यत एव मनो नेति नेतीति शास्त्रेण निषिद्धो बाधित आत्मा स्वरूपभूत्य
वः ॥ कारणं च यस्याः सा निषिद्धात्मोद्भवा तस्या भावो निषिद्धात्मोद्भवत्वं तेन तस्मादिति विग्रहः ॥ सा पुनरिदं धीरात्मयाथात्म्यज्ञानानन्त
रं मानत्वप्रमाणत्वेन न व्रजेच्चलत्वभेत अवस्तुत्वात् अवस्तुजन्यत्वादवस्तुविषयत्वाच्च स्वप्राबल्यविशेषज्ञानवदित्यर्थः ॥ अतो वाक्योत्थ
मेव ज्ञानं प्रबलं नेतरदिति भावः ॥ २ ॥

इदानीं पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति न्यायेन प्रथमोत्पन्नाया अपि कर्त्रभोक्त्रादिधियः उत्तरेण ब्रह्मात्मज्ञानेन बाध्यत्वमुपपादयति पूर्व
बुद्धिमिति ॥ न हि पूर्वमज्ञानजन्यां जातबुद्धिमबाधित्वा पुनः धीरुत्तरोत्पद्यते एवं कर्त्रादिबुद्धिमबाधित्वा नात्मतत्त्वज्ञानमुत्तरमुत्पद्यते अतः प्र
१२ सक्तप्रतिषेधात्मकत्वाद्बाधस्य पूर्वसमय उत्तरप्रसक्त्यभावान्न पूर्वेणोत्तरस्य बाधः किं तु परेण पूर्वस्य प्रसक्तस्य बाध इत्यनवद्यं ॥ पदार्थबोधे
शाब्दस्य मानान्तरसापेक्षत्वेपि ॥ न वाक्यार्थबोधे तदपेक्षा पदार्थबोधेपि व्यवहारमात्रस्यैवापेक्षणात् पूर्वबुद्धेर्व्यवहारांगत्वांशस्योत्तरेणात्मज्ञा
नेनाबाधनान्नोपजीव्यविरोधश्चेति द्रष्टव्यं ॥ किं चोपनिषदात्मज्ञानमेव तत्त्वावेदकमतस्तेनाबाध्यार्थत्वादित्याह दृशिरिति ॥ ब्रह्मात्माका

पूर्वबुद्धिमबाधित्वा नोत्तरा जायते मतिः ॥ दृशि
रेकः स्वयंसिद्धः फलत्वात्स न बाध्यते ३

रान्तःकरणवृत्तिप्रतिफलितापरोक्षस्फूर्त्तिर्दृशिरित्युच्यते ॥ स चैकः पराभावेनोपलक्षितेतः द्वितीय इति यावत् स्वयंसिद्धः परनिरपेक्ष
ः सन्नात्मस्फूर्तिकः स न बाध्यते उक्तविशेषणौ बाधायोग्यत्वाद्गमात्फलत्वाच्च न हि फलं बाध्यते ॥ तस्य सर्वज्ञानसाधारणत्वात्सर्वव्यवहा राम
रहेतुप्रकाशत्वाच्चेत्यर्थः नित्यः सिद्धस्याप्यस्य फलत्वं विषयाकारवृत्तिव्यक्तत्वापेक्षयोपचर्यत इति भावः ॥ ३ ॥ १२

एवंब्रह्मात्मज्ञानस्यवाक्यादनुत्पत्तिशंकामुत्पन्नस्यचप्राबल्योपपादनेनपूर्वप्रवृत्तप्रत्यक्षादिभिर्बाध्यार्थत्वशंकांचोन्मथ्येदानींकथमिदमु
त्पद्यतामितिविवीक्षायांपदार्थपरिशोधनेनेतिश्रौतदृष्टांतेनोपपादयति इदंवनमिति इदंशरीरमेववनमिववनंरागद्वेषशोकमोहादिभि
र्व्याघ्रतस्करादिस्थानीयैर्दूषितमाक्रांतमतिक्रम्यद्रष्टा उत्तमाचार्यादन्वयव्यतिरेकालोचनयापदार्थशोधनेनदेहादिकमनात्मेतिज्ञात्वा
त्यक्त्वास्वमात्मानंसर्वानुस्यूतमनपायिनंप्रपद्यतेऽहंब्रह्मास्मीत्यौपनिषदंपुरुषमवगच्छतीत्यर्थः ॥यथागांधारकोगांधारदेशवासीपुरुषोबद्धचक्षु
रेवतस्करैरारणीयमहावनेनिक्षिप्तःसर्वथामोहाधीनत्राकोशंकुर्वन्केनचित्कारुणिकेनोपलब्धःस्तेनमोचितचक्षुर्बंधोदर्शितस्वदेशमार्गोग्रामाद्ग्रा

इदंवनमतिक्रम्यशोकमोहादिदूषितं वनाद्गांधारकोयद्वत्स्वा
त्मानंप्रतिपद्यते ४ इतिप्रतिषेधप्रकरणं २

मंपृच्छन्पंडितोमेधावीवनात्स्वंदेशंप्रतिपद्यतेतथायमपिसंसारीत्रविघारम्यादितस्करैर्मिथ्याज्ञानपटेनविवेकदृष्टिमाच्छाद्यस्वदेशाद्देहा त१
रण्यप्रवेशितोबंधमोहाधीनःकदाचित्केनचित्कारुणिकेनाचार्येणब्रह्मविदात्याजितमिथ्यादृष्टिपटःप्रतिबोधितस्वदेशब्रह्ममार्गोन्वयव्य
तिरेकाभ्यांस्वयमूहमानःस्वमात्मानमधिगच्छतीत्यर्थः ॥४॥ आत्मज्ञानोत्पत्तिविधिप्रकरणेद्वितीयेविहितंप्रतिषेधप्रकरणमित्यन्यत्रा २

येयं ब्रह्मविद्या प्रतिपाद्यते तां तत्स्वप्रकाशमानं ब्रह्म किं प्रत्यगात्मनो भेदेन प्रत्येतव्यं तदभेदेन वेति द्वा सुपर्णा सयुजेत्यत्र भेदश्रवणादयमात्मा ब्रह्मे
त्यभेदश्रवणाच्च संदेहे निर्णयकारणं श्रौतं दर्शयन् वाक्यविषयमर्थं स्पष्टयति ईश्वरस्त्वाविना [illegible] ईश्वरो जगत्कारणत्वेनोपलक्षि
१३ तः परमात्मा सत्यज्ञानानंतानंदरूपः स चेदात्मभिन्नो भवेत् तदा घटादिवद्विषयभूतः परोक्षो वा स्यात् तदा असावीश्वरोऽहमस्मीति मुमुक्षुर्न धारयेदात्मानं तत्त्व
तो न प्रतिपद्येत न तत्त्वमस्यादिवचनविरोधः स्यात् आत्मेति तूपगच्छंति ग्राहयंति चेति न्यायविरोधश्च स्यादित्यर्थः ॥ ईश्वर एवात्माहमस्मि नान्य
इति चेद्धारयेद्धि श्रौतीयात्तदा न श्रुतिन्यायविरोध इति योज्यं ॥ सा विद्या तिरोहितभेदाकारप्रत्यग्ब्रह्मैकावलंबिनी अन्यस्याश्च विद्याया निवर्त्तिका

ईश्वरश्चेदनात्मा स्यान्नासावस्मीति धारयेत् आत्मा
चेदीश्वरोऽस्मीति विद्या सान्यनिवर्त्तिका १

समूलसंसारनिवर्तिकेत्यर्थः ॥ ब्रह्मवेद ब्रह्मैव भवति ब्रह्मैव सन्ब्रह्माप्येतीत्यादिश्रुतौ ब्रह्मज्ञानस्य ब्रह्मभावफलश्रवणादन्यत्वपदे
मा शितस्य न पृथक्त्ववान्यस्यान्यप्राप्तौ न तु उपपद्यते ऐक्यज्ञानमेव फलवदिति तदेव शास्त्रतात्पर्यं न भेदे तज्ज्ञानस्याऽफलत्वादन्योऽसावन्योऽहम राम
स्मीति न स वेदेति भेददर्शनस्य निंदितत्वाच्च भेदश्रुतेस्त्वनाद्यविद्याकल्पितभेदानुवादपरत्वाच्च स्वार्थे तात्पर्यमिति भावः ॥ १ ॥ १३

रतस्त्वाभेदे देवदत्तात्पर्वमित्याहात्मन इति । अस्थूलत्वादयो धर्माः प्रत्यगात्मनोऽन्यस्य परस्येश्वरस्य चेन्मता इष्टाः स्युः तदास्येश्वरस्यानात्मभूतत्वादज्ञेयत्वे सति मुमुक्षोरस्थूलत्वादिविशिष्टेनेश्वरेण किं स्यान्न किमपि स्थूलोऽहं कृशोऽहमित्यादिस्वगतभ्रान्तेरनिवृत्तेरित्यर्थः । यदा त्वस्थूलत्वादिधर्मक ईश्वरोऽहमस्मीति ज्ञायते तस्यात्मत्वे सति तदा तीयोऽन्यधीहृतिः ।। स्वात्मन्येव गृहीतायां कृशस्थूलत्वादिविपरीतो मोहमूलतया बाधसिद्धेः फलं स्यादित्यर्थः ।।२।। कस्मिन्नाकाश ओतश्च प्रोतश्चेति श्रुतिकार्यकारणात्मकजगदाश्रयप्रश्नोत्तरत्वेनाक्षरस्योपक्रमादेतस्य वा अक्षरस्य प्रशासने गार्गि इति जगदीश्वरतया मध्ये परामर्शाददृष्टं द्रष्ट्रित्यादिना तत्स्वभावकथनपूर्वकमनेनैवैतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्युपसंहारादीश्वरपरता बृहद्वाक्यस्याशेषस्यावधारिता ।। तत्र नान्यदतोऽस्ति द्रष्टृ श्रोतृ मन्तृ विज्ञात्रिति च द्रष्टृत्वाद्युपलक्षितस्य प्रत्यगात्मनो ब्रह्मणाभेदश्चावधारित इतीश्व

आत्मनोऽन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः ॥ अज्ञेयत्वेऽस्य किं तैः स्यादात्मत्वे त्वन्यधीहृतिः ॥२॥

मिथ्याध्यासनिषेधार्थं ततोऽस्थूलादि गृह्यताम् ॥ परत्र चेन्निषेधार्थं शून्यतावर्णनं हि तत् ॥ ३॥

रात्मनोरभेदस्य वशाद्वाक्यार्थे सति तस्मात्प्रत्यगात्मन्यध्यस्तस्थूलत्वादिप्रतिषेधपरमिदं वाक्यमास्थेयमित्यभिप्रेत्याह मिथ्येति ।। ततस्तस्मान्मिथ्याध्यासस्याज्ञानमूलस्य निषेधार्थं निवृत्त्यर्थमस्थूलादि प्रत्यगात्मविशेषणत्वेन गृह्यताम् ।। विपक्षे दोषमाह परत्रेति अस्थूलादि वाक्यं परत्र प्रत्यगात्मनोऽन्यत्रास्थूलत्वादिनिषेधार्थं चेत्स्यात्तदा हि निर्वृत्तं शून्यतावर्णनमेव तत्स्यादात्मनोऽन्यस्य जडत्वात्तस्य च स्थौल्यादिधर्मयोगान्निषेधोऽतः पातिते सतीश्वरस्येश्वरत्वायोगाद्विशेषमात्रपरमेव वाक्यं स्यादित्यर्थः ।। तस्मादस्थूलादिधर्मकस्यानात्मत्वायोगादीश्वरमभ्युपगच्छतात्मैव सोऽभ्युपगन्तव्य इति भावः ।।३।।

किंच प्रत्यगात्मनोऽन्यत्र स्थूलत्वादिप्रतिषेधे वा प्राणप्रतिषेधो निष्फलः स्यादापद्येतेति दोषांतरमाह बुभुत्सोरिति यदि प्रत्यगात्मनो बुभुत्सोरात्मतत्त्वं बो
द्धुमिच्छोः संसारित्वेनाभिमतादात्मन इति यावत् तदन्यत्र देहेंद्रियप्राणमनःसु धर्मनिषेधः स्यात्तेत दा अप्राण इत्यादिवचनमनर्थकं निर्विषयं स्याद
न्यत्र प्राणादिप्रसक्त्यभावात् प्रतिषेधस्य च दृष्टार्थत्वादित्यर्थः ॥४॥ इतीश्वरात्मप्रकरणांतर्गतीयं विहृतं ननु यदिदमीश्वराभेदेनात्मनो ज्ञानेनोक्तसाधनसु
१४ तेन चोपपद्यते संचितानेककर्मसद्भावात् कर्मणां च फलावश्यंभावनियमात्तैः प्रतिबंधसंभवादिति तत्राहंप्रत्ययेति अहमिति प्रत्ययोऽहंका तो० ४
रोऽनात्मन्यात्माभिमानलक्षणः सबीजं कारणं यस्य कर्मणस्तदहंप्रत्ययबीजं अहमिति प्रतीयते आत्मा यस्मिन्नंतःकरणे साभासे तदहंप्रत्यय

बुभुत्सोर्यदि चान्यत्र प्रत्यगात्मन इष्यते अप्राणो ह्यमनाः शुभ्र इति चानर्थकं वचः ॥४॥ इतीश्व
रप्रकरणांत्तृतीयं० अहंप्रत्ययबीजं यदहंप्रत्ययवत्स्थितं नाहंप्रत्ययवद्दग्धं कथं कर्म प्ररोहति ॥१॥

वत्तस्मिन्नहंप्रत्ययवति स्थिते संचिते यत्कर्मजातं तत्राहं कर्ता भोक्ता किंतु ब्रह्मैवाहमस्मीति यः प्रमाताज्ञनितः प्रत्ययः स एव वह्निस्तेनोपदग्धं कथं
पुनः प्ररोहति फलोन्मुखं जायेतेति योजना ॥ तथा च श्रुतिस्मृती क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति
ज्ञानोदयेनांतरीयकतया मूलाज्ञानस्य विरोधादेव निवृत्तिसंभवात्तत्कार्यांतःकरणस्यापि निवृत्तेराश्रयाभावे कर्मस्थित्ययोगात्कुतस्तेन मोक्षप्रति राम
बंधशंकेत्यभिप्रायः ॥१॥ १४

ननु यथाज्ञानवतोपि मिष्टान्नादिकर्म सफलमुपलभ्यते तथा तस्यादृष्टफलमपि कर्म सफलं स्यादिति कल्प्यत इति शंकते इष्टं चेत्त्वरोहः स्यादिति
परिहरति नान्यकर्मासदृश्यत इति निनिषेधार्थः स मिष्टान्नादिर्विदुषो व्यापारो न्यकर्मा अन्यं प्रवृत्तफलं कर्म कारणं यस्य सो न्यकर्मा दृश्यते ज्ञा
नाविरोधि प्रारब्धफलकर्मनिबंधनं हि मिष्टान्नादि ॥ नैवं विधिलक्षणं तस्य ज्ञानविरोधित्वादित्यर्थः ॥ ननु ज्ञानादज्ञाननिवृत्त्या तन्मूलाहंकार
निवृत्तिद्वारेण तदाश्रयकर्मनिवृत्तौ कथमारब्धमपि कर्म सिध्येद्यन्निमित्ता विदुषो मिष्टान्नादिकर्मप्रवृत्तिरिति पृच्छति पूर्ववादी तन्निरोध इति

इष्टं च चेत्त्वरोहः स्यान्नान्यकर्मासदृश्यते तन्निरोधः कथं चेत्स्यात्पृच्छामो वस्तदुच्यतां ॥ १ ॥
देहाद्यारंभसामर्थ्यात् ज्ञानं सद्विषयं त्वपि अभिभूय फलं कुर्यात्कर्मातो ज्ञानमुद्भवेत् ॥ २ ॥

कर्माश्रयः प्रथमतच्छब्दार्थः कर्म द्वितीयतच्छब्दार्थः ॥ १ ॥ उत्तरमाह देहादीति ॥ सद्विषयं प्रमाणजनितत्वेन तत्सत्त्वमपि ब्रह्मात्मविषयं ज्ञा
नमभिभूय विदेहकैवल्यरूपात्फलात् च्याव्य कर्म प्रारब्धफलं तु लोकफलं देहाभासजगदाभासरूपं तत्त्वविज्ञानवत्यपि कुर्यादेव कुतः देहाद्यारंभे
प्रतिसमर्थत्वात् ते प्रारब्धकर्मफलभोगावसाने सति ज्ञानप्रतिबंधरहितं सत् उद्भवेत् उद्भूतं भवति वर्तमानकार्यसंपादकाविद्यालेशमप्यपवा
ध्य विद्वांसं स्वात्मन्येव स्थापयतीत्यर्थः ॥ २ ॥

१५ ननु प्रारब्धकर्मैव शास्त्रज्ञानिनोपि भोगः स्यात्तत्वनारब्धकर्मतत्फलयोस्तस्मिंश्च वस्थितिरिति कथमुपपद्येत। ज्ञानकार्यत्वाविशेषात्सर्वस्य। अज्ञाननिवृ
त्तौ च पुनराश्रयाभावे नावस्थानाभावस्य समत्वादित्याशंक्य विशेषमाह। आरब्धस्येति भोगो ज्ञाने चेत्येते हि यस्मादारब्धस्य कर्मणः फले। तस्तयोर
विरोधो युक्तः। इतरस्य त्वनारब्धफलस्य संचितस्य क्रियमाणस्य वा कर्मणो वैधर्म्यं वैपरीत्यं विरोध एवेत्यन्वयार्थः॥ अयं भावः। ज्ञानं हि स्वकारणाज्जायमा
नं शरीरादिसापेक्षमेव जायते। अशरीरस्याग्रहकत्वानासंभवात्। शरीरादि तु न ज्ञानकारणादुत्पद्यते। अन्यकारणस्यान्यहेतुत्वायोगात्। ततः कैश्चित्कर्म
विशेषैः शरीरविशेषे ज्ञानोत्पत्तियोग्ये स्वफलदानायारब्धे सति तमाश्रित्य ज्ञानहेतुकर्माणि ज्ञानमारभंते। तदुत्पत्त्यभ्युपगंतव्यं तथा चारब्धे देहे तद्योगस्य

आरब्धस्य फले ह्येते भोगो ज्ञानं च कर्मणः । अ
विरोधस्तयोर्युक्तो वैधर्म्यं चेतरस्य तु ॥ ४

वश्यंभावित्वाद्योगप्रदकर्मारब्धशरीरमाश्रित्य स्वहेतुसमासादितं ज्ञानं स्वफलमज्ञाननिवृत्तिं कुर्वदपि न सद्यो भोगैकनाश्यदेहारंभककर्माणि
त्रैय प्राविघालेशं निवर्त्तयितुं पर्याप्तं विरोधित्वाभावादिति नारब्धफलकर्मज्ञानयोर्विरोधः। अनारब्धफलानां तु कर्मणामकर्त्रात्मतत्त्वज्ञानोदये विरोधा राम
देव कर्तृस्वभावनिवृत्त्या वाश्रयाभावादभावोपपत्तेर्न ज्ञानेन सहावस्थानमुपपद्यत इत्यस्ति विशेष इति ॥ ४ १५

मनुज्ञानिनो पि चेच्छेद्योगो देहारंभककर्मनिबंधनो ऽस्ति तर्हि तस्य कदाचित् देहात्माभिमानसंभवात्तद्भूततदुत्तरितप्रतिबंधवशान्मोक्षानुपपत्तिरिति चेन्नेत्याह
देहात्मज्ञानवदिति यथाविवेकविल्लक्षणस्य लौकिकस्य देहे मनुष्योहमित्यात्मज्ञानं निःसंदिग्धमुपलब्धं तथा मुमुक्षोरात्मन्येव देहाद्यहंकारपर्यंतसा
क्षिणि आत्मन्येव यस्य देहात्मज्ञानबाधकमहमस्मि परंब्रह्मेत्येवंरूपं निःसंदिग्धं ज्ञानं भवेत्तस्य पूर्वोक्तज्ञानबलादनर्थराशेरपनीतत्वान्मुक्तिमनि
च्छन्नपि बलान्मुच्यत एवेत्यर्थः ॥ तथा चाविर्भूतात्मतत्वस्य पुनर्देहाभिमानहेत्वभावान्न मोक्षे को पि प्रतिबंध इति भावः ॥ तथा च श्रुतिः भिद्यते हृद

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं ॥ आत्मन्येव भवेद्यस्य स नेच्छन्नपि मु
च्यते ॥ ५ ॥ ततः सर्वमिदं सिद्धं प्रयोगोऽस्माभिरीरितः ॥ ६ ॥ इत्यहंप्रत्ययप्रकरणं

यग्रंथिः छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्याद्याः स्मृतयो पि बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः ॥ ज्ञा
नदग्धैस्तथा क्लेशैर्नात्मा संबध्यते पुनः ॥ यथा पर्वतमादीप्तं नाश्रयंति मृगद्विजाः ॥ तद्वद्ब्रह्मविदो दोषा नाश्रयंति कदाचन ॥ मंत्रौषधबलैर्य
द्वज्जीर्यते भक्षितं विषं ॥ तद्वत्सर्वाणि कर्माणि जीर्यंते ज्ञानिनः क्षणादिति ॥ ५ ॥ ज्ञानिनः कर्मणां प्रतिबंधाभावमुपपाद्येतमुपसंहरति ॥ तत इत्यर्द्धश्लो
केन सर्वमिदमिति प्रारब्धकर्माविरोधित्वोक्तिः सिद्धं स्यादि प्रमाणात्सिद्धमित्यर्थः ॥ प्रयोगमुपपत्तिः ॥ ६ ॥ तत्वज्ञानस्वभावप्रकरणं चतुर्थं विवृतं ॥ अहं
प्रत्ययप्रकरणमित्यत्र

४

स्था

यदि प्रागुक्तरीत्या ब्रह्मात्मज्ञानममृतत्वं गमयेत्तर्हि किमिति तर्हि सर्वैरहं ब्रह्मास्मीत्यात्मरूपं न गृह्यते निसर्गत एव सर्वेषां परमपुरुषार्थत्वादिति तत्राह ॥
मूत्राशंक इति । अत्रेयमाख्यायिका उदंको नाम कश्चिद्द्विजः विधिर्भगवंतं महाविष्णुं तपसा तोषयित्वा देवरक्षितममृतं प्रार्थितवान् ततो भगवता देवेंद्रं प्रत्य
१६ क्तेममृतमस्मै दीयतामिति इंद्रस्तु विष्णोराज्ञां पालयन्नमृतकलशं नीत्वा मातंगवेषमास्थाय स्वबस्तिदेशे तं कलशं धृत्वा पनिधायोदंकाय दातुमारेभे ऽ
सूयया मा भवत्वस्यामृतपानमिति मन्यमानः स तु उदंकोपि चंडालमूत्रशंकया न जग्राहेति ॥ उदंको मूत्राशंकः सन्यथा यथामृतमेव ब्रह्मत्वदीप

मूत्राशंको यथोदंको नाग्रहीदमृतं यथा ॥ कर्मना
शभयाज्जंतोरात्मज्ञानाग्रहस्तथा ॥ १ ॥

लब्धमप्यमृतं यथा नाग्रहीन्मदभिलषितममृतमिदमिति न गृहीतवान् जातिनाशभयादिति योजना ॥ तथाजंतोर्लोकस्य वर्णाश्रमोपाधिविहि राम
तकर्मनाशभयादात्मज्ञानस्य योऽत्यस्याग्रहस्तस्मिन्नादरस्तु न्नाद्वैयोजनापदार्थस्वरूपापरिज्ञानं विपरीतज्ञानं च भ्रांत्यात्मज्ञात्मस्वरूपाग्रह १६
णाकारणमिति भावः ॥

नन्वद्दष्टांते देवेंद्रस्य वेषान्यत्वमस्त्वत्र कलशस्य च मूत्राशयस्थाननिवेशनं च जातं तत्र मूत्रभ्रमोत्पादनेनाम्लतायह राक्षराणामाशीत्र तथात्मनो ब्रह्मस्व
त स्य भ्रमकारणमस्तीत्यत आह बुद्धिस्थ इति ॥ अनाद्यविद्ययात्मन्यस्ते ध्येतु द्वौ लिंग शरीरे भिमानित्वेन स्थितः आत्मा तस्यां बुद्धौ चलंत्यां चलतीव ह
श्यते न वस्तुतश्चलत्यविक्रियत्वात् तेन ध्यातस्यां ध्यायेत्यां निश्चलतीभूतायां च ध्यायतीव निश्चल इव दृश्यते प्रतिभासते न वस्तुतो ध्यायति चलनाभावेन तत्प्र
तियोगिकस्यैनैश्चल्यस्याप्यभावादित्यर्थः ॥ विकारवद्बुध्यविवेकादादावेव संसार्यहमस्मीति विपरीतं निश्चयं दोषाद्बुध्यादिभिरैर्यमात्मप्या सु

वद्धिस्थश्चलतीवात्मा ध्यायतीव च दृश्यते ॥ नौगतस्य यथा दृश्यास्तरुसंसारविभ्रमः ॥ १ ॥ नौस्थस्य
पातिलोम्येन नगानां गमनं यथा । आत्मनः संसृतिस्तद्वद्ध्यायतीवेति हि श्रुतिः ॥ २ ॥

त्मनो ब्रह्मत्वं न गृह्णाति लोक इत्यभिप्रायः ॥ अविवेकादन्यथाप्रतिपत्तौ दृष्टांतमाह नौगतस्येति तद्वदिति दार्ष्टांतिकोक्तिः ॥ १ ॥ उक्तमेव प्रपंच
यति नौस्थस्येति ॥ जलस्थायां चलंत्यां नावि स्थितस्य जनस्य यथा नौगतिदिग्वैपरीत्येन जलाशयतीरस्थानां नगानां वृक्षादीनां गमनं न विभाव्यते ॥ उपा
ध्यविवेकात्तद्वत् संसारिणोप्यात्मनः संसृतिरनुभूयत इत्यर्थः ॥ उक्तार्थे त्वनुवादिनी श्रुतिं पठति ध्यायतीवेति हि श्रुतिरिति समानः सन्नुभौ लो
कावनुसंचरति ध्यायतीव लेलायतीवेति श्रूयत इत्यर्थः ॥ ३ ॥

प्रपं वितद्दृष्टांतानुगुणयेन दार्ष्टांतिकं प्रपंचयन्नुदाहृतस्कृत्यर्थमाह चैतन्यप्रतिबिंबेनेति चैतन्यप्रतिबिंबश्चिदाभासस्तेन व्याप्तो हि यस्माद्बुद्धेर्बोधो विषया
कारवृत्तिर्जायते अतः स्वाभासाविवेकाच्छब्दादिभिर्बुद्धिवृत्तिव्याप्तविषयैरिच्छाभावेत्ततीयाविषयभूतदेहाद्यात्मनाभासो भासनं स्फुरणमात्मनो भवतीति शेषः
१७ ॥ यद्विशब्दादिनिर्भासइति पाठेत्तस्मात्तेन तदा बोधविशेषणं शब्दादेर्विषयस्य निर्भासो यस्मिन्तथेति सुगमं येनैवमेकस्यां बुद्धिवृत्तौ देहादिविषयवै

चैतन्यप्रतिबिंबेन व्याप्तो बोधो हि जायते बुद्धेः
शब्दादिनिर्भासस्तेन मोमुह्यते जगत् ४

तन्ययोः संश्लेषइव भवतीति नान्योन्याविवेकनिमित्तेन जगत् जनोति शयेन मुह्यतीत्यर्थः ॥ यथा नौस्थः पुरुषो नावश्चलनं नानुभवति अचलत्तट
वृक्षादेषु चलनमनुभवत्युपाधिसामर्थ्यादेवं बुद्धिस्थदेहाद्यात्मभावमिवापन्न आत्मा तदीयं व्यापारं न पृथगनुभवति ॥ तदाभासाविवेका राम
नु चिदात्मनि विकारमारोपयन्ननुभवति मूढ एवेत्येतद्ध्यायतीवेत्यादि श्रुत्योच्यते अतउपाधिसामर्थ्यात्संसारित्वं चैविभ्रमइत्यभिप्रायः ४ १७

एवमविवेकाधीने संसाराध्यासे विविक्तपदार्थस्य वाक्यादहं ब्रह्मास्मीति बुद्धिवृत्त्युदये मुक्तिः फलिष्यत्यतः पदार्थविवेकवत्ताभाव्यं मुमुक्षुणेत्यभिप्रेत्याह॥ चै
तन्यभास्यतेति। अहमोऽहंकारस्य चिदविद्धप्रिरूपस्य यच्चैतन्यभास्यताहं रूपता यच्च तादर्थ्यं चिदात्मनो विषयोपस्थापकत्वेन तच्छेषत्वमस्ति तदुभयमस्या
हंकारस्य संबंधि तस्मिंश्चेदमंशस्य प्रहाणे विवेके सति न भवेत्तस्मादिति योजना॥ तत्र योऽनुभवः साक्षी परिशिष्टः स परः परमात्मा वाक्यार्थभूतो भवे
दित्यर्थः॥ यद्वा अस्य हमोऽहंकारस्य चैतन्यभास्यताजडत्वात्तादर्थ्यं च तच्छेषत्वं चयं यस्मादस्ति तस्मादयमहंकारो नात्मेति विवेकेन प्रहाणेन तस्मिन्
सि सदर्थमानत्यागेन योऽनुभवः स पर आत्मेति निश्चयवान् भवेदिति योजना अथवा सर्ववाक्यार्थविषयः परः सर्वांतरोऽनुभवोऽहमोऽहंकारस्येदमंशप्रहा
णेन एव सम्कूरणेन भवेदिति संबंधः॥ इदमनिदमात्मकस्याहंकारस्य संबंधी यदिदमंशस्तस्य साक्षिसाक्ष्यान्वयव्यतिरेकाभ्यामवधितदवधित्वव्यतिरेको

चैतन्यभास्यताहमस्तादर्थ्यं च तदस्य यत् इदमंशप्रहाणेन परः सोऽनु
भवो भवेत्॥ ५॥ इति मुख्याशंकप्रकरणं

व लोचनरूपेणामननेनापवाद्ये सति अशिष्टो योऽनपोह्य आत्मेत्यनुभवो भवेदित्यर्थः॥ नन्वहमित्यवभासे इदमंश एव न च कश्चिद्यस्य प्रहाणेन
परोऽनुभवो भवेदित्याशंकायामाह चैतन्यभास्यतेति तादर्थ्यं चेति चाहं सुषुप्त्यादावात्मनि भासमानेपि अहंकारस्यानवभासादनात्मत्वे निश्चिते स
ति जागरितादावागंतुकत्वाच्चैतन्यभासनात्मस्य सिद्धा अतः प्रतिभासत इदमंशाभावेपि चैतन्यभास्यत्वेन लक्षितो नास्तीदमाकारतेत्यर्थः। तथा तादर्थ्य
मप्यस्ति आत्मनि कर्तृत्वभोक्तृत्वादिव्यवहारनिर्वाहकतया आत्मशेषत्वमस्ति यद्यस्मादेवं तत्तस्मादप्यनात्मत्वलक्षण इदमंशो विद्यते अतस्तत्प्रहाणे
न ब्रह्मात्मानुभवो भवेदिति सदैव समंजसे॥ ५॥ तु ध्यवरोधप्रकरणं पंचमे विहृते मुख्याशंकप्रकरणमित्यन्वत्र॥ ॥ सा ४

उ०स पदार्थविवेकवतो वाक्यादहं ब्रह्मेति ज्ञानं भवतीत्युक्तं तत्राहमित्यत्रेदंमंशाहारेण मात्त्विततत्वस्यशोधनप्रकारः सूक्ष्मोपायो निर्दिष्टः। तत्रासमर्थप्रति
१८ पत्तॄनुपायेन पदार्थशोधनप्रकारमुपदेष्टुं प्रकरणमारभ्यते॥ तत्र यत्स्वरूपप्रहाणमन्तरेणाहातुं न शक्यते यथाग्नेरौष्ण्यं तत्तस्य स्वरूपत्वादेव न विशेषणतां
प्रतिपत्तव्यानि तथा विधस्याव्यविच्छि शेषणत्वव्यवहारं कश्चिन्न भेदमाश्रित्येति छित्वेत्यात्मनि सति सत्तावेतन्यानंदानामनपायाच्चतेषां विशेषणत्वं किंतु स्व
रूपत्वमेव कृशः स्थूलः कृष्णो गौरोहं मनुष्यः श्रोताद्रष्टावक्ताकामी क्रोधी ज्ञानीकर्त्ताभोक्ता सुखी दुःखीत्येवं विधानि विशेषणानि नात्मनः सत्तादिवत्स्वरू

छित्वात्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते॥ तथा
शिष्टेन सर्वत्यागेन येन विशेष्यते॥ १॥

पभूतानि सत्यप्यात्मनि सुषुप्त्यादौ तेषामभावादित्येवमात्मनः पृथग्भूतस्य कर्तृत्वादेर्धर्मत्वमित्यभिप्रेत्य पृथग्भूतस्य विशेषणत्वाभावे
दृष्टांतमाह छित्वात्यक्तेनेति यथायं दृष्टांतस्तथायेन येनानुव्यक्त्वादिना विशेष्यते तेनेन सर्वेणाशिष्टेन त्यक्तेन हस्तादि रिक्तेन पादादिना वा स्व
मात्मानं विशेषणीय यथाहस्तच्छेदानंतरं हस्तवानहमिति न विशिष्टप्रत्ययः क्रियते एवमेवयादादिमान्मनुष्योहमित्यादि विशिष्टप्रत्ययो न कार्य राम
इत्यर्थः। १ १८

स २

देहद्वयसमवायिधर्माणामात्मनिष्ठापि चारात्रैरात्मा विशिष्यत इत्युक्तमनूद्य फलितमाह ॥ तस्मादिति ॥ अनात्मत्वेन त्यक्तेन हस्तेनेति संबंधः ॥
विमतानि विशेषणानि नात्मस्वभावभूतानि विशेषणत्वात् छिन्नत्यक्तहस्तवदित्यर्थः ॥ यस्मादेवं तस्मात् ज्ञोऽज्ञानं वा विवेकतानवात् सर्वविशेषणैर्मुक्त
स्थितः सदा नेदंमात्रात्मक एवावशिष्यत इत्यर्थः ॥ १ ॥ उक्तन्यायेन विशेषणानामनात्मत्वे विनात्मनस्तद्वियोगे ऽस्ति आगमापायाभ्यां संबंधनैरन्तर्यादि
त्याशंक्याह विशेषणमिदं सर्वमिति ॥ इदं सर्वं विशेषणं यथालंकरणमलंकार्यसंबंधेऽपि न तत्रादात्म्यं तद्धर्मत्वबुद्धिविषयस्तथा साधु शोभनं युक्तमिति

तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वविशेषणं ॥ अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वविशेषणैः ॥ १ ॥
विशेषणमिदं सर्वं साध्वलंकरणं यथा ॥ अविद्याध्यासतः सर्वं ज्ञात आत्मन्यसद्भवेत् ॥ २ ॥

यावत् ॥ इतरथा आगमापायानुपपत्तेरित्यर्थः ॥ तर्हि कुतो मनुष्योऽहमित्यादौ तादात्म्यावभासस्तत्राह ॥ अविद्याध्यासत इति मोहादेव तथावभा
सत इत्यर्थः ॥ यस्मादविद्याध्यस्तमेवात्मनीदं सर्वं विशेषणमतो ज्ञाते आत्मन्यविद्यानिवृत्तावसद्बाधितं कालत्रयेऽप्यविद्यमानं भवेत् यानि
स्थितं भवेदिति योजना ॥ २ ॥

ज्ञात आत्मनीत्यत्र ज्ञेयत्वमात्मनस्तत्त्वमिति शंका स्यात् । ज्ञेयत्वे च विशेषणादिवदनात्मत्वप्रसंगादित्याशंक्याह ज्ञातैवेति ॥ ज्ञेयवस्तुस्वरूपदृश्यांशापोहं कृत्वा यो ज्ञाता
सदा सर्वस्य स्वात्मा न ग्राह्योऽश इति ॥ ग्राह्यो ध्यवसेयः किल स्वतः केवलो ज्ञातत्वविशेषतो नापरहित इत्यर्थः ॥ ज्ञातत्वाद्यपलक्षितेति चिन्मात्रमस्तु प्रप
१९ काशस्वभावतया सर्वानुस्यूतं वस्त्वात्मेति विवेकतो निश्चितप्रत्ययो भवेदिति भावः ॥ अहमित्यनुभूयमानत्वात्कथं ज्ञातैवात्मेत्युच्यत इत्यत आह
स्व हमित्यपीति ॥ यदपीदमहमिति ग्राह्यमात्मरूपमन्यसे तद्व्यपेतांगसमं छिन्नहस्ततुल्यं हि एवं तत्तद्वस्तुस्पादावात्मन्यवभासमानेऽप्यहमित्यनवभासना
दहमो व्यभिचारित्विसत्त्वात्मदृश्यतयात्मत्वायोगादित्यर्थः ॥ ४ ॥ आत्मनो हंप्रत्ययग्राह्यत्वाभावे च चक्षुरादेरप्यविषयस्य कुतः सिद्धिरिति मुग्धशंकां दृश्यते य
नायातुर्वन्नात्मनोऽन्यनिरपेक्षात्स्वतः सिद्धिं साधयति यावानिति अहमित्यत्र यावान्किंचिदवभास्यत्वलक्षणोनेदमंशोऽपोऽहंकारादिर्यत्र विशेषणतां स्या

ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः ॥ अहमित्यपि यद्ग्राह्यं व्यपेतांगसमं हि तत् ॥ ४ ॥
यावान्स्यादिदमंशो यः स स्वतोऽन्यो विशेषणात् ॥ विशेषणप्रत्ययो यत्र सिद्धोऽत्र चित्रगुर्यथा ॥ ५ ॥

धर्मिण्यस्यानुगतप्रतिभासे प्रत्यगात्मनि विशेषणव्यवहारहेतुः स्यात्सः प्रत्यगात्मान्यो विशेषणत्वेनाभिमतान्नदहंकारादेः परः विशेषणप्रत्ययस्य
सर्वेषां विशेषणानां प्रत्ययो व्यावृत्तिर्यस्मिंस्त्रिति व्युत्पत्त्या निर्विशेषप्रत्ययः एवंरूपः स्वतः सिद्धोऽन्यनिरपेक्षः एव सिद्धं स्फुरन्नवतिष्ठत इति पदयोजना यथा वे राम
वदत्तो विशेषणतामभूतया विद्यया चित्रगोरन्यस्तत्संबंधी स्वामी गेवसिद्धो न चित्रगोसंबंधस्वसिद्धिं प्रत्ययेक्षते तथात्माप्यहंकारादिसंबंधात्प्रागेव स्वमहिम्ना सि १९
द्धो नाहंकारादिकं स्वसिद्धावपेक्षत इति दृष्टान्तदार्ष्टान्तिकसंगतोऽर्थः ॥ ५ ॥

नन्वहमोऽनात्मत्वे कथमहं ब्रह्मेति तादात्म्यस्फूर्तिरुपपद्येतेत्याशंक्याध्यस्ताहंकारस्य मूलनिवृत्त्यानिवृत्त्यर्था स्फूर्तिर्न त्वहंकारस्यात्मत्वप्रतिपत्त्यर्थेति परिहरति॥ इदमंशोऽहमिति॥ अहमित्यत्राहंकारावभासे यदिदमंशः स नात्मा दृश्यत्वादिति निश्चित्य पंडितैस्त्याज्यस्तस्मिन्नात्माभिमानो न कार्य इत्यर्थः॥ तर्हि कथं स्फूर्तिनिर्देशस्तत्राह अहमिति॥ अहं ब्रह्मेति वाक्यार्थनिष्ठायां योऽहंकारांश उल्लिख्यते स भूतपूर्वगत्या निर्दिष्टो भवेत्॥ भूता संजाता पूर्वा गतिः ज्ञानं यस्य स्यादिति विग्रहः॥ अहंकारलक्षणवस्तुतत्साक्षिरूपमहमिति स्फूर्त्योल्लिख्यत इत्यर्थः॥ ६॥ इति विशेषापोहप्रकरणं षष्ठं विवृतं छित्वा प्रकरणमिति वा

इदमंशोऽहमित्यत्र त्याज्यो नात्मेति पंडितैः॥ अहं ब्रह्मेति शिष्टोंऽशो भूतपूर्वगतेर्भवेत्॥ ६॥ इति छित्वाप्रकरणं बुध्यारूढं सदा सर्वं दृश्यते यत्र तत्र वा॥ मया तस्मात्परं ब्रह्म सर्वज्ञश्चास्मि सर्वगः॥ १॥

एवं कृतान्वयव्यतिरेकस्य परिशोधितपदार्थतत्त्वस्य वाक्याद् ब्रह्मवाक्यार्थतानुभवः स्फुटतरमुपपद्यत इत्युपपत्त्या निर्धारितमर्थं स्वानुभवावष्टंभेन स्पष्टीकर्तुं प्रकरणांतरमारभते॥ बुध्यारूढमित्यादिना॥ यस्मान्मया सर्वमध्यात्ममधिभूतमधिदैवमित्यादिलक्षणं यत्र तत्र वा जाग्रत्स्वप्नयोरिहलोकपरलोकयोर्वा स्थितं प्रत्यक्षादितः शास्त्रतो वा यदुपलभ्यमस्ति तत्सर्वं बुध्यारूढं बुद्धिवृत्तिक्रोडीकृतं सदा दृश्यते प्रकाश्यते तेन तस्मादहं सर्वदृश्यविलक्षणत्वात्परं प्रपंचातीतं ब्रह्मास्मि सर्वज्ञः सर्वार्थप्रकाशकः सर्वगो परिच्छिन्नश्चास्मीत्यर्थः॥ १॥

ननु कथमेतावता सर्वज्ञत्वं पुरुषान्तरबुध्यारूढेऽर्थे पुरुषान्तरस्यानुभवस्मरणयोरसंभवादेकस्यात्मनः सर्वार्थप्रकाशकत्वासिद्धेरित्यत आह॥ यथात्मेति॥ आ
२० त्मनि सर्वव्यवहारप्रवर्त्तकतया आत्मसंबंधिनी बुद्धिरात्मबुद्धिस्तस्याश्चारः प्रचारो [illegible] आत्मबुद्धिचाराः अध्यात्माधिदैवस्थूलसूक्ष्मदेहात्मकास्तेषां साक्षी
स्फोरकोऽहं यथा तद्वन्तथा परेषु परकीयबुद्धिचारेष्वप्यहं साक्षी साक्षिभेदे प्रमाणाभावात् मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं मयि सर्वं लयं याति तद्ब्रह्मा
द्वयमस्म्यहमित्यादिश्रुतेर्मय्येवैकस्मिंश्चिदेकरसे आत्मनि सर्वप्रमातृतद्बुद्धितत्प्रचारगोचरस्य प्रपंचस्य कल्पितत्वावगमाच्च युक्तं मम सर्वज्ञत्वादी

यथात्मबुद्धिचाराणां साक्षी तद्वत्परेष्वपि। नैवा
पोढुं न वादातुं शक्यास्तस्मात्परो ह्यहं ॥२॥

त्यर्थः॥ यस्मादेवमहं सर्वसाक्षित्वेन सर्वाधिष्ठानत्वेन च सर्वज्ञः सर्वगश्च तस्मादपोढुमपनेतुमस्य दर्शनमस्त्यत्र नास्तीति वा निराकर्तुं नैव शक्यः किं
न विद्यत्वेवादातुं ज्ञानेन क्रियया वा प्रकाशयितुमुत्पादयितुमाप्तुं वा शक्यो हि यस्मादहं ग्राह्यग्राहकादिप्रपंचविलक्षणस्तस्मात्परः परमात्मैवे राम २०
त्युपसंहारः ॥२॥

६

नन्वबुध्यारूढं चेत्सर्वं प्रकाश्यते क्षेत्रज्ञेन तत्तदादर्शनक्रियाकर्तृत्वाद्विकारित्वादिदोषप्राप्तेः तस्मान्नात्मत्वप्रसंग इति शंकां निरस्यन्निर्विकारित्वमिति॥ आत्मनो न विकारित्वं बुद्धिवत्सावयवत्वाभावात्सर्वविकारसाक्षित्वाच्चात एव नात्मनोऽशुद्धत्वं क्रियागुणयोगित्वमस्ति सकलगुणक्रियावद्वस्तुसाक्षित्वाच्च नापि भौतिकत्वमात्मनो रूपादिहीनत्वात् किंच नात्मनो बुद्धिवदल्पवेदनायथाबुद्धेर्बुद्धित्वं स्वर्गादिविषयावेदनास्ति नैवमात्मनो अशेषबुद्धिसाक्षित्वात्सर्वबुद्धिस्वरूपतद्विकारादिसाक्षित्वादित्यर्थः॥ ३॥ यदि निर्विकार एवात्मा कथं तर्हि स सर्वार्थप्रकाशक इत्युच्यते इत्याशंक्य लोकप्रसिद्धदृष्टांतेन निर्विकारस्यैव प्रकाशत्वमुपपादयति मणाविति॥ मणौ स्फटिकादिलक्षणे जपाकुसुमादिरूपारक्ताद्याकारता आतपे सूर्यालोके सत्येव प्रकाश्यते

विकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः॥ अशेषबुद्धिसाक्षित्वाद्बुद्धिवच्चाल्पवेदना॥ ३॥
मणौ प्रकाश्यते यद्वद्रक्ताद्याकारतातये॥ मयि संदृश्यते सर्वमातपेनेव तन्मया॥ ४॥

गृह्यते यद्वत्तथा मयि द्रष्टव्ये आदित्यस्थानीये विद्यमान एव स्फटिकादिस्थानीयायां बुद्धौ जपाकुसुमादिरक्ततादिस्थानीयं सर्वविषयजातं संदृश्यते तत्तस्मादातपेनेव निःप्रकंपेन मया सर्वं प्रकाश्यते न बुद्धिवद्विकारवत्ता नापि बुद्धिरेव द्रष्टा॥ न चैवं सति बुद्धेरनुपयोग एव चेतनस्याविषयविशेषाकारत्वापादनार्थं तदुपयोगादिति॥ ४॥

दु

२१ इदानीं प्रत्यगात्मनोऽद्वितीयत्वमुपपादयंस्तस्य च शुद्धत्वं स्पष्टयति ॥ बुद्धाविति ॥ जाग्रदादौ बुद्धौ सत्यां स्वाविद्ययाध्यस्तायां बुद्धौ समारूढं सत् दृश्यं
द्वैतं भवेद्द्वैतं ॥ नास्ति विपर्यये बुद्धावसत्यां स्वापादौ दृश्यं नास्ति तद्दृश्यमज्ञातसत्वे प्रमाणाभावादित्यर्थः ॥ द्रष्टा तु साक्षी सदा सर्वास्वप्यवस्थासु
द्रष्टैव न दृश्यवत्स्वसत्ताव्यभिचरतीति यस्मादेवं सततं प्रकाशमानत्वाव्यभिचारस्तद्व्यभिचारिणः स्वसत्वानुपपत्तिस्तस्मात् द्वैतं न विद्यत इति नित्य
शुद्धस्वप्रत्यगात्मेत्यर्थः ॥ ५ ॥ यद्यपि द्वैतसंसर्गकृतमशुद्धत्वमात्मनो नास्ति द्वैतस्याभावात्तथापि विद्याविद्याभ्यां संबंधादशुद्धिर्भविष्यतीत्याशंक्य
बुद्धेरेव विद्याविद्ये नात्मनस्तत्संसर्ग इति शुद्धस्वात्मेत्याह ॥ विवेकादिति ॥ न विद्यते विवेको भेदोऽभासमानतया यस्मिन्सो विवेको देहादावात्मबु

बुद्धौ दृश्यं भवेद्बुद्धौ सत्यां नास्ति विपर्यये ॥ द्रष्टा यस्मात्सदा द्रष्टा तस्माद्द्वैतं न विद्यते ॥ ५ ॥ अविवेकात्परा
भावं यथा बुद्धिरवेत्तथा विवेकात्तु परादन्यः स्वयं चापि न विद्यते ॥ ६ ॥ बुध्यारूढप्रकरणं ॥ ॥

द्धिर्विपर्ययज्ञानमिति यावत्तस्माद्विवेकात्परस्यासंसारिणः सर्वसा[illegible]क्षिणया विविक्तस्याभावमविद्यमानतां यथा बुद्धिरवेद्विदितवती
अत्र बुध्यध्यासादेव विदात्मनोऽपि भ्रांतियोगात्साभासा बुद्धिरेवाज्ञानविपर्यासाभ्यां दृष्टं भोक्तृत्वं यथा बुद्धिरवेदित्तु न मितितुष्टवां ॥ तथा विवेक
तु स्वनामापवादेनात्मनः स्वभावनिर्धारणं विवेकस्तस्माद्विवेकाद्ध्रुवं परादसंसारिणः परमात्मनोऽन्यो जीवः संसारी न विद्यते स्वयं चाविसाभा
स बुद्धिर्विसंविदा ज्ञानं विद्यते तदा प्रत्यग्ब्रह्मभूतत्वात्सर्वं स इत्यर्थः ॥ तथा च भ्रांतिसम्यग्ज्ञानयोर्विद्याविद्यारूपयोरपि बुद्धिगतत्वाज्ज्ञात्मनोऽशुद्धि राम २१
धीपीति भावः ॥ ६ ॥ इति बुध्यारूढप्रकरणं सप्तमं विद्वत्ते ७

ननुविद्याविद्ययोर्यदि बुद्धिगतत्वंतर्हिसांख्यसिद्धांतप्रसंगस्तेहि बुद्धेरेवपुरुषस्यापवर्गार्थंभोगार्थंचज्ञानाज्ञानरूपतामाचरतीतिवदंतीत्याशंकामपनु
दन्पूर्वस्यानुभवानुरोधेन साधितमेवब्रह्मात्मज्ञानमात्ममनःसंवादात्मकेनप्रकारणांतरेणद्रढयतिचितिस्वरूपमिति॥ रसादियोगोरागादिनिबंधनो
भोक्तृत्वादिसंबंधः मोहोऽविवेकः फलितमाहात्मनेति॥१॥ यस्मात्सर्वविशेषपरिहित्यात्त्वचेष्टितेनममम्मानाद्यपातिशयस्यकिमपिफलंनास्तितस्मात्त
वोपशमएवयुक्तइत्याहविमुच्येति॥ मायामयकार्यतांमिथ्याचेष्टितंविमुच्यासदीहितान्निरर्थकप्रयासात्प्रशांतिंप्रशममिहमयिप्रत्यगात्मनिआश्रयाहिब्रु
हिअत्रमायामयचेष्टितासदीहितशब्दाभ्यामविद्यानिबंधनत्वस्यसूचितत्वात्सांख्यमतशंकानिरवकाशीकृतावेदितव्या॥ ननुकिमितिप्रत्यगात्मनिमम

चितिस्वरूपेत्वत्त एवमेमतेरसादियोगस्तवमोहकारितः॥ अतोनकिंचित्त
वचेष्टितेनमेफलंभवेत्सर्वविशेषहानतः ॥ १ ॥

नसीलयतउच्यतेसत्यज्ञानादिलक्षणोब्रह्मरूपेवकस्मान्नोच्यतइत्याशंक्याहसदाअहंपरंब्रह्मेति॥ यतःसदैवाहंब्रह्मैवनतथातथासतिसदाविमु
क्तएवास्मिअस्मिन्नेवमुक्तिर्बंधाभावादितियोजना॥ अत्रत्वविशेषणाजन्मादिसमस्तविकारप्रतिषेधार्थं अनएकंसदेकरूपमित्यर्थः॥
सजातीयभेदरहितमितिवाद्वयवर्जितंविजातीयभेदहीनमित्यर्थः॥ अतोमन्मध्येकीभूतंब्रह्मरूपेनदेकीभूतमितिस्थितेनपरेऽव्ययेसर्वएकी
भवंतीतिश्रुतिविरोधइतिभावः॥ अपरायोजना॥ ॥

२२ हि मत्तेऽसत्तुस्वतःस्वरूपशून्येषु देहेंद्रियविषयेषु यदीहितं मम मिलति तं दृष्टमदृष्टं वा फलं तस्मादसदीहितात्सदा सर्वदाज्ञाग्रहदशायामपि प्रशान्तिं प्रशमं माया
हितं दर्पव्यापारं परित्यक्ते त्यर्थः॥ उपशान्तापि त्वमेवात्मानं धारयेत्याह॥ विमुच्येति कार्यतां बुद्धिरूपकार्यात्मतां विमुच्य विहाय मायां कारणरूपमायां अ कारणे
पगच्छत तदात्मिका भवत हि तद्रूपेणास्थित्वा पुनरुद्भविष्यामीति चेन्न आह इहेति इह मत्स्वरूपएवांतरप्रविश कार्यकारणरूपतां विहाय तन्नायं पीतोद

विमुच्यमायामयकार्यतामिह प्रशांतिमायाह्यसदीहितात्सदा
अहं परंब्रह्मसदाविमुक्तवत्तथाजमेकं ह्यपवर्जितंयतः १

कविंदवन्मद्रूपप्रशान्ता भवेत्यर्थः॥ कथमहं मुक्तोऽतः कवलीकृतब्रह्मांडको दिर्मर्येन तत्तत्स्वात्माभिमानेन त्वया प्रयत्नात्स्यामिति चेन्नाहं कदापि चाल
पितुत्वयाशक्यस्त्वयंङ्गति मात्रमेतदित्यभिप्रेत्याह अहं परं ब्रह्मेति यतोऽहं सदा परं ब्रह्म अयमात्मा ब्रह्मेति श्रुतेरिति योऽस्य विमुक्तवदिति ब्रह्मविशेषणं राम
त्वार्थं तद्धितः॥ विमुक्तेति नित्यमुक्तरूप एवेत्यर्थः॥ तथा यथा श्रुत्युक्तं तथेत्यर्थः॥ व्याख्यातमन्यत्र॥ ॥२॥ २२

नेन्वजत्वादिप्रतिपादकशास्त्राद्ब्रह्मणो निर्विशेषतया नित्यमुक्तत्वेपि कथमात्मनो देहादिषु व्रितस्य निर्विशेषतया ब्रह्मरूपता संभवत्यत आह सदा च भू
तेष्विति चशब्दो ऽवधारणार्थः ॥ अहं केवलो ऽविद्यातत्कार्यरूपविशेषणरहितः ॥ सर्वेषु भूतेषु सम एवास्मि उपाधिपरामर्शमंतरेणापि विशेषो ऽल्पो स्वाभा
वादित्यर्थः ॥ सर्वानुस्यूतस्याप्यसंगत्वभावतया निर्विशेषत्वे दृष्टांतमाह ॥ यथा च खमिति ॥ आकाशस्यासंगत्वादेः प्रसिद्धत्वात्तत्सिद्धं कार्यमितिव

सदा च भूतेषु समोस्मि केवलो यथा च खं सर्वगमक्षरं शिवं ॥ निरं
जरं निष्कलमक्रियं परं ततो न मेस्तीह फलं न वेहितं ॥ ३ ॥

शब्दार्थः ॥ सर्वगमित्यादीनि विशेषणानि ब्रह्माकाशयोः समानि ॥ यतः आकाशवत्केवलो ऽहं सर्वभूतेषु समो ऽत आकाशस्वभावो
ऽयमिति सर्वगमित्यादिविशेषणं परंब्रह्मैवास्मीति यो ऽयं उपपादितं ब्रह्मात्मैक्यं फलितमाह तत इति ॥ ३ ॥

शेषभूतस्यतवमदीहितैः फलाभावेपिकथंचिन्मच्चेष्टयात्वसंबंधिनस्तोषप्रतिगुणभूतस्यप्रधानभूतस्यवाकस्यचिदर्थस्यकश्चिदुपयोगोभविष्यतीत्या
 शंक्यसोपिमयिदुः संपादइत्याह अहंममैक इति॥ एकएवाहंचित्स्वरूपस्यममपरमार्थतः सजातीयविजातीयस्वगतभेदेमानाभावात्तेनतेनम
मगुणभूतंकिंचिन्नान्यद्दिष्यतेनेष्यतेतेन यथाकस्यापिप्रधानभूतस्याहंगुणभूतोनास्मितुतः असंगतोनाधेयातिशयत्वादित्यर्थः॥ यतोहमसंगरू

अहंममैको नतदन्यदिष्यतेतथानकस्याप्यहमस्यसंगतः॥
असंगरूपोहमतोनमेत्वयाकृतेनकार्यंनवबाह्यपत्वतः ॥४॥

पोतोनमेत्वयाकृतेनकिमपिप्रयोजनमस्तिकिंचत्वमेवनास्मिकुतस्तवेहितंतत्फलंचेत्याशयेनाह॥ नवचेति॥ मत्स्वरूपात्स्वानकल्पितायाः त
वाधिष्ठानभूतमत्स्वरूपव्यतिरिक्ताभावादभेदेचोपकार्योपकारकत्वासंभवादत्ते विकल्पनयाप्रशांतैवभवेदित्यर्थः ॥४॥

इदानीं कृतार्थस्याप्याचार्यस्य स्वानुभवसिद्धार्थाविष्कारकप्रकरणनिर्माणप्रवृत्तौ निमित्तं दुःखिजनदर्शनसंजातकरुणैव न ख्यात्यादीत्यभिप्रेत्याह। फले
चेति॥ अयं जनो हेतुफलात्मके संसारे विशेषेणासक्त्वा विनिप्रविंत्य विमृश्य ताहृग्जनस्य लोकस्यातः संसाराद्विमोक्षणे मोक्षार्थमहमिमं मत्यात्मसंवा
द रूपं ग्रंथं प्रयुक्तवान् प्रणीतवानस्मि किमनेन संवादग्रंथेनेत जनस्य भवेदिति तदर्थं तं विशिनष्टि स्वरूपेति॥ स्वस्यात्मनो रूपं नित्यचैतन्यस्वभावत्वस्य
तत्वार्थं विज्ञातं तेन स्वविस्पष्टं बोधकारणमित्यर्थः॥ ५॥ यत एवंविधोयं संवादस्तस्मात्साध्यसाधनपर्यावर्त्तलक्षणात्संसाराम्मुमुक्षुभिरयमनुचिंतनी

फले च हेतौ च जनो विषक्त्वा नितिष्ठविंत्याहमतो विमोक्षणे जनस्य संवादमिमं प्रक्लृप्तवान्स्वरूपतत्वा
र्थविबोधकारणं॥ ५॥ संवादमेतं यदि चिंतयेन्नरो विमुच्यतेऽज्ञानमहाभयागमात्॥ विमुक्तकामश्च ३क
तथा जनः सदा चरत्यशोकः समग्रात्मवित्सुखी॥ ६॥ इति चितिप्रकरणं॥ ॥

यइत्यभिप्रेत्याह संवादमेतमिति। अज्ञानकृतान्महाभयात्संसारादित्यर्थः॥ यद्वा महाभयस्यागमो यस्मात्तन्महाभयागमम् अज्ञानं च तस्मादिति
विग्रहः॥ भयहेतुत्वान्नाद्विमुच्यतइत्यर्थः॥ कारणनिवृत्त्या कार्यनिवृत्तिमाह विमुक्तकामश्चेत्यादि॥ चरति जीवन्नेव बंधप्रतिभासरहितः स
न् ब्रह्मरूपेव विचरति कृतकृत्यो भवतीत्यर्थः॥ सुगममन्यत्॥ इमं ति विलापनप्रकरणमष्टमं विवृत्तं॥ चितिस्वरूपप्रकरणमिति वा॥ ॥

यस्यप्रत्यग्ब्रह्मणोवाक्योत्थज्ञानेनाज्ञाननिवृत्त्यामुक्तिरुक्ता॥ तस्यसर्वान्तरत्वेननिरतिशयसूक्ष्मत्वंव्यापित्वंचयथावदवगमयितुमत्रसूत्रितमुपपादयि
तुंप्रकरणांतरमारभते सूक्ष्मतेत्यादिना॥ गंधशब्दः पृथिवीशब्दार्थः पृथिव्यवादिलक्षणात्कार्यात्पूर्वस्मात्पूर्वस्मात्पूर्वस्मादुत्तरोत्तरकारणतया
२४ स्थितेषुप्रत्यगात्मावसानेषुसर्वान्तरात्मपर्यन्तेषुपदार्थेषुयथाक्रमंपूर्वपूर्वप्रहाणतः कार्यकारणयोर्हेनसूक्ष्मताव्यापिताचविज्ञातव्याकार्यकारणान्व
यव्यतिरेकालोचनयासंभावनीयेइत्यर्थः कार्येषुविद्यमानमपिकारणस्वरूपंतन्नत्कार्याकारनिरोहितंतयानस्वरूपेणावभासतेइतिसूक्ष्मसुक्ष्म
तेनपुनः कार्यपरिमाणान्नपरिमाणयोगान्नाप्यसकलस्वविकारानुगतस्यैवोपादानकारणत्वात्कार्यापेक्षयाधिकदेशवृत्तित्वेनव्याप्तित्वंचकार

सूक्ष्मताव्यापितेह्येवंगंधादेरुत्तरोत्तरं॥ प्रत्यगात्मावसानेषुपूर्वपूर्वप्रहाणतः॥१॥

तास्यंतथाहिचतुर्विधभूतग्रामोयोदानरूपापृथिवीतावत्तभूतग्रामेषुगृह्यमाणोषुगृह्यतेतत्रतत्रतद्रूपप्रत्ययव्यवहारादर्शनाल्लोकस्य
अनेकदेहेष्याप्यसूक्ष्मातद्व्याप्तदेशवर्त्तित्वाद्व्यापिकाचनचतत्कार्योपादानभूताः पृथिव्यंशाभिन्ना इतिनोपादानस्यव्यापकत्तेनिवाच्यंका
र्यकारभेदव्यतिरेकेणापिस्वरूपभेदेप्रमाणानिरूपणादेन्यथातुटाकोंतस्यमुदविमितत्कुसूलस्पगृहांगणादेशमृदात्मनाविलयाभाव राम २४
प्रसंगादुपादानारम्भत्रकार्यत्वया॥ ॥ ॥

न

उपपत्तेस्तस्मात्त्वकार्यपेक्षया पृथिवीतावत्सूक्ष्मा व्यापिका च सिद्धा॥ तथाद्भिर्व्याप्ता पृथिवी न घटपांशुरूपाश्री न्नत्सममहत्त्वततापृथिव्यवदिति
श्रुतो जलपरिणामविशेषस्य शरशब्दवाच्यस्य दधिमेउकारस्य पृथिव्यात्मत्वश्रवणात्वेदप्रस्रवणादेःपर्वताग्रशिलायामेतर्भमोच सर्वत्रोपलम्भा
तरसस्य च सलिलासाधारणगुणस्य पृथिव्यां सर्वत्रोपलम्भात्तस्यैकत्वेपि कट्तीक्ष्णत्वादिभेदः परिणामविशेषोपाधिनिवंधन इति॥ तस्माज्ज
लव्याप्ता पृथिवी सपरिणामेति जलं पृथिव्या व्यापकं सूक्ष्मं च प्रागुक्तयुक्त्या सिद्धं॥ तथा स पृथिवीजलं तेजसा स्वकारणेन व्याप्तं सर्वत्रोष्मोप
लम्भात्॥ तथा यो गोलकादौ सूर्यकिरणेषु चोदकस्पर्शतयदर्शनात्॥ तथा चैव तेजसो जलाद्व्यापकत्वं सूक्ष्मत्वं च प्रसिद्धं॥ तदपि वायुना
ग्रस्तं यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेतीति श्रुतेः प्राणशब्दवाच्ये वायौ लयश्रवणात्तज्ज्वालारूपस्य
च वह्नेर्वायुवशी न प्रवृत्तिनिवृत्तिदर्शनाच्च वायुश्चाकाशेन ग्रस्त इति प्रसिद्धमेवैतत्॥ सूक्ष्मत्वं तु व्याख्यातमेव सर्वत्रैतत्सर्वं सन्नास्तू
र्तिमत्त्वा व्याप्नमेवानुभूयत इति स च्छिन्नात्ते सर्वस्योपादानेन तस्य चार्थान्तरेणानुगमादर्शनात्त्रिरूपादानकत्वे सिद्धे निरपेक्ष व्यापक
त्वं प्रागुक्तपरिणामतः पृथक् किमपि वस्तु विद्यत इति तस्य परमसूक्ष्मता व्याप्तित्वे निष्ठितप्तसो हमसंगच्छ पृष्ठा हुया न्येति सर्वाभाव
पेदितिनान्यथा १

यानिरतिशयस्सूक्ष्मत्वं न सिध्यति। तद्ग्रे न सच्छिन्नमात्रेण सर्वस्य
इत्यपरात्रोर्थे सा चान्न

ननु नैतावतात्मनश्चक्ररूपत्वज्ञानसिद्धिरध्यात्माधिदैवतयोः पृथिव्यादेर्भेदेन प्रथमानत्वादित्यत आह शारीरेति॥ यावद्व्याप्ता पृथिवी प्रमाणतः प
२५ रिमाणतो भवति तावत्तावत्प्रमाणा शारीरा पृथिवी ज्ञेयेति सर्वत्र॥ तथाऽवादीनि चत्वारि भूतानि कात्स्न्येन निरवशेषतया तावत्तावत्प्रमाणानि ज्ञेया
नि यावच्छरीरं व्याप्य पृथिवीति योजना॥ एतदुक्तं भवति अध्यात्माधिभूताधिदैवात्मना विभक्तानां पृथिव्यादीनामेकात्म्ये न विज्ञाते तत्त्वादेकत्व
स्येन प्रविलापनोपपत्तेः॥ सर्वत्र प्रसक्तत्वानुगमात्प्रत्यगात्मावसानमेवाध्यात्मादिरूपं तेन व्याप्तं न ततः पृथगस्तीति प्रसक्तं त्वेवधार्यमाणे
वाह्याध्यात्मिकादिभेदस्फूर्तेरनवकाशात्प्रत्यगात्मब्रह्मतावन्मात्रमेव सर्वमवशिष्यत इति भवेदेव प्रागुक्तात्मतत्त्वज्ञानसिद्धिरिति॥२॥

शारीरा पृथिवी तावद्यावद्व्याप्ता प्रमाणतः॥ अवादीनि च तत्त्वानि तावंतीयानि कृत्स्नशः॥२॥
वाय्वादीनां यथोत्पत्तेः पूर्वं खं सर्वगं तथा॥ अहमेकः सदा सर्वश्चिन्मात्रः सर्वगो ध्रुवः॥३॥

नन्वेवं पराग्धर्मस्यासत्त्वे कथमात्मनः प्रत्यक्त्वं सर्वगतत्वमित्याद्युपपद्येत तस्य पराचीनविकारापेक्षत्वादतः कथं पराचो प्रत्य राम
गात्मावसानत्वमित्याशंक्य चिन्मात्रस्वरूपस्यैवाप्युर्व्यादिलक्षणस्य प्रत्यगात्मादिशब्दैर्लक्षितत्वात्तस्य मानादशायामारोपितपराग्ध २५
र्मेषामपि स्वरूपस्यामानपेक्षत्वाद्युक्तं सर्वस्य प्रत्यगात्मावसानत्वावधारणमिति दृष्टान्तेनोपपादयति वाय्वादीनामिति स्पष्टार्थः॥३॥

ननुकथमाकाशवदेकस्यैवात्मासर्वात्माभवेत्तब्रह्मादिभेदेनात्मनामनेकत्वस्यविभाव्यमानत्वान्नथाचैतन्यमात्रत्वंचानुपपन्नंरागादिदोषसं
सर्गोपलब्धेरित्याशंक्याह ब्रह्माद्याइति॥ ममैवविदात्मनः सर्वप्राणिनः स्फुरे शरीरभूताः स्फूर्तानिर्शीतानाइत्यर्थः॥ तथाकामक्रोधादयोदोषाआ
त्मनोमेनस्वाभाविकाव्यभिचारित्वात्परतोपितेनसंभवंतीत्याह जायेरन्मेकुतोन्यतइति॥ अन्यस्याभावादेवेत्यर्थः॥४॥ प्रत्यगात्मनो निर्दोषत्वम

ब्रह्माद्याःस्थावरांतायेप्राणिनोममपूःस्मृताः॥ कामक्रोधादयोदोषाजायेरन्मेकुतोन्यतः॥४॥
भूतदोषैःसदास्पृष्टं सर्वभूतस्थमीश्वरं॥ नीलत्वोमयथाबालोदुष्टंमोवीक्षतेजनः॥ ५

सिद्धंसंसारदोषस्यप्रत्यक्षत्वादित्याशंक्याकाशकालुष्यप्रत्यक्षवदात्मनिदोषदृष्टेर्भ्रमत्वान्मैवमित्याह भूतदोषैरिति अस्पृष्टमितिच्छि
दः सर्वभूतेषुस्थितस्यापितद्दोषैरस्पृष्टत्वमीश्वरत्वादिति हेत्वर्थविशेषणमीश्वरमिति सर्वस्यशितारंकारणमितियावत्तन्नहिकारणं
कार्यधर्मैः संस्पृश्यतइत्यर्थः स्पष्टमन्यत॥५॥

जेद्दमंतरेणस्वरूपतो ४

यदुक्तं ब्रह्माद्याः स्थावरान्ताः प्राणिनः एकस्यात्मनः शरीरभूताः इति तत्कथमित्यत आह ॥ मच्चैतन्येति ॥ सर्वज्ञस्य सर्वावभासकस्यात एव विपा
२६ प्मनो दृश्यदोषसंसर्गरहितस्य ममात्मनः सर्वप्राणिनः पूः शरीरं कुतः सर्वप्राणिधियो सदा मच्चैतन्यावभास्यत्वादिति योजना यो वं विज्ञा
नमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इति श्रुतेः बुद्ध्यन्तः साक्षितया प्रकाशमानस्य चैतन्यज्योतिष एव सर्वप्राणिधीव्याप्त्यावगमात्तस्य च बुद्धितत्स्था
भासभेदानिरूपणात् सवितुरिवोदपात्रतत्स्थाभासाव्यतिरेकेतो निसिद्धमेकस्यात्मनः सर्वाणि भूतानि शरीरमिति भावः ॥ तथा च श्रुतिः
सर्वाणि भूता निशरीरंयः ४ यस्य सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इति ॥ ६ ॥ तर्हि भास्यप्राणितद्बुद्धीनां सत्त्वाद्द्वैतक्षतिरिति तत्राह जनिमदिति य

मच्चैतन्यावभास्यत्वात्सर्वप्राणिधियां सदा । पूर्मम प्राणिनः सर्वे सर्वज्ञस्य विपाप्मनः ॥ ६
जनिमद्ज्ञानविज्ञेयं स्वप्नवद्दृश्यते नित्ये निर्विषये ज्ञाने तस्माद्द्वैतं न विद्यते ॥ ७

त१

जनिमद्यद्ज्ञानविज्ञेयं यत्कार्यं जडं च तन्मिथ्येत्युक्ते यथा स्वप्नज्ञानेन तथा जाग्रदपि कार्यं दृश्यं चेति मिथ्येति द्वैतं न विद्यते यस्मात्तस्मा
त् ज्ञेयस्यासत्त्वात् ज्ञानं नित्यं सदा निर्विषयं विषयनिरूप्यं न भवति यद्वा नित्यमविनाशि सर्वविनाशसाक्षित्वादिति योजना न ह्याधारो वि राम
ना द्वैतं न पराभार्थमद्वैतं विहन्यते न खल्वारोपितेन तोयादिना तदाधारभूम्यादिसद्वितीयं दृष्टमिति भावः ॥ ॥ ७ २६

त२

स्वरूपज्ञानस्य निर्विषयत्वं नित्यत्वं चोक्तं ग्रन्थोपपादयति तान्वर्तन्तीति सुषुप्ते त्वन्यस्य ज्ञेयस्यासत्त्वप्रदर्शनपूर्वकं तान्वर्तन्ते नो ज्ञातिः स्व-
रूपभूता ज्ञप्तिर्निर्विषयेति स्फुटमेवोच्यते हीत्यर्थः तथा च श्रुतिः यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु त-
द्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदित्यादिका यद्वा विहसुषुप्ते निर्विषयं ज्ञानं विषयाभावात् स्वरूपतो नाशशीलत्वाभावाच्च नित्यं प्रकृतिसिद्धेन
यथाप्यवस्थान्तरे सविषयमुपलभ्यत इति ज्ञानवर्त्तिनिरविद्यास्वादित्यत आह जाग्रदिति यतः प्रकृतिसिद्धं नित्यं निर्विषयं ज्ञानमतः कारणान्तरजा-
ग्रदादिनिर्विषयदर्शनात्मिकाऽविद्याधर्मिरेवात्मनो निर्विकारत्वाज्ज्ञानकर्तृत्वायोगादन्तःकरणस्य च जडत्वादेव ज्ञानाश्रयत्वानुपपत्तेरध्यस्तमे-

तान्वर्तन्ते हि नित्योऽज्ञः सुषुप्ते त्वन्यसत्त्वतः ॥ जाग्रज्ज्ञातिस्त्वविद्यातस्तद्ग्राह्यं चासदिष्यताम् ८

वसविषयं ज्ञानं तद्ग्राह्यं च विषयज्ञानमसदपरमार्थमिष्यतां स्वीक्रियतामित्यर्थः ॥ जागरितादौ विषयाकारबुद्धिवृत्तीनां स्फुरणाद्बुद्धि-
तत्वात्सर्ववृत्त्यनुस्यूतिस्थितिविनाशसाक्षितया स्फुरणस्यैकस्य नित्यस्याव्ययस्यावश्यमभ्युपगन्तव्यत्वात्तत्राध्यस्यमानस्यैवेतरस्यानित्यमेव ॥ त-
थाविषयाणामुत्पत्तिसमकालमेव स्फुरणाद्विषयव्यभिचारेऽपि स्फुरणाव्यभिचारात्तस्य विषयानिरूप्यत्वान्निर्विषयत्वं च सिद्धमिति भावः ॥ ८

२७ नत्वात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्यैवात्मनो दर्शनादिकर्मत्वोक्तेर्दृश्यत्वाद्दर्शनात्सुजंगादिवदसत्वप्राप्तिरित्याशं
क्याशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यत्तन वक्तुं शक्यं नैनाभिवाचा नान्यैर्देवैस्तपसा कर्मणा वेत्यादिश्रुतिविरोधाद्रूपादिही
नस्य दर्शनाद्यविषयत्वात् द्रष्टव्य इत्यादिश्रुतिरर्थिं नतत्वेन योगात् दर्शनाद्यर्हत्वोपदेशमुखेनानात्मप्रवणतात्याजनार्थेत्याह रूपवत्वादी

रूपवत्वाद्यसत्वान्न दृश्यादेः कर्मता यथा ॥ एवं विज्ञानकर्मत्वं
भूम्नो नास्तीति गम्यते ९ इति सूक्ष्मताप्रकरणं नवमं ॥ ॥

ति यथा द्रष्टव्य इत्यादिवशान्न ज्ञानकर्मत्वमेवं यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेत्यत्रापि प्रागुपन्यस्तश्रुतिवि
रोधाद्यत्रान्यत्र पश्यत्यात्मानमेव पश्यतीति स्वात्मदर्शनविधिपरत्वकल्पनायोगाद्भूम्नो ब्रह्मणो विज्ञानकर्मत्वेनास्तीति गम्यते निष्ठीय राम
ते इत्यर्थः सूक्ष्मताव्यापिता प्रकरणं नवमं विवृतं ॥ ॥ २७

इदानीं पूर्वप्रकरणोयुक्त्या व्यवस्थापितमात्मनो निर्विषयज्ञानस्वभावं तं स्वानुभवामि न येन प्रकटयन्न विषयत्वेनैवात्मज्ञानं भवतीति द्र
ढयितुं प्रकरणांतरमारभते दृशिस्वरूपमिति सकृद्विभातमेकं देवविस्फुरितं सदैव स्पष्टं भासमानमिति यावत् यदेवंविधमद्वयं ब्रह्म तदे
वाहं सततं भवामि अतो विमुक्तः ॐमित्यभ्यनुज्ञार्थं ॐकारः उक्तं स्वरूपमोंकारद्वारा मुमुक्षुणा बुद्ध्याभिव्यक्तं भवतीति सूचयितुं ॐकार

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं अलेप
कं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ॐ १ ॥ ।

निर्देशः १ ननु नाकाशवदलेपकत्वं दृशेः संगाद्भवति दृश्यसंबंधाद्धि बुद्धिविक्रियादिदोषसंभवादित्याशंक्य दृशेरात्मस्वरू
पत्वान्न सर्वनित्यशुद्धत्वादेः श्रुत्यैव निर्धारणान्नैवमित्यभिप्रेत्य श्रुतिसिद्धमर्थं प्रकटयति दृशिस्तु शुद्ध इति ॥ अहं तु दृशिः ज्ञा
नस्वरूप इत्यन्वयः ॥ ॥ ॥

२८ अतः परमार्थतः शुद्धोऽशुद्ध्यादेरज्ञाननिबंधनत्वात्तस्य चाभासत्वादितिभावः। शुद्धमपापविद्धमितिमंत्रवर्णात्‌ यतश्चाविक्रियात्मको विक्रिया
त्मकात्प्राणादेरन्योऽप्राणो ह्यमनाः शुभ्रो ह्यस्थूलमनण्वह्रस्वमदीर्घमित्यादिश्रुतेरतोऽपि शुद्ध इत्यर्थः। न तदश्नाति किंचन न तदश्नाति कश्च
नेति श्रुते नात्मनो विषयसंसर्ग इत्याह न मेऽस्तीति स्वभावतः परमार्थतः। अनेन विक्रियाहेतुविशेषाभावादप्यविक्रिय इत्युक्तं भवति। विषया
याभावेनाद्वयात्मत्वे भूमवाक्यशेषमर्थतः पठति पुरस्तिरश्चेति। स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति स्वरूपावस्थान

दृशिस्त्वं शुद्धोऽहमविक्रियात्मको न मेऽस्ति कश्चिद्विषयः स्वभावतः पु
रस्तिरश्चोर्ध्वमधश्च सर्वतः संपूर्णभूमा त्वज आत्मनि स्थितः २

मनन्याधीनमुपपन्नस्य तदुपपादनायेदंकारास्पदं सर्वं द्रष्ट्रादिविभागेनाधरोत्तरादिविभेदेन चोपलभ्यमानं भूमैवेति श्रुतिप्रतिपाद्याहं
कारास्पदस्य देहादिबुद्धिपर्यंतस्य तद्भिन्नस्य भूम्नो भेद इति शंकायामहंबुद्धिग्राह्यमपि भूमैवेति मध्ये निर्दिशपदेमनिदमात्मकस्य स
र्वस्य भूम्नोऽन्यत्वाभावे भेदकाभावात्प्रत्यगात्मैव भूमेत्यात्मैवेदं सर्वमित्यंते न संपूर्णभूमा छांदोग्ये परिशिष्ट इत्यर्थः। अजोऽहमावि राम
र्भावविवर्जितोऽयत आत्मनि स्वे महिम्नि स्थितो नान्याधीन इत्यर्थः २ २८

आत्मनो जन्मजरादिविक्रियाभावेन हरूः स्याद्वयस्वाभाव्यप्रतिपादनपराः श्रुतीः स्वरूपतोर्थतश्च पठत्यजोमर इति। तथा च श्रुतयः अ-
जो नित्यः शाश्वतोयं पुराणो स वा एष महानज आत्मा ऽजरो ऽमरोऽमृतो ऽभयो ब्रह्मेति अत्रायं पुरुषः स्वयंज्योतिः तद्देवा ज्योतिषां ज्योतिर्नित्यं वि-
भुं सर्वगतं सुसूक्ष्मं एको देवः एकमेवाद्वितीयमिति। तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमित्यादि श्रुत्यर्थमाह नकारणं कार्यमिति॥ नि-

अजोमरश्चैव तथाजरोऽमृतः स्वयंप्रभः सर्वगतोहमद्वयः नकारणं
कार्यमतीव निर्मलः सदैकतृप्तश्च ततो विमुक्त ओं ॥ ३ ॥ ॥

र्मलो निरंजनो निरंजनः परमं साम्यमुपैतीति श्रुतेः एकतृप्तः एकेन निजानंदेनैव तृप्त इत्यर्थः। आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन आ-
नंदरूपममृतं यद्विभातीत्यादिश्रुतेः। विमुक्तश्च विमुच्यत इति श्रुतिमाश्रित्याह ततो विमुक्त इति। यत एवं लक्षणास्ततो विमुक्त एवम-
दिति पदं सर्वत्रानुषंजनार्थं। यदाचार्येणोक्तं मम स्वरूपं तत्तथैवेति शिष्यानुमन्यते ओं मिति पदेनेत्यर्थः ॥ ३ ॥ ॥

नन्वस्थानत्रयेप्यथान्ययाप्रथमानस्यकथमविक्रियात्मकत्वमित्यतआह।सुषुप्तेति॥सुषुप्तश्चासौजाग्रच्चसचासौस्वपंश्चसुषुप्तजाग्रत्स्वपन्त
स्यसुषुप्तजाग्रत्स्वपतोमेममस्वमिवात्मीयमिवेहव्यवहारेकिंचिद्दर्शनंनास्तिस्वमिववस्तुरूपभूतमिवेतिवाकिंतुमोहनमविवेकाविद्याध्यारोपितंजाग्रद्धे घा
द्यादिदर्शनमितियोजना।तत्रहेतुमाहस्वतश्चेति।तेषांजाग्रत्स्वप्नसुषुप्तिदर्शनानांजाग्रदाद्यवस्थारूपाणांवास्वतश्चपरतो[redacted]प्यसत्वतोऽ
सत्वादित्यन्वययोजना।नहितेषांस्वतोन्यनिरपेक्षंसत्वंसंभाव्यतेस्फुरणांचआगमापायित्वेनरज्जुसर्पवदारोपितत्वनिश्चयात्तथापरतोपिनसत्वंस्फुर

सुषुप्तजाग्रत्स्वपतश्चदर्शनंनमेस्तिकिंचित्स्वमिवेहमोहनं।स्वतश्च
तेषांपरतोप्यसत्वतस्तुरीयएवास्मिसदाहमद्वयः ४ ॥ ।

णांचसंभाव्यतेपरंचैतन्यंस्यान्नहितेनात्मनासत्वादिकमेषांसंभवतिघटपक्वपरागभावेनविरुद्धस्वभावयोस्तादात्म्यानुपपत्तेस्तत्कल्पनायाश्चभ्रांति
मात्रत्वादित्यर्थः।प्राज्ञस्तैजसोविश्वइत्येतेतन्नदवस्थावत्तेनभासमानानममस्वरूपमितिभावः।तर्हिकिंस्वरूपआत्मेतितदाहतुरीयएवा
स्मीति।विश्वादित्रयापेक्षयापरतोगम्यमानत्वाच्चतुर्थइत्यर्थः।इतरस्यलक्षणं।सदाहमितिसर्वावस्थास्वित्यर्थः।विश्वादीनांस्वस्वा
व।स्थामात्रदृष्टृत्वादयंततोव्यतिरिक्तःस्थूलसूक्ष्मक्रमेणविविच्याविषयादशायांविश्वादिस्थानत्रयोपाहेनावसीयमानत्वात्तुरीय राम
इत्युच्यतेनपुनर्वस्तुतस्तुरीयत्वमस्तीतिद्योतयन्नद्वयइतिनिर्विशेषणएवसदाहमस्मीत्यर्थः ४ ॥ ॥ ॥

कथमात्मनो निर्विशेषत्वे शरीरादिसंबंधस्य प्रत्यक्षत्वादित्यत आह शरीरेति शरीरादिसंततेर्न्नमदात्मत्वं मदीयत्वं वा परमार्थतोस्तीत्यर्थः तत्र हेतुर्मम नि
र्विकारत्वादिति न ह्यविक्रियस्य वस्तुनः आगमापायि शरीराद्यात्मना परिणमते संसज्यते वा येन तत्स्वरूपता तद्धर्मता वा भवेदित्यर्थः हेत्वंतरमाह असत्वहेतोश्च त
थैव संततेरिति कुतोऽसत्वमित्यत आह असत्वमस्या इति स्वपतः स्वप्नावस्थायां यथा दृश्यं मिथ्या तथास्याः संततेर्दृश्यत्वादेवासत्वमित्यर्थः हिशब्दो स्वप्न
दृश्यस्य मिथ्यात्वप्रसिद्धिद्योतनार्थः ५ शरीरादिसंततेर्दृश्यत्वेन चेन्मिथ्यात्वं तर्हि शुद्धत्वाविक्रियत्वादेरपि दृश्यत्वान्मिथ्यात्वं किं न स्यादित्यत आह इदं
त्विति मम विक्रिया नास्ति न मे विकारहेतुरप्यस्ति ततः पूर्वं निरूपितादद्वयात्तद्वयाभावाद्धेतोः स्वतः परतो वा ममात्मनो विक्रिया नास्तीति यदिदं तत्स

शरीरबुद्धींद्रियदुःखसंततेर्न मे न चाहं मम निर्विकारतः असत्वहेतोश्च तथैव संततेरसत्वमस्याः स्वपतो हि दृश्यवत् ५
इदं तु सत्यं मम नास्ति विक्रिया विकारहेतुर्न हि मेऽद्वयत्वतः न पुण्यपापेन च मोक्षबंधने न चास्ति वर्णाश्रमताऽशरीरतः ६

द्यु

त्यमित्यर्थः तुशब्दः पांकांव्याहत्यर्थः अविक्रियत्वादिनाविक्रियाभावाद्युपलक्षितस्वरूपस्याभिप्रेतत्वान्नास्मिन्दृश्यहेत्वासिद्धेर्न शंकावकाश इत्यर्थ
ः कर्मवान्तत्फलवान्दुःखसेवावान्मदिसाधनं वा विक्रियादिहेतुर्भविष्यतीति कुतोद्वयत्वमित्याशंक्याह न पुण्येति पुण्यादिनेति प्रतिज्ञा यो हेतु
रशरीरत इति अशरीरत्वं तु पूर्वश्लोके प्रतिपादितमेवेत्यर्थः ६

ननु यद्यपि शरीरोपादानविनाशधर्मकत्वेन चात्मनः शरीरवत्त्वाभावः स्तथापि शरीरेणास्तिसंबंधउपलभ्योपलंभकभावलक्षण इतिकथमशरीरतेत्याशंक्याह नैताव
ता सशरीरत्वेन कर्मादियोगित्वमभिप्रेत्य गुणागुणादिसंबंधवैधुर्यमुक्तमुपपादयत्यनादित इति यत्कर्मसमवायितत्सादिमदृष्टं यथारब्धशरीरादि नचपरमात्मा
३० मनसोरनैकांतो मनसउत्पत्तिमत्त्वात्परपरिकल्पितपरमाण्वादिनगीकाराच्च तथा यत्कर्मसमवायितत्सगुणं दृष्टं यथोक्तमेवोदाहरणं तथा च सगुणत्वं सादित्वं
च व्यापकत्वगात्मनो व्यावर्त्तमानं तत्सक्रियावत्त्वं स्वव्याप्यमादाय निवर्त्तत इति भावः कर्मगुणादिलक्षणं फलं तत्साध्यं सुखदुःखादिरूपं फलं च न मेस्ती

अनादितो निर्गुणतो न कर्म मे फलं च तस्मात्परमोहमद्वयः यथा
नभः सर्वगतं न लिप्यते तथाप्यहं देहगतोपि सूक्ष्मतः ७

त्यर्थः तस्मादहं परमउत्तमः संसारिभ्यो विलक्षणात अद्वयो निर्विशेषः क्रियावत्वाभावान्नत्साध्यगुणाद्यसंभवइति विलक्षणत्वमुपपादय
त्ति यथेति देहगतो देहे व्याप्यस्थितोप्युपलभ्यमानोपीत्यर्थः सूक्ष्मतोऽमूर्त्तत्वादित्यर्थः तथा चाह भगवान् अनादित्वान्निर्गुणत्वात्परमात्मा राम
यमव्ययः शरीरस्थोपि कौंतेय न करोति न लिप्यते यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यत इति ७ ३०

नुपपत्तेश्चाधिष्ठानानां देहादीनां वैषम्यदर्शनात्तज्जीवोपलभ्यमानस्यात्मनोपि तत्कृतवैषम्यसंभवात्कुतः परमात्मत्वं परिपूर्णता चेत्याशंक्य तारतम्यप्रतिभासो
ऽविद्याविलसितो न परमार्थत इत्याह सदा चेति ईश्वर इत्यनेनोपाधिवश्यत्वाभावं सूचयति अतो न मे देहादिकृतं वैषम्यमित्यर्थः ईश्वर इत्यनेनैतस्ये
शितव्यापेक्षत्वात्सद्वितीयत्वशंका स्यात्तत्र आह क्षराक्षराभ्यामिति अथवेश्वरत्वमेव साधयति क्षराक्षराभ्यामिति हि यस्मात्क्षराक्षराभ्यां परमोथ तस्मादहमुत्तम
इत्यन्वयः क्षरति नश्यतीति क्षरः कार्यवर्गः न क्षरतीत्यक्षरं कारणं मायाशबलितं चिद्रूपं ताभ्यां परमो व्यतिरिक्तः कार्यकारणादिभेदकल्पनाधिष्ठान
त इत्यत उत्तमः पुरुषोत्तम इत्यर्थः यत उत्तमोतः परे धाम्यात्मनानंतत्वे स्वरूपमस्मिन्निति परात्मतत्वप्रग्रहमेव सर्वात्मा चेत्यर्थः एवं विषयेदात्माकर्षं

सदा च भूतेषु समोहमीश्वरः क्षराक्षराभ्यां परमो ह्यथोत्तमः परा
त्मतत्वश्च तथाद्वयोपि सन्न विपर्ययेणाभिमतस्त्वविद्यया ८

तर्हि तत्र विपरीतरूपप्रतिभास इत्यत आह तथाद्वयोपि सन्निति उक्तो न रमे तदविद्याविलसितमेव विपर्यय इत्यर्थः तथा च भगवतोक्तं
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य
बिभर्त्यव्यय ईश्वरः यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति ८

तर्हि किमविद्यासंबंधोवर्त्तते नेत्याह अविद्येति अविद्याकृत्याज्ञानं भावनातत्कृतो देहाद्यभिमानः कर्माणि तत्पूर्वकाणि पुण्यपापलक्षणानि तैर्वि
विक्तस्तत्संस्पर्शशून्यः ॥ कुतो यस्माद्व्यवधिः व्यवधिर्व्यवधानं वस्त्वंतरकृतो व्यवच्छेदस्तद्रहितोऽव्यवधिः अयमाशयः चित्प्रकाशस्यावरणात्मेतिप्र
३१ तिस्मृतीतिहासपुराणन्यायसिद्धं अविद्यात्तडाऽप्रकाशात्मिका अतस्तयोर्विरुद्धस्वभावयोः परमार्थतः संबंधो दुर्घट एवेति स्थितेऽनवच्छिन्नचैतन्यमा
त्रंतावन्नाविद्याश्रयः उपपद्यते तत्र घासत्यणुमात्रस्यापि प्रकाशानुपपत्तिप्रसंगात् नापि केनचिदवच्छिन्नभागविशेषमविद्याव्यतिरिक्तस्य तत्कल्प्य।

अविद्ययाभावनयाच कर्मभिर्विविक्त आत्माव्यवधिः स निर्मलः दृगादि
शक्तिप्रचितोहमद्वयः स्थितः स्वरूपेणगगनं यथाऽच्युत ६

नायाअनिर्वंधनत्वात्तस्मादविद्यातिरिक्तव्यवधानाभावादव्यवधित्वे सति द्विवोधपरिकल्पितां घकारवदात्मन्यविद्यादिकल्पनमिति अतस्सवह
निर्मलः सर्वाशंकितदोषरहित इत्यर्थः एवंविध आत्मनि कथं द्रष्टा श्रोता मंता बोद्धेत्यादिव्यवहार इत्याशंक्याविद्याध्यस्तांतः करणपरिणाम राम
रूपदृगादिशक्तिसंबंधादेवद्रष्टृत्वाद्युपचयं प्रतिभातीन परमार्थत इत्याह दृगादीति स्पष्टमन्यत् ६ ३१

एवंविधात्मतत्वपरिज्ञाने सति कैवल्यं फलतीत्याहाहं परं ब्रह्मेति अहं परं ब्रह्मेति निश्चयेनात्मनि दृढज्ञानं यस्य स तथोक्तः संभूयः पुनर्न जायते
शरीरवान्न भवति इति श्रुतेर्वचो विद्यत इति शेषः तथा च श्रुतिः स तु तत्पदमाप्नोति यस्माद्भूयो न जायते पुरुषान्न परं किंचित्सा काष्ठा सा पराग

अहं परं ब्रह्म विनिश्चयात्मदृढश्च न जायते भूय इति श्रुतेर्वचः नचै
व बीजे त्वसति प्रजायते फलं न जन्मास्ति ततो हि मोहहा १०

तिः रिति अथ स सोऽभयं गतो भवति ब्रह्म वेद ब्रह्मैव भवतीति च श्रुतिसिद्धेर्थे युक्तिमप्याह नचैवेति उक्तं सामान्यन्यायं प्रकृते योजयति
न जन्मास्तीति हि यस्माद् मोहहता प्रागुक्तवर्त्मना मोहराहित्यं ततो हेतोर्न जन्मास्तीति योजना मोहपदवाच्याविद्यामूलत्वाज्जन्मादिविका
रस्य तदभावेऽभाव एवेत्यर्थः १०

इत्येवं तत्त्वाद् अस्यैवं जनस्य जन्मादियोगिनोऽस्य नाशश्च जन्मतिरोहितात्मस्वरूपस्य भवमरणादि शोकमोहः

मोहकार्यत्वात्संसारस्य मोहनिवृत्त्या निवृत्तिरेवेत्युक्तं तत्र किमात्मकं मोहकार्यमित्यपेक्षायां तदाहममेदमिति प्रथमं देहद्वये हंकारस्ततस्तद्बाह्यार्थ
कल्पनमिदमिति तत्र शोभनाशोभनाद्यध्यासः इदममिति ततो ममेदं तवेदं शत्रुतथा न ममेदमित्यादि कल्पना तथा परोऽप्येवं नैवमन्यथा वा नास्ति वा अस्ति
 वा इति विमूढता मम परस्य वा हंभावस्य या एवं विधा कल्पना सा सदा समे ब्रह्मरूपद्वये शिवे परमानंदरूपेण च नास्त्येवेत्यर्थः ॥१॥ एतावत्त आद्ये
एवं जनस्य जन्मादियोगिनोऽस्य जन्मनाशश्च तिरोहितात्मस्वरूपं विविधस्य संसारस्यात्मतत्त्वज्ञानेन तदज्ञाननिवृत्त्यात्मा निवृत्तिरुक्ता स्फुटयति यदद्वयमिति

ममेदमित्यं च तथेदमीदृशं तथाहमेवं न परोऽपि वान्यथा विमूढतैवास्य जनस्य कल्पना सदा समे ब्रह्मणि चाद्वये
शिवे ॥१॥ यदद्वयं ज्ञानमतीव निर्मलं महात्मनो तत्र न शोकमोहता तयोरभावे न हि कर्मजन्म वा भवेदयं वेदविदां
विनिश्चयः ॥२॥

अद्वयमद्वयात्माकारमतीव निर्मलमसंभावनाविपरीतभावनादिप्रतिबंधरहितं यत्तज्ज्ञानं तत्र तस्मिन्सति महात्मनो ब्रह्मभूतो न शोकमोहता
संसारित्वं नास्त्येवेत्यर्थः तथा च मंत्रः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति तयोः शोकमोहयोरभावे तदुपलक्षितस्य तत्कार्यरागस्य
ज्ञानस्य निवृत्तौ विज्ञाभावे फलाभावस्याभावेन जन्मादि पुनर्न हि भवेदिति वेदार्थविदां विनिश्चय इत्यर्थः तथा च श्रुतिः भिद्यते हृदयग्रंथिः छिद्यं
ते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥२॥

त

एवमुक्तस्यात्मविदः स्वरूपमाह सुषुप्तवदिति जाग्रति विश्वावस्थायां द्वयं द्वैतप्रपंचं प्राग्वासनावशात्पश्यन्नपि सुप्तिवन्नापि विशेषतो न पश्यति किंतु
सुषुप्तवत्प्रविलीनद्वयं एव प्रत्यगात्मरूपेणैव पश्यतीति योजना तत्र हेतुरद्वयत्वादिति द्वैतस्य बाधितत्वादित्यर्थः तथा च यथा स्वं स्नानशौचभिक्षा
टनादि कुर्वन्नपि निर्विकारोऽकर्त्रात्मस्वभावाविर्भावात् य एवंविधः स आत्मविद्विद्वद्दशायामप्रसुतात्मयाथात्म्यदर्शनत्वाद्भूतविद्वा
सुनमोपमेव नान्यः शास्त्रार्थज्ञोपि यो व्यवहारकाले ज्ञातृत्वकर्तृत्वाद्यभिमानवानित्यर्थः इतिइत्थमिह वेदांतशास्त्रे विनिश्चयः १३ शा

सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयत्वतः तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः
१३ इतीदमुक्तं परमार्थदर्शनं मया हि वेदांतविनिश्चितं परं विमुच्यतेस्मिन्यदि निश्चितो भवेत् न लिप्यते व्योमवदेव कर्मभिः १४
इति दृशिप्रकरणं

स्वन्यायानुसारेण स्वानुभवं प्रदर्श्येदानीमस्मिन्दर्शने यदि निश्चितस्य कृतकृत्यता भवतीति दर्शयन्परानुग्रहाय प्रकरणनिर्माणप्रवृत्तिरिति
सूचयति इतीदमुक्तमिति वेदांतविनिश्चितमित्युक्तदर्शनस्य परमार्थविषयत्वप्रमाणमुक्तं व्योमवदेवेति विस्पष्टदृष्टांतपूरणार्थः १४
इति दृशिस्वरूपपरमार्थदर्शनप्रकरणं दशमं॥ ॥

ब्रह्मात्मैक्यज्ञानमात्रनिष्ठो मुच्यत इत्युक्तं तन्नोपपद्यते कर्मसाध्यत्वान्मुक्तेः कर्मसहितज्ञानसाध्यत्वाद्वा तथाज्ञानस्य वेदान्तविनिश्चयत्वमुक्तं तदपि सं
दिग्धमनुमानादिनाप्युपपत्तेरिति मामाशंक्योपरिहर्तुं प्रकरणान्तरमारभते ईक्षितृत्वमित्यादिना तत्रादौ ज्ञानादेव मुक्तिर्ज्ञानं च वेदान्तमहावा
३३ क्यादेव नानुमानादिनेत्येतत्साधयति अन्यत्वे सदसीति निवर्त्यत इतित्वेन तत्स्वच्छन्दत्वलक्षितं ब्रह्मैवासि न संसारीति वाक्योपदेशेनैव सत्त्वव्याप्यो ब्रह्म
णोन्यत्वे जीवस्य निवर्त्यत इत्यर्थः संसारिणो जीवस्याणुरूपस्य कथं तद्विपरीतब्रह्मत्वे संभाव्यत इत्यत आह ईक्षितृत्वमिति सर्वेषामेव जंतूनां प्रा
णिनां चिद्रूपमेवेक्षितृत्वं तत्स्वतः सिद्धं स्वाभाविकं रूपं चकारः शंकानिवृत्त्यर्थः कर्तृत्वभोक्तृत्वादेरपि स्वाभाविकत्वशंका न कार्या स्वरूपव्य

ईक्षितृत्वं स्वतः सिद्धं जंतूनां च ततोन्यथा अज्ञानादित्यतोन्यत्वे सदसीति निवर्त्यते १

भिचारादित्यर्थः कुतोज्ञानादेवान्यत्वनिवृत्तिरूपा मुक्तिरित्यत आह अज्ञानादित्यत इति इति यतोन्यथान्यत्वमज्ञाननिर्बंधनं न पर
मार्थोऽत इत्यर्थः अज्ञानकल्पितत्वाद्ब्रह्मविपरीतरूपत्वस्य स्वतश्चिन्मात्रस्वभावत्वाद् ज्ञाननिवृत्तिलक्षणत्वाच्च मोक्षस्य तस्य वत राम
त्वज्ञानमात्रापेक्षणात्तज्ज्ञानस्य च यथोक्तवाक्यादेवोत्पत्तेर्नमानांतरं साधनांतरं वापेक्ष्यत इति भावः १ ३३

कर्मणो मोक्षहेतुत्वकल्पनं ज्ञानसहायत्वेन नोपपद्यते श्रुतियुक्तिविरोधादित्याह एतावद्धीति एतावदरे खल्वमृतत्वमित्येतदमृतत्वसाधनमात्म
ज्ञानमेवेत्येतावच्छब्देनावधारयतीति श्रुतिः शास्त्रमुच्यते तत्तज्ज्ञानस्य किंचिदन्यच्च सहायभूतं नास्तीति ब्रुवत्सलिंगं ससाधनं कर्म बाधत इति
योजना अहंतात्मज्ञानादृष्टं कर्महेतुज्ञात्र्याद्यभिमानाभावे कुतः कर्म यत्तज्ज्ञानस्य मोक्षफले सहायभूतं भवेदिति भावः १ इदानीमीदृ

एतावद्ध्यमृतत्वं न किंचिदन्यत्सहायकं ज्ञानस्येति ब्रुवच्छास्त्रं सलिंगं कर्म बाधते २
सर्वेषां मनसो वृत्तमविशेषेणापश्यतः तस्य मे निर्विकारस्य विशेषः स्यात्कथंचन ३

तत्त्वमित्यत्रोक्तं स्वाभाविकं चिद्रूपत्वं प्रपंचयन् ज्ञानिनः कर्म न घटत इत्येतदुपपादयति सर्वेषामिति विशेषः कर्तृत्वादिलक्षणो
विहितकर्मसाधनज्ञात्र्याद्यभिमानलक्षणश्चेत्यर्थः कथंचनेत्याक्षेपार्थो न कथंचन मे विकारः स्यादित्यर्थः कुत इत्यत आह अवि
शेषेणेति अभिमानशून्यतया केवलसाक्षिमात्रेणापश्यत इत्यर्थः ३

कथं मनोवृत्तं पश्यत्यविशेषेणात्मेत्यपेक्षायां दृष्टान्तपूर्वकं तदुपपादयंश्चिदेकरसत्वमात्मनो निगमयति मनोवृत्तमिति स्वप्नदशायां स
वृत्तिकं मनश्च पश्यत्यात्मा यथा बाह्यविषयाभावात्तथा जाग्रति जागरणदशायां मनोवृत्तं मनःप्रचारं मनश्च तद्द्वयं पश्यतः कथं विशे
३४ षः स्यादिति पूर्वश्लोकेनान्वयः जाग्रद्दशायामपि विषयाकारवृत्तिमन्मनोव्यतिरेकेणात्मना किमप्युपलभ्यत इति भावः तर्ह्येवंविधं मनो

मनोवृत्तं मनश्चैव स्वप्नवज्जाग्रतीक्ष्यतां संप्र
सादे द्वयासत्वाच्चिन्मात्रः सर्वगोऽद्वयः ४

दर्शनमेव स्वाभाविको विशेष इत्यत आह संप्रसाद इति संप्रसादे सुषुप्तिदशायां द्वयस्य सवृत्तिकस्य मनसोऽसत्वात्तद्दर्शनम
त पि स्वाभाविकं न तु तद्द्वितीयमस्ति ततोऽन्यद्भिन्नं यत्स्पृश्येदिति भ्रान्तेः तथा चात्मा चिन्मात्रः सर्वगोऽपरिच्छिन्नोऽद्वयोवित्स इति राम
सिद्धमित्यर्थः ४ ३४

नुपपद्येवं तदावाद्याभ्यंतरद्वैतस्याभावस्त्वेनोक्तं स्यात् तन्नोपपद्यते प्रत्यक्षादिप्रमाणविरोधात् लौकिकवैदिकव्यवहारविलोपप्रसंगाच्चेति चे
न्नेत्याह स्वप्नइति यथा आबोधात्प्रबोधपर्यंतं स्वप्नसत्यो लौकिकवैदिकव्यवहारास्पदतयाऽवभासते तथैव जाग्रत्तज्जाग्रदवस्थायामपि
देहात्मत्वं प्रत्यक्षादेः प्रमाणात्त्वेव सर्वव्यवहारांगं स्यात् कियत्पर्यंतमित्यत आह आत्मवेदनादिति आ आत्मवेदनादिति पदच्छेदः आत्म
तत्त्वसाक्षात्कारात्प्रागेव सर्वो व्यवहारस्तस्मिन्सति व्यवहाराभावइष्ट एवेति भावः ५ अव्यवहार्यस्वरूपमाविष्करोति व्योमवदिति द्वाभ्यां चेताधि

स्वप्नसत्योपधाध्याऽबोधाद्देहात्मत्वं तथैव चा प्रत्यक्षादेः प्रमाणात्त्वं जाग्रत्स्यादात्मवेदनात् ५ व्यो
मवत्सर्वभूतस्थोऽभूतदोषैर्विवर्जितः साक्षी चेताऽगुणः शुद्धो ब्रह्मैवास्मीति केवलः ६ नाम
रूपक्रियाभ्योऽन्यो नित्यमुक्तस्वरूपवान् अहमात्मा परंब्रह्म चिन्मात्रोऽहं सदाद्वयः ७

रूपः साक्षीति भूतदोषराहित्ये हेतुः व्योमवत्सर्वभूतस्थ इत्यसंगत्वमुक्तं सर्वभूतेष्वहमाकारवृत्त्याविभिव्यक्त्यपेक्षया सर्वभूतस्थ इत्यु
च्यते एतच्चाहं मनुरभवं सूर्यश्चेतिवत्सर्वात्मत्वाभिनयाभिप्रायं द्रष्टव्यं शुद्धोऽमलान्तरहितः केवलोऽवस्थात्रयरहितः ब्रह्मैव पूर्णोऽस्मी
त्यर्थः ६ केवलत्वं व्यनक्ति नामरूपेति वाच्यवाचकव्यापारात्मकप्रपंचविहीनइत्यर्थः सुगममन्यत् ७

कथमद्वयत्वमात्मनः संगच्छते अहं ब्रह्मास्मीतिवदहं कर्त्तास्मीति चानुभवस्य प्रमाणमूलत्वादिति ज्ञानकर्मसमुच्चयवादिनो भेदाभेद
३५ मतानुसारिणस्तान्नत्रुत्सयन्नद्वैतात्ममतं द्रढयति अहं ब्रह्मास्मीति विरुद्धार्थप्रतिपादकत्वायोगाद्वाक्यस्य विरुद्धं तत्त्वमवगच्छतां क
र्मकांडात् ज्ञानकांडाच्च बहिर्मुखत्वान्नास्तिकत्वमेव तेषां फलिष्यतीत्यर्थः ८ ननु निंदामात्रेण कथमद्वैतमतसिद्धिस्तत्र प्रमाणस्या
संभावादित्यत आह धर्माधर्मेति आत्मनो धर्माधर्मफलैः सुखदुःखादिरूपैर्योगः संबंधः प्रमाणं नैरदृष्टो विषयः शास्त्रादेवसुल्पा

अहं ब्रह्मास्मि कर्त्ता च भोक्ता चास्मीति ये विदुः ते नष्टा ज्ञानकर्मभ्यां नास्तिकास्सुर्न संशयः ८
धर्माधर्मफलैर्योग इष्टो दृष्टो यथात्मनः शास्त्राद्ब्रह्मत्वमप्यस्य मोक्षो ज्ञानात्तथेष्यतां ९

वैधुर्येण कर्मणामभवति या चः पापेनेत्यादेरिष्टांगीकृतः शास्त्रविद्भिरिति शेषः तथास्यात्मनो ब्रह्मत्वं ज्ञानादेव मोक्षश्चेति ब्रह्मवेद ब्रह्मै
व भवति तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेत्यादिशास्त्रादिष्यतां तथा च भेदकर्मतो ज्ञिदितं यो: शास्त्रतात्पर्यवि राम ३५
षयत्वायोगाद्वाक्यानुसारिभिर्यथाशास्त्रमर्थः प्रतिपत्तव्य इति भावः ९

न्वात्मनोधर्माधर्मफलयोगःशास्त्रोक्तोमानांतरविरोधाभावान्नचैवेतियुक्तमनेनतथात्मनोब्रह्मत्वंप्रत्यक्षदृष्टकर्मत्वादिविरोधादतःस्वत्तु
भवयोरविरोधायभेदाभेदावादरणीयावितिचेत्तन्नैवंकर्तृत्वादिप्रतिभासस्याध्यासत्वात्स्वसुक्ताद्वैतप्रतिपन्नत्वात्तूपपत्तेरितिसदृष्टांतमाह यथा
हारजनाद्यारक्ततिस्यहेतस्यपुरुषस्यरूपंयथामहारजनंवासइत्यारभ्ययथासकृद्विद्युत्तमित्यंतेनश्रुत्युक्तायावासनास्ताःस्वप्नदर्शिभिरनुभू
यंतएवंयथेत्यत्रयोजनामहारजनेहरिद्रान्तयारंजितंवस्त्रादिमहारजनंस्वप्नदर्शायांजाग्रद्वासनावासितस्यमनसोवातपित्तश्लेष्मदूषितरसस्य
नाडीष्वनुगतस्यादृष्टादिसमुद्बोधितानेकवासनतयाजाग्रदृष्टार्थकारेणपरिणममानस्यहरिद्रारंजितपटादिरूपसदृशतयाभासमानस्य

यामहारजनाद्यास्तावासनाःस्वप्नदर्शिभिः अनुभूयंतएवेहततोन्यःकेवलोदृशिः १०

दृदृश्यदर्शनतत्कारणादिभावेननित्यंस्वप्नदृष्टोपलभ्यमानत्वात्स्वप्नदृश्याभ्योमहारंजनादिसदृशवासनाभ्योभिन्नात्मसहिता
भ्योदृष्टात्मादृशिस्वभावोविलक्षणोलक्ष्यतेतथाकर्तृत्वादीनांदृश्यत्वादनात्मधर्मत्वमेवेतिनिश्चितमेवेहजाग्रदवस्थायामपि
ततःकर्तृत्वादिधर्मकाल्लिंगादन्यःकेवलःशुद्धोदृशिरात्मेत्यर्थः १०

आत्मनः स्वप्नावस्थायां दृश्यविलक्षणत्वेन प्रतीतिमेव दृष्टांतेन स्पष्टयति कोशादिवेति इवशब्दो यथाशब्दार्थे असिरिवेति संबंधः
३६ यथाशब्दो यथावदित्यर्थे यथासिः खड्गः कोशात् पृथक्कृतः स्वरूपेण दृश्यमेतद्वदेव बोद्धा आत्मा कार्यकारणवर्जितः कार्यकारणाका
रमनसो लिंगात्पृथग्भूतः स्वप्ने यथावद्दृश्यते दृश्यतद्रूपन्ने विषयवद्दृश्यत्वान्मिथ्यात्वमित्याशंक्य विशिनष्टि स्वयंप्रभ इति स्वमहिम्नैव त्र

व

कोशादिव विनिष्कृष्टः कार्यकारणवर्जितः यथा
सिर्दृश्यते स्वप्ने तद्वद्बोद्धा स्वयंप्रभः ॥

यत्नेन विषयतयेत्यर्थः यद्वा कथमवगम्यते स्वप्ने कार्यकारणवर्जित इति वीक्षायामत्रायं पुरुषः स्वयंज्योतिरिति श्रुतिसामर्थ्या
दित्याह स्वयंप्रभ इति स्वयंप्रकाश इति श्रुत्या निर्णीत इत्यर्थः उपाधेः पृथक्स्वरूपेण चावभासमात्रेऽसिदृष्टांत इति न वैषम्यशंका राम
वकाश इति द्रष्टव्यं ॥ ३६

आत्मनः कर्तृत्वादिप्रतिभासस्य स्वप्नप्रतिभासवन्मिथ्यात्वाच्छुद्ध एवात्मा ब्रह्मैवेति शास्त्राद् विरोधे नैव प्रत्येतुं शक्यत्वाच्च भेदाभेदकल्प नया मनःखेदनीयमिति सिद्धे र्थे सोपक्रमं वाक्यं प्रमाणमाहायेषामिति तं पाणिनायैवं बोधयांचकार स होन्नस्वावितिष्ठतो ह्युप्रपुरुषो देह व्यां दुःखासमसोमराजन्नित्यादि प्राणनामभिरामंत्रितेनोत्थितः पाणिना तत्वा पिष्य माणउत्थित इति निर्दूरितस्तेन प्राणेन्द्रियादिरूपलिंगसं घातविलक्षणः स्थूलसंघाताद प्यन्य एवात्मेति प्रतिपन्न मत एव जडविलक्षणत्वात् ज्ञानस्वभावः तस्मापेषामप्रतिबुद्धस्य ज्ञस्य त्वंपदार्थ

आपेषामप्रतिबुद्धस्यैं स्वाभाविकं पदं उक्तं नेत्या
दिवाक्येन कल्पितस्यापनेतृणा १२

स्वाभाविकं पदं परब्रह्मलक्षणमुक्तं केन नेत्यादिवाक्येन अथात आदेशो नेति नेत्यारभ्य सत्यस्य सत्यमिति निर्गुणं वेस त्वं तेषामेव समित येन वाक्येनेत्यर्थः किं विषयेणवाक्येन कल्पितस्याध्यस्तस्य मूर्तामूर्तं तद्वासनामयरूपस्यापनेतृणा प्रतिषेधकेन नेति नेतीति विधिस्य या समस्तकारणकार्यात्मकोपाधिप्रतिषेधनद्वारेण खंडे ब्रह्मणि पर्यवसितेनेत्यर्थः १२ प्रा

नेतिनेत्यादिशास्त्रेण निषिध्यमानस्य कल्पितत्वं च स्वैवोपपादितमित्याह महाराजादय इति स्वप्ने स्वप्नावस्थायां महाराजादयो लोका यद्वन्मविहग
मनिप्रकल्पिता अहं देवता सनयालिंगाभिन्नवासह हृदयं हृपं सूत्रं चैवामूर्त्तमयिकल्पितं विधात्त्रया च स्मृतिर्थ त्रैरूपे नैक्षसुगोमधूष एवमविज्ञाचमयं उ
३७ रुषस्तु पङ्कस्य सर्पवत्तेन स्वप्नपाचरतिनिहास्यल्लोकान्सहुनेवमहाराज्ञो भवतु नेवमहाब्रह्मालाउ नेवोख्याचवनिगच्छतीतीति इव शब्देन महाराज त
त्वादेः स्वप्नदृश्यस्याभासतामध्ये निर्दिश्यैव मेवैवहन्त आत्मा नमगृहीत्वा स्वेशरीरे यथाकामं परिवर्त्तते इत्युपसंहरेती शरीरमध्य एव प्राणाश
व्दवाच्यलिंगोपाधिमहाराजाद्यात्मना यागृहीत्वा स्वप्नदृग्व्यवहरतीति निदर्शयति अतो न स्वप्नोपलब्धं परमार्थमित्यर्थः तथा च वासनाख्यपलिंग
शरीरसहितस्य मूर्त्तामूर्त्तरूपस्थूलस्यापि हंगात्मनिकल्पितत्वं तद्दृश्यत्वादुपपन्नमेवेतियुक्तमितितात्पर्यार्थः ॥ १२ ॥ स्वप्नप्रपंचवज्जाग्रत्प्रपंचस्या

महाराजादयो लोका मयि यद्वत्प्रकल्पिताः ॥ स्वप्ने तद्वद्दृश्यं विधाद्रूपं वासनया सह ॥ १३ ॥ देहलिंगात्म
ना कार्या वासनारूपिणा क्रिया ॥ नेतिनेत्यात्मरूपत्वान्न मे कार्या क्रियाद्यविन ॥ १४ ॥

पिप्रत्यगात्मनिकल्पितत्वे सिद्धे प्रत्यक्त्वाभिन्नस्य कर्मासंभवः सिद्ध इत्याह देहलिंगेति क्रियाः कर्माणि देहलिंगात्मना स्थूलसूक्ष्मदेह
रूपेण तदभिमानेन तदात्मतामापन्नेनात्मना कार्या अनुष्ठेया न पुनस्तद्विरपेक्षेण तदभिमानहीनेन असंभवादित्यर्थः किंलक्षणेन वास
नारूपिणा वासनाः रूपयितुं संचेतुं शीलमस्येति वासनारूपी तेन पुनः पुनः कर्मप्रवृत्तिनिमित्तेनाविच्छिन्नेनेत्यर्थः इदानीमेव मम नेतिनेत्या राम
दिनोक्तात्मस्वरूपत्वाद्देहद्वयाभिमानाभावात् क्वचित्स्वप्ने वा जागरे वा न क्रियाकार्या कर्त्तव्या स्वभावतो विधितो वेत्यर्थः ॥ १४ ॥ ३७

श्रुत्वानविलसितदेहाद्यभिमानादेककर्मेति तस्याज्ञानमूलत्वे सिद्धे न तेन मोक्षाशा कर्तव्येत्याह नततदति   ततस्तस्मात्कर्मणो हेतोरमृतत्वा
या मोक्षाभावस्याशा आशंसनं नास्ति कुतोऽज्ञानहेतुतोऽज्ञानहेतुकत्वादविवेकपूर्वकत्वात्कर्मण इत्यर्थः   जउयोर्ज्ञानकर्मणोर्विरोधाभा
वाज्ज्ञानान्निवृत्तिरूपमोक्षे कर्माशा कार्या बुद्ध्यात्मनावस्थानरूपस्य च परमात्मनेदाविर्भावलक्षणस्य मोक्षस्य च तुर्विधक्रियाफलविलक्षणा
त्वाच्च तत्रापि कर्मापेक्षेति भावः   कर्मणः स्वतो मोक्षहेतुत्वाभावेऽपि मोक्षहेतुज्ञानसहायतया तद्धेतुत्वं विवक्षितं त्याशंक्याज्ञाननिवृत्तौ ज्ञान
मात्रस्य समर्थत्वाच्च न तत्र कर्मसहायतापेक्ष्यते नापीतरच्च तत्स्य स्वतः सिद्धत्वादित्यभिप्रेत्याह मोक्षस्येति १५ यदि कर्मसाध्यममृतत्वं स्यात्त

ततोऽमृतत्वं शान्तिकर्मणो ज्ञानहेतुतः मोक्षस्य ज्ञानहेतुत्वाच्च तदन्यदपेक्षते १५
अमृतत्वं चाभयं नान्नं नेतीत्यात्मा प्रियो मम   विपरीतमतोन्यथा ह्यजेन्नत्सक्रियं ततः १६

र्हि स्वर्गादिवत्कृष्यादिफलवच्चानित्यं सभयं च स्यान्नच्चानित्यमभयं प्रतिक्षोविदं तेऽनन्तमभयरूपत्वश्रुतिविरोधादतोऽन्यदानन्दमिति मोक्षस्वरू
पादन्यस्मान्नित्वान्नपातस्यानार्तत्वपर्यवसानवचनविरोधाच्चेत्यभिप्रेत्याहामृतं चेति   चशब्दस्त्वर्थः   अमृतत्वमभयं नान्नमित्यर्थः   वय
पिवत्स्वरूपममृतत्वं सुकृतलक्षणमकर्मसाध्यं तथापि जीवोऽन्यस्तत्कर्मतो वलभेतेत्याशंक्य जीवस्य ब्रह्मणोऽनन्यत्वाभावान्मैवमित्याह नेति
तियः प्रियो ज्ञायादिदिशीत्यास्यदनया विभाव्यते सममात्मास्वरूपभूतोऽनेनज्ञीवेनात्मनानुप्रविश्येत्यादिश्रुः ॥   ॥

तेः सचनेतीत्यपोठाशेषविशेषइतिमद्रूपत्वात्ततस्यकर्मप्राप्यमस्तत्वमित्यर्थः अतश्चस्कादात्मस्वभावाद्यदन्यद्देहबुद्ध्याद्याभासमात्रंविपरी
तंहश्यमनात्मभूतंतत्क्रियासहितंत्यज्जेत्तदभिमानेपरित्यज्जेत्तस्मात्कारणादित्युपसंहारार्थः नचायमात्मत्तस्यविधिस्तस्याविनियोज्य
३८ त्वात्तेप्रत्युवादमात्रंसाधकस्यपुनरुपयुज्यतेनियोगइतीहविधिवत्सप्रनिर्देशइतिद्रष्टव्यं १६ इतिसत्त्वप्रकरणमेकादशंविहृतं ११
ननुयदिभोक्ताप्रियशब्दोक्तोनिर्विशेषब्रह्मस्वरूपएवतर्हिसर्वोल्लोकोहमहमित्यात्मानमनुभवच्चपिब्रह्माहमितिकथंनानुभवतीत्या
शंकायांपदार्थतत्त्वपरिशोधनाभावापराधादेवेतित्वंपदार्थशोधनप्रधानंप्रकरणमारभमाणःसाभासांतःकरणविवेकाग्रायात्म्येनस्वात्मा
नेनप्रत्येतिसर्वोल्लोकइतिप्रथमंसदृष्टांतमाहप्रकाशस्थमितियथाऽयंजनःस्फीतात्लोकमध्यगतंस्थूलंदेहंतत्तोविलक्षणमपिनेनात्तो

प्रकाशस्थंयथादेहंसालोकमभिमन्यते दृष्ट्याभासंतथाचित्तंद्रष्टाहमितिमन्यते १

केनव्याप्तत्वात्सालोकमालोकविशिष्टमभिमन्यतेतथाद्रष्टाभासंचित्तंसाक्षिचैतन्यव्याप्तमंतःकरणंसचेतनंमन्यमानोहंद्रष्टेतिसा
त्मा भासंचित्तमेवात्मानंमन्यतेनतथाथात्म्यंजानातीत्यर्थः अयंभावःयथाऽविशेषेणसर्वत्रविप्रसृतमालोकंदेहसंपर्कान्नदाकारा
कारितमविदृश्यमानंदेहाभेदेनपश्यतिलोकस्तथासदास्वरूपेणानवच्छिन्नप्रकाशस्वभावोप्यात्मांतःकरणसंपर्कान्नदाकाराका राम
रितस्वभासत्वाद्यहंकर्ताद्रष्टाभोक्तेत्येवमंतःकरणस्वभावविशिष्टमेवात्मानमनुभवतिलोकोनशुद्धमिति १ ३८
१४

एवमात्मनः साभासांतःकरणाविवेकमुक्त्वा तद्द्वारेण देहपर्यंतमविवेकं दर्शयन्नात्मप्रतिपत्तिमेव लोकस्य द्रढयति । यदेवेति यदेव साभासचिदात्मविविक्ततयाहं
कारास्पदं प्राणेंद्रियस्थूलदेहपर्यंतं दृश्यतेऽनुभूयते लोके व्यवहारभूमावितियावत् तेन प्राणादिदेहांतेनात्मनोऽभिन्नत्वेन तादात्म्यं प्रपद्यते विज्ञादि
देहपर्यंतं चिदाभासप्रतीतेस्तदविवेकात्संघातमेवात्मानं मन्यत इत्यर्थः । यत एवं ततस्तस्मान्मूढो देहादेरात्मनस्त्वान्योन्यमध्यासकारी स्तेन मोहा
न हेतुनात्मानं ब्रह्मत्वेन न विंदति न प्राप्नोतीत्यर्थः ॥ २ ॥ उक्तमर्थं दृष्टांतेन साधयति दशमस्येति । दशहि माणवकाः क्वचिन्नदीं तीर्त्वा पारंगताः संतो गणा

यदेव दृश्यते लोके तेनाभिन्नत्वमात्मनः । प्रपद्यते ततो मूढस्तेनात्मानं न विंदति ॥ २ ॥
दशमस्य नवात्मत्वप्रतिपत्तिवदात्मनः । दृश्येषु तद्वदेवायं मूढो लोको न चान्यथा ॥ ३ ॥

यामासुः कतिवयं स्म इति तत्र गणयिता स्वात्मानं विहाय नवैव गणयति स्मेति प्रसिद्धिः । तत्र यद्वद्यथा दशमस्यात्मनो माणवकस्य गणयितुरवि
वेकान्नवात्मत्वप्रतिपत्तिः नवभ्योऽन्यमात्मानं न विंदति नवैव वयं दशमो नास्तीति भ्रांतिरुपलभ्यत इत्यर्थः । तद्वन्तथैवायं लोको बुद्ध्यादिषु दृश्ये
षु वात्मना तादात्म्यप्रतिपत्त्या मूढः शास्त्राचार्योपदेशहीनः स्वात्मानमन्यथा प्रतिपद्यते न चान्यथा वैपरीत्येन तु बुद्ध्याद्यपोहेन ब्रह्मास्मीति स्वरूपया
थात्म्यं न वेत्तीत्यर्थः ॥ ३ ॥

३६

नन्वप्रत्यक्षानुभवस्य श्रुतेश्चाविरोधाय प्रत्यगात्मन एव कर्तृत्वादिधर्मवत्त्वं ब्रह्मरूपत्वं चास्तु किमविवेककल्पनया मूढत्व माशंक्य यत इत्यत आह त्वंकुर्विति यद्वा शास्त्राचार्योपदेशहीनो तु द्याद्विवेपरीत्येनात्मयाथात्म्यं न जानातीति तस्य पदार्थविवेकाभावान्मोहो नोपपद्यत इति सुचिंतं तत्र किंपदार्थविवेकेन हत्वे शास्त्राद्युक्तत्वेप्रतिपन्ने सति ब्रह्माहमस्मीति प्रसंख्यानादेवात्मयाथात्म्यापरोक्ष्यात्मोहो उपपद्यत इति प्रसंख्यानविध्यवसरमाशंक्य परिहरति त्वंकुर्विति एकनीडे एकस्मिन्विषये विरुद्धौ प्रत्ययौ एककालिकावस्थाभाजौ कथं स्यातामिति न्यायतो युक्तितो वदेत्यन्वयः तथा चैकस्मिन्नात्मनि कुरु तद्देवत्वमिति कर्तृत्वाकर्तृत्वप्रकारकविरुद्धबुद्ध्योः समसमययोर्मध्ये तादृशशीनो णा तु द्विदवशमन्यतरबुद्ध्या अन्यतरबाध एव युक्तो नोभयोः प्रामाण्यमित्यभिप्रायः ४ नहि दुःखित्वादिभानेन प्रत्यक्षानुभवेन शास्त्रस्य

त्वं कुरु त्वं तदेवेति प्रत्ययावेककालिकौ एकनीडौ कथं स्यातां विरुद्धौ न्यायतो वद ४
देहाभिमानिनो दुःखं नादेहस्य स्वभावतः स्वापवत्तत्प्रहाणाय तत्त्वमित्युच्यते दृशः ५

नस्यबाध्यत्वोपपत्तेस्तदीयस्थैर्यार्थं प्रसंख्यानविधिः स्यादित्यत आह देहेति यद्दुःखित्वादिकमात्मनः स्वाभाविकं स्यात्तदा तन्न ज्ञाना भ्यासशतेनापि निवर्तयितुं शक्यते ज्ञानस्याज्ञानमात्रविरोधित्वात्तथा च तद्धि निरर्थकः यदा त्वविद्याप्रयुक्तदेहाद्यभिमाननिबंधनं दुःखि त्वादि तदाऽविद्यानिवृत्त्यैव तन्निवृत्तेरविद्यानिवृत्तेश्च ज्ञानमात्रायत्तत्वान्न कर्मविध्यवकाश इति श्लोकतात्पर्यार्थः। नादेहस्य देहाभिमा नरहितस्येत्यर्थः तत्र हेतुः स्वभावत इति अदेहत्वमात्मनः स्वाभाविकं रूपमित्यत्र नियामकमाह स्वापवदिति यद्वा नादेहस्येत्यनेन देहाभिमानव्यतिरेकतो न दुःखमस्तीत्युक्तं व्यतिरेकमाह स्वापवदिति सुषुप्तावित्यर्थः हे शैत्मनस्तत्प्रहाणाय समूलाभिमाननिवृत्तयेन

रा

राम ३६

तत्त्वमादिवाक्यात्देहादिव्यतिरिक्तमात्मानमवगच्छतोपिदुःख्यहमितिप्रतीतेरनुवृत्तेर्न्नाभिमाननिवर्त्तनंदुःखमित्याशंक्यतद्विशिष्टात्मदर्शनस्याभास
त्वान्नैवमित्याहदृशेरिति दर्शयतीतिदर्शनंदर्पणादितस्मिन्सुखछायामुखाभासोमुखप्रतिबिंबरूपायथाआरूढाभवतितद्वद्दृशेःप्रत्यगात्मनःछायाआभा
सोयदारूढायस्मिन्संक्रांतेचभवतितंप्रत्ययंप्रत्याययतीतिप्रत्ययोऽहंकारस्तंसाभासमंतःकरणंपश्यन्नहमित्युपलभ्यमानोयोगीअग्रहणाविद्यादियोगवा
न्दुमानात्मादृष्टइतिमन्यते यथाकश्चिद्दर्पणादौमुखस्वभावाविवेकाद्यथादृष्टदर्पणादोषमालिन्याल्पत्वादिविशिष्टमेवस्वमुखंमन्यतेतथायंमहाजनउ

दृशेश्छायायदारूढामुखच्छायेवदर्पणे पश्यं
स्तंप्रत्ययंयोगीदृष्टआत्मेतिमन्यते ६

द्यन्तंदुःखित्व

याधिदोषैरास्कंदितमिवतदविवेकादात्मानंपश्यन्नहंकर्त्तादुःखीत्यभिमन्यतइत्यर्थः तथाचाहमितिदर्शनस्यकल्पितात्मविषयत्वात्तस्यचाधि
तादुरत्निमात्रत्वात्स्याविवेकाभिमाननिबंधनत्वमितिनसम्यगात्मानंवाक्यादवगच्छतोदुःखित्वाद्यनुवृत्तिरुपपद्यतेकदाचित्प्रतिभानस्यचाधिष्ठा
उदृत्निमात्रत्वादितिभावः ६

द्रि २

यदिसाभासाहंकारमात्मानेयं शपन्नसम्यग्दर्शी कस्तर्हि सम्यग्दर्शीत्यपेक्षायामाह तं चेति तमुपाधिभूतं प्रत्ययमहंकारं मूढं च मोहात्मकमविवेक
४० मन्यं चोपाधिगतमाभासं दुःखादिकं वा यदि वेत्ति साक्ष्यमेवेदं सर्वमिति साक्षित्वेनैव जानाति न दृशेरात्मनः साक्षिणः संबंधीत्येव न वेति य एवं
विवेकमतिः स एव योगिनां युज्यतेऽनेनेति योगस्तत्त्वज्ञानं तं यद्घते येषां ते योगिनस्तेषां प्रेष्ठः प्रियतमः सम्यग्दर्शीत्यर्थः नेतरः पूर्वोक्तः साहं
काराद्यदर्शी न संशयः संशयोऽत्र नैव कर्तव्यः अत्र तस्याप्रदर्शनस्य संशयात्मा विनश्यतीति भगवद्वचनादित्यर्थः ७ सर्वस्य लोकस्यात्मत्वेन भा
समानोप्यहंकारश्चेदनात्मत्वेन त्यज्यते तदा तदन्यस्य त्वंपदार्थस्यादर्शनात्तत्त्वमस्यादिवाक्यस्य निरालंबनत्वापत्तिरित्याशंक्याहंकाराद्वि
विविक्तस्य त्वमर्थस्य स्फूर्तेश्चोपपादितत्वात्स्वैवमित्याह विज्ञातेरिति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते न विज्ञातेर्विज्ञातारं विजानी

तं च मूढं च यद्यन्यं प्रत्ययं वेत्ति नो दृशेः। स एव योगिनां प्रेष्ठो नेतरः स्यान्न संशयः ७
विज्ञातेर्वस्तु विज्ञाता सत्त्वमित्युच्यते यतः। स स्यादनुभवस्तस्य ततोऽन्योऽनुभवो मृषा ८

याइति श्रुतौ षष्ठ्यंतशब्दनिर्दिष्टाया बुद्धिवृत्तिरूपाया विज्ञातेरनित्याया विज्ञातारं नित्यविज्ञप्तिरूपेणाख्याप्यारं त्वं न विजानीयाइति
यस्तु विज्ञाते विज्ञातिरूपोऽविषयभूतः सर्वसाक्षी प्रतिपन्नः स सर्वावभासकत्ववत्त्वमिति त्वंशब्देन तत्त्वमसिवाक्ये उच्यते नाहंका राम
रात्मतया यतो यस्मात्तेन तत्त्वमवलंब्य तत्त्वमस्यादिवाक्यप्रवृत्तेर्न निरालंबनत्वशंकावकाश इति शेषः तस्य त्वंपदार्थस्य स्व ४०
वस्तुत्तप्रकारोऽनुभवः सम्यगनुभवः स्यात्ततोऽन्यो बुद्धिवृत्त्याभासविशिष्टरूपतयानुभवः स मृषा मिथ्याऽध्यास इत्यर्थः ८

नैव विषयस्त्वेदात्माक्रान्त्या निवेद्यते कथं तर्हि तस्यानुभवोऽनुभवरूपत्वान्नस्य नानुभवापेक्षेति चेन्न अथ यत्रानुभाव्यानुभवयोर्भेददर्शनादित्याशंक्य
जडत्वाजडत्वाभ्यां विशेषोपपन्नमेवमित्याह दृशिरूप इति यस्य स्वसत्तायां प्रकाशव्यभिचारस्तस्यागन्तुकज्ञानसापेक्षत्वान्यज्ञानागमापायनिबंधने दर्शना
दर्शने स्यातां सदा दृशिरूपे ज्ञानस्वरूपे ज्ञानस्वरूपमविसु त्यनित्येऽन्यनिरपेक्षे सत्ताके स्वरूपतो ज्ञानतस्तु नित्ये इति यावत् दर्शनादर्शने कथं स्यातां
न कथमपीत्यर्थः ततस्तस्मात्कारणात्तं स्वरूपादन्योऽनुभवो नेष्यत इति योजना ९ उक्तमेव नित्यदृग्रूपत्वमात्मनः स्फुटयति यत्स्थस्ताप
इति यद्वा सुखदुःखादिमुक्तत्वेनात्मनो भावान्न नित्यदृशिमात्रत्वमित्याशंक्याह यत्स्थस्ताप इति रवेस्तापो देहे भवन् यत्स्थो यत्प्रदेशस्थितो भव
ति स तापो यथा स्वाश्रयप्रदेशविशिष्टस्य दृशेरात्मनो विषयस्तद्वदेवेह व्यवहारकाले सत्त्वस्थोऽन्तःकरणस्थ एव भवति सुखदुःखादिरूप

दृशिरूपे सदा नित्ये दर्शनादर्शने मयि कथं स्यातां ततो नान्य इष्यतेऽनुभवस्ततः ९
यत्स्थस्तापो रवेर्देहे दृशेः स विषयो यथा सत्त्वस्थस्तद्वदेवेह दृशेः स विषयस्तथा १०

तापस्तथा स्वाश्रयोऽन्तःकरणसहितस्य दृशेर्विषयो न दृगात्मसमवेत इत्यर्थः अतस्तापस्यान्यधर्मत्वेनैवानुभवादात्मा नित्यचैतन्यमात्रस्व
भाव एवेति भावः अथवा देहे भवन् रवेस्तापो यत्स्थो यस्मिन्देहे देशे स्थितः स देह एव तापविशिष्टस्तप्तोऽहमिति मन्यमानस्य दृशेस्तु किं
स्यात्मनो विषयो यथा तद्वदेव विषयसंपर्कजनितः सुखदुःखादितापः सत्त्वस्थोऽन्तःकरणस्थ इति सोऽन्तःकरणाख्यः सुखादितापविशिष्टस्तथैव
दृशेः साक्षिणो विषय इत्यर्थः तथा च सुख्यहमित्याद्यभिमानस्य देहतापे तप्तोऽहमित्यभिमानवत्स्वदृश्यान्तःकरणाध्यासम
निबंधनत्वात् किंविकिनो दुःखादिमत्तयात्मा कदापि न भासत इति भावः १०

आत्मनः सुखादिगुणाश्रितः करणसंबंधाभावं स्तु त्यजन्विविक्तस्वरूपमनुसंधत्तेप्रतिषिद्धेतिस्पष्टार्थः ॥११॥ यस्मादेवं विचार्यमाणोऽहं ब्रह्मैव तस्मा
४१ त्तस्याद्विरूपस्य ममकुत्रापिस्वरूपभेदोऽस्तीत्यद्वयात्मतत्त्वमाविष्करोतिविज्ञातुरिति सर्वविज्ञातृरूपादात्मनोऽन्यो यतः परो व्यापको विज्ञाता नैव सं
भवति अतोऽहमेवपरोविज्ञाता सर्वभूतेषु स्थावरजंगमेषु सर्वदा एवं सर्वविज्ञेयतद्धर्मरहितत्वात्सुमुक्तस्मीत्यर्थः ॥१२॥ एवं श्रुत्युपदेशात्सर्वज्ञसर्व

प्रतिषिद्धेदमंशोऽज्ञः स्वमिवैकरसोऽद्वयः। नित्यमुक्तस्तथाशुद्धः सोऽहं ब्रह्मास्मि केवलः ॥११॥
विज्ञातुर्नैव विज्ञाता परोऽन्यः संभवत्यतः। विज्ञाताहं परो मुक्तः सर्वभूतेषु सर्वदा ॥१२॥
यो वेदात्मुप्रवृत्त्वमात्मनोऽकर्तृतां तथा। ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः ॥१३॥

दाऽद्वयमात्मानमनुसंदधानस्यापिब्रह्मविदहमस्मीत्यभिमानात्स्यात्तद्विशेषत्वमित्यत आह यो वेदेति यो ब्रह्मवित्त्वं मुक्त्वा ब्रह्मविदह राम
मस्मीत्यभिमानं त्यक्त्वा यथाश्रुत्युक्तं तथात्मनोऽलुप्तविन्मात्रतया दृक्त्वं तथाऽकर्तृतां च वेद स आत्मज्ञः आत्मतत्त्वब्रह्मविच्चेतरो योऽभिमा ४१
नलेशमपि भजतेऽइत्यर्थः ॥१३॥

ननु ब्रह्मात्मज्ञानस्यात्मनि विद्यमानत्वात्कथं च ज्ञविदित्वाभिमानत्यागोऽनेनात्यंते निर्विशेष आत्मेत्यत आह ज्ञातैवेति ज्ञातैवाहमित्यादिरूपो यो विवेकी वि
वेकवान्विविक्तात्मनिष्ठ इति यावत्स प्रत्ययो बुद्धेर्वो वृद्धेर्योवृत्तिरूपः सदृश्यत्वात्साक्षिभास्यत्वान्नाशवान्नश्यत्येव यतो यस्मात्तस्मान्नास्ति ब्रह्मविदोऽभिमा
नक्लेशस्याप्यवकाश इत्यर्थः। यथा कतकबीजरजः कलुषितजले प्रक्षिप्तं जलगतनक्षकल्मरजो विलाप्य स्वयमपि विलीयमानं सलिलमनाविलं करो
ति तथा यथोक्तविवेकबुद्धिवृत्तिरपि परे प्रत्यगात्मनि संसिद्धा तद्गतसकलविशेषमुन्मूलयन्ती स्वयमप्युन्मूलिता प्रत्यगात्मानं निरस्तसमस्तविशेषम
नाविलमापादयतीति भावः १४ नन्वात्मचैतन्यप्रतिभासो विनाशवानात्मप्रकाशत्वात्स्वकृतबुद्धिप्रत्ययवदिति चेन्नमैवंकारकाधीनात्मलाभत्व
स्योपाधित्वादित्याहात्मन इति उपाधेः साधनव्यापकत्वमाशंक्याप्रत्याह दृश्यया चेति अस्या आत्मस्वरूपाया दृष्टेर्जन्यता तु दृश्यया न्यया बुद्धि

ज्ञातैवाहमविज्ञेयः शुद्धो मुक्तः सदेत्यपि विवेकी प्रत्ययो बुद्धेर्दृश्यत्वान्नाशवान्यतः १४ अस्तु सत्त्वात्मनो दृष्टिर्नित्या घाकारके
यतः दृश्यया चान्यया दृष्ट्या जन्यतास्याः प्रकल्पिता १५ देहात्मबुद्ध्यपेतत्वादात्मनः कर्तृतामृषा नैव किंचित्करोमीति सत्या बुद्धि
ः प्रमाणजा १६

वृत्तिरूपया स्वरूपदृष्टेर्विशेषाकाराभिव्यक्त्युपाधिभूतया प्रकल्पिता आरोपिता घटजन्मना घटाकाशजन्मवदिति नाश्यतः साधनव्यापकत्वमित्य
र्थः १५ तदेवमात्मन्यव्यभिचाराद्वित्प्रकाशस्य नित्यत्वाद्बोधे वेदान्तजन्यदृष्टत्वमित्युक्ते नित्यदृष्टिरूपत्वमुपपाद्य घाकर्तृतां तथैवोक्तविकारत्व
मुपपादयति द्वाभ्यां देहात्मबुद्धीति देहात्मबुद्धिर्मिथ्याबुद्धिस्तत्पूर्वकत्वात्कर्तृत्वादिरात्मनो मृषा नैव किंचित्करोमीत्यकर्त्रात्मबुद्धिर्निष्कलं
निःक्रियं शान्तमित्यादिप्रमाणजाऽतः सत्या देहात्मबुद्धेरप्रमाणजाया बाधिकेत्यर्थः १६

इतोपि कर्तृत्वमात्मनो न परमार्थमित्याह कर्तृत्वं कारकापेक्षमिति असंगे निरवयवे आत्मनि कारकसंसर्गस्य परमार्थतोऽनुपपत्तेः कर्तृत्वस्य स्वा-
४२ भाविकत्वात् कर्ता भोक्तास्मीति विज्ञानं मृषैव न परमार्थ इति सुनिश्चितं नित्यनिर्मल एवात्मेत्यर्थः १७ तदेवं परिशोधितपदार्थतत्त्वस्य वाक्यादेवाहं ब्र-
ह्मास्मीति निरपवादे विज्ञाने जाते सति नियोज्योऽहमिति बुद्धेः स्खलितत्वान्न प्रसंख्यानविध्यवकाश इत्याह एवं शास्त्रानुमानाभ्यामिति शास्त्रं विज्ञा-
नैर्पत्तुविज्ञानात्तत्त्वमसीत्युच्यते यन तस्य प्रदर्शितं यत्स्वरूपमात्मा योऽयं देह इत्यत्रोक्तमनुमानं ताभ्यामित्यर्थः १८ ब्रह्मविदो नियोज्यत्वादिबुद्धिर्नैव सम्भवती-
त्यत्र निर्विकारत्वादिकं हेतुं वदन् प्रकरणार्थमुपसंहरति यथा सर्वान्तरमिति १९ इति प्रकाशप्रकरणं द्वादशं विवृतं तदेवं पदार्थतत्त्व [illegible]

कर्तृत्वं कारकापेक्षमकर्तृत्वं स्वभावतः कर्ता भोक्तेति विज्ञानं मृषैवेति सुनिश्चितम् १७ एवं शास्त्रानुमानाभ्यां स्वरूपेऽवगते
सति नियोज्योऽहमिति ह्येषा सत्या बुद्धिः कथं भवेत् १८ यथा सर्वान्तरं व्योम व्योम्नोऽप्यभ्यन्तरो ह्यहं निर्विकारोऽचलः शुद्धोऽजरो मुक्त
सदाद्वयः १९ इति प्रकाशप्रकरणं अचक्षुष्ट्वान्न दृष्टिर्मे तथाऽश्रोत्रस्य का श्रुतिः अवाक्त्वान्न तु वक्तिः स्यादमनस्त्वा
न्मतिः कुतः १

परिचयाभावाद्देववाक्यार्थप्रतिपत्तिर्जनस्येति तत्परिचयमात्रादेव वाक्याद्वाक्यार्थयाथात्म्यावभाससम्भवे प्रसंख्यानादिविधिरनर्थकोऽ-
नुपपन्नश्चेत्युक्तमिदानीं एवं प्रकरणान्ते निर्विकारोऽचलः शुद्ध इति यदुक्तमात्मनः शुद्धत्वमचलत्वं च तत्स्फुटीकर्तुं प्रकरणान्तरं प्रस्तौति अ-
चक्षुष्ट्वादिति दृष्टिशब्देन चक्षुरिन्द्रियद्वारकबुद्धिवृत्तिर्बहिः प्रसृता रूपादिविषयोपरक्ता ज्ञानातिरिक्तसाक्षिकोच्यते सा दृष्टिर्मे मस्तिम हि-
कारतया मद्धर्मभूता सा न भवतीत्यर्थः तत्र हेतुरचक्षुष्ट्वादिति चक्षुर्हि देहदेशाश्रितं भौतिकं करणं न मदाश्रितमित्यन्वयव्यतिरेका-
भ्यां निश्चितमिति न हि तत्त्वसिद्धिशंका एवं का श्रुतिरित्यादिष्वपि योज्यं तथा च तत्तदिन्द्रियद्वारकबुद्धिवृत्तिरूपदृष्ट्यादिक्रियाहीनत्वात्सिद्धमा- राम ४२

तथाकर्तृत्वज्ञातृत्वविकारहेतुप्राणबुद्ध्योरभावादपि शुद्ध इत्याह अप्राणस्येति चिन्मात्रज्योतिषः सदाप्रकाशमानचिदेकरसस्य विद्याविद्ये ज्ञानतद
भावौ ज्ञानक्रिये वा न स्तस्तयोरपि बुद्ध्यावस्थाविशेषत्वादात्मनस्तु बुद्ध्यभावादिति सिद्धा शुद्धतेत्यर्थः २ उक्तधर्मजातस्यात्मन्यभावेन शुद्ध्यादिसि
द्धावशरीरत्वमेव हेतुरित्यभिप्रेत्य चिन्मात्रज्योतिःस्वरूपं विशेषणैर्विशदयति नित्यमुक्तस्येति विद्याविद्ये न स्त इति पूर्वेणान्वयः शुद्धत्वान्नित्यमुक्तत्व

अप्राणस्य न कर्मास्ति बुद्ध्यभावेन वेदिता विद्याविद्ये ततो न स्तश्चिन्मात्रज्योतिषो मम २ नित्यमु
क्तस्य शुद्धस्य कूटस्थस्याविचालिनः अमृतस्याक्षरस्यैवमशरीरस्य सर्वदा ३

मविचालित्वान्न कूटस्थत्वमक्षरत्वादमृतत्वमिति विशेषणानां योजना त्रिष्वपि हेतुरशरीरस्येति न हि शरीरसंबंधमन्तरेणात्मनोऽशु
द्धिचलनक्षरणानि निरूपणपथमवतरंतीति अतः सदैवाशरीरत्वात्सर्वदा शुद्धत्वादि योज्यं ३

आत्मनः षडूर्मिसंबंधाभावादपि सिद्धामुद्धुतेत्याह जिघत्सेति खादितुमिच्छा जिघत्सा पातुमिच्छा पिपासा अन्यत्प्रसिद्धं अशरीरत्वादित्युपल
क्षणं अप्राणत्वादमनस्त्वाच्चेत्यर्थः तथाचोक्तं प्राणस्याशनापिपासे द्वे मनसः शोकमोहकौ जरामृत्यू शरीरस्य षडूर्मिरहितः शिव इति ४ इ व
४३ दानीमशुक्तसकलेन्द्रियवृत्तिप्रतिषेधोपलक्षणार्थं तयास्पर्शरसनसंबंधप्रतिषेधद्वाविर्भावतिरोभावहानतया विशुद्धचिद्रूपत्वमुपसंहरति

जिघत्सा वा पिपासा वा शोकमोहौ जरामृती न विद्येतेऽशरीरत्वाद्व्योमवद्व्यापिनो मम ४
अस्पर्शत्वान्न मे स्पृष्टिर्नाजिह्वत्वाद्रसज्ञता नित्यविज्ञानरूपस्य ज्ञानाज्ञाने न मे सदा ५
या तु स्यान्मानसी वृत्तिश्चाक्षुषा रूपरंजना नित्यमेवात्मनो दृष्ट्या नित्यया दृश्यते हि सा ६

अस्पर्शत्वादिति स्पर्शनेन्द्रियरहितत्वादित्यर्थः ५ आत्मनो दृश्यादयो न संतीत्युक्तेऽर्थे उपपत्तिमाह यात्विति चाक्षुषा चक्षुर्द्वार
जनिता रूपरंजना रूपाकाराकारिता या तु मानसी वृत्तिः स्यात्स्याद्बुद्धेर्भवति स्पष्टैवं विधा वृत्तिरपि साक्षिरूपया नित्यया दृष्ट्यात्मनैव तत्स्वप्र लप
काशत्वद्गता या नित्यमेव दृश्यते प्रकाश्यते हि प्रसिद्धमनुभवसिद्धमेवैतदित्यर्थः ६ ४३

तथा च न दृश्यादयश्चिदात्मीयास्तद्दृश्यत्वाद्यो येन दृश्यते न स तदीयो यथा रूपादिरिति सिद्धमात्मनो दृश्यादिराहित्येन स्वच्छत्वादीत्यभिप्रेत्य चक्षुरादिरकर्तृता
दुक्तन्यायेनात्यन्तरे ब्रूतिदिशति तथेति विषयोज्जना विषयोपाधिकाः विषयाकारा इति यावत् एवं च केवलाच्चक्षुरादिद्वारनिरपेक्षात् अन्तर्मनसि शरीरान्तर्वर्ति
नि त्रितेस्मृतिः रागादिरूपा सापि एवंकृत्यात्मदृश्यादृश्यते इत्यन्वयः ७ किंच स्वप्नावस्थायां विद्यमानामनः परिणामरूपा विषयाकारा दृश्यन्ते ताव

तथान्येन्द्रियप्रणाल्याऽदृश्यतेविषयोज्जनाः स्मृतीरागादिरूपाच केवलांतर्मनस्यपि ७
मानसस्तद्वदन्यस्य दृश्यंते स्वप्नदृक्त्रयः द्रष्टुर्दृष्टिस्ततो नित्या शुद्धानंताच केवला ८

तिरिक्तस्यैव द्रष्टुर्दृश्या एव यासं प्रति पन्नात्मतया ज्ञायद्दृश्या अपि दृश्यत्वात्स्वव्यतिरिक्तस्यैव द्रष्टुर्दृश्या इत्याह मानसा इति मानस्यः स्वप्नदृक्त्रयो
न्यस्य साक्षिणो दृश्यते दृश्यत्वेन विपरिवर्तन्ते इत्यर्थः तद्वज्जाग्रद्वत्यदिति शेषः सर्वदृष्टीनां क्रूटस्थदृष्टिभास्यत्वे सिद्धे फलितमाह द्रष्टुरिति ८

कूटस्थाचेदात्मदृष्टिरिष्टं कथं तत्त्वान्यथाप्रथेत्याशंक्य हृतिमदंतांकरणाविवेकादेवेत्याहानित्येति अविशुद्धेतिच्छेदः उपाधिमतायादृश्ययादृश्यासह
 विवेकतोविवेकाग्रहादत्रव्यवहारसमो सानित्याशुद्धाचात्मदृष्टिरनित्याऽविशुद्धेतिचगृह्यतेइतियोजना तथाहंसुखीदुःखीतिचमन्यतेइत्युत्तर
श्लोकगतेनान्वयः ९ अविवेकनिबंधनान्मिथ्याभिमानादेवसंसारप्राप्तिरित्युक्तमेवस्फुटयतिमूढयेति १० कथंतर्हिसंसारनिवृत्तिरित्यपेक्षा

अनित्यासाऽविशुद्धेतिगृह्यतेत्वाविवेकतः सुखीदुःखीतथा चाहं दृश्ययोपाधिभूतया ९ मूढयामूढइत्येवंबुद्ध्या
बुद्धइत्यपि मन्यतेसर्वलोको येयेनसंसारमृच्छति १० अचक्षुष्ट्वादिशास्त्रोक्तं सबाह्याभ्यंतरं ह्यजं नित्यमुक्तमि
हात्मानं मुमुक्षुश्चेत्सदा स्मरेत ११ अचक्षुष्ट्वादिशास्त्राद्वानेंद्रियाणि सदा मम अप्राणो ह्यमनाः शुभ्र इति चार्थवदे

पांतदुपायं ध्रुवं मुमुक्षुं शिक्षयत्यचक्षुष्ट्वादीति इह प्राणिनां मध्ये कश्चिन्मुमुक्षुश्चेत्स्यात्तर्हि स्वमात्मानमुक्तरूपं सदा स्मरेत कृत्याचार्योप
दिष्टमनवरतमनुसंदधीतेति योजना ११ यदात्मनश्चक्षुरादिराहित्यं प्राक्सिद्धवदुक्तं तत्र प्रमाणमाहाचक्षुष्ट्वादिशास्त्राद्वेति अचक्षु
ष्कमश्रोत्रमवागमनइत्यादिना बृहदारण्यके यथात्मरूपमुक्तं तथा मुंडकेप्युक्तमित्याह अप्राण इति १२

आत्मनो निर्विशेषत्वे श्रुत्यंतरमुदाहरति शब्दादीनामिति अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत् अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं
मृत्युमुखात्प्रमुच्यत इति काठके श्रूयत इत्यर्थः उक्तप्रमाणमनूद्य फलितमाह अप्राण इति एतच्च श्रोत्रादेरप्युपलक्षणं १३ अविकारित्वनिष्पफ
लमाह विक्षेप इति तस्मादविकारित्वादित्यर्थः ततो विक्षेपाभावादित्यर्थः विक्षेपनिवृत्तिरूपत्वात्समाधेस्तदभावे तदभावः कस्यचिद्धि समाधिवि
क्षेपौ विषयेक्षायां विकारवत एवेति वदन्नविकारित्वं तदभावे द्रढयति विक्षेपो वेति १४ मनोवद्विकारित्वाद्विकारि मनस्तादात्म्याद्वा विक्षेपसमा

शब्दादीनामभावश्च श्रूयते मम काठके । अप्राणो ह्यमना यस्मादविकारी सदा ह्यहं १३
विक्षेपो नास्ति तस्मान्मे न समाधिस्ततो मम । विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः १४
अमनस्कस्य शुद्धस्य कथं तत्स्याद्द्वयं मम । अमनस्त्वाविकारित्वे विदेहव्यापिनो मम १५

धीः आत्मनि संभाव्येयातां तदुभयाभावान्नैनस्त इत्याहामनस्कस्येति शुद्धस्याविकारिण इत्यर्थः कथममनस्कत्वमविकारित्वं चेत्तत्रा
हामनस्त्वाविकारित्वे इति विदेहश्चासौ व्यापी चेति विदेहव्यापी तस्येति विग्रहः विदेहत्वादमनस्कत्वं व्यापित्वादविकारित्वं चेत्यर्थः १५

आत्मनो निर्विशेषत्वे श्रुत्यंतरमुदाहरति शब्दादीनामिति अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत् अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत इति काठके श्रूयत इत्यर्थः उक्तंप्रमाणमनूद्य फलितमाह प्राणा इति एतदेव द्रष्ट्रात्मादेरप्युपलक्षणं १३ अविकारित्वनिष्प्रपक लमाह विक्षेप इति तस्मादविकारित्वादित्यर्थः ततो विक्षेपाभावादित्यर्थः विक्षेपनिवृत्तिरूपत्वात्समाधेस्तदभावे तदभावः कस्य तर्हि समाधिवि क्षेपावित्यपेक्षायां विकारवत एवेति वदन्नविकारिणस्तदभावं द्रढयति विक्षेपो वेति १४ मनोवद्विकारित्वाद्विकारिमनस्तादात्म्याद्वा विक्षेपसमा

शब्दादीनामभावश्च श्रूयते मम काठके अप्राणो ह्यमना यस्मादविकारी सदा ह्यहं १३
विक्षेपो नास्ति तस्मान्मे न समाधिस्ततो मम विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः १४
अमनस्कस्य शुद्धस्य कथं तत्स्याद्द्वयं मम अमनस्त्वाविकारित्वे विदेहव्यापिनो मम १५

धी आत्मनि संभाव्येयातां तदुभयाभावान्नैनस्त इत्याहामनस्कस्येति शुद्धस्याविकारिण इत्यर्थः कथममनस्कत्वमविकारित्वं चेत्यत आ हामनस्त्वाविकारित्वे इति विदेहश्चासौ व्यापी चेति विदेहव्यापी तस्येति विग्रहः विदेहत्वादमनस्कत्वं व्यापित्वादविकारित्वं चेत्यर्थः १५

कथंतर्हितन्नासावस्थायांसमाध्यादिकंकर्त्तव्यमितितेबुद्धिरासीदितितत्राह इत्येतदिति सदानित्यमुक्तबुद्धस्यापिममायावत्पर्यंतमेतन्नित्यशुद्ध
४५ त्वादिविषयमज्ञानमासीत्तावन्ममकार्यंसमाधानादिकर्तव्यमभवत्तेदानींतज्ज्ञानतः कृत्यमस्तीत्यर्थः १६ इदानींकस्मात्समाधानादिनकर्तव्य
मित्यपेक्षायांतद्धेतुत्वभावादित्याह समाधिर्वेति कुतोभवेन्ममेतिशेषः कुतोनभवेदित्यत्रहेतुमाहमोहीति हियस्मान्मांप्रत्यगेकरसंब्रह्मध्यात्वावि

इत्येतद्यावदज्ञानंतावत्कार्यंममाभवत् नित्यमुक्तस्यशुद्धस्यबुद्धस्यचसदामम १६
समाधिर्वाःसमाधिर्वाकार्यंवास्यात्कुतोभवेत् मोहिध्यात्वाचबुद्ध्वाचमन्येतेकृतकृत्यतां १७

चार्यबुद्ध्वासाक्षात्कृत्यकृतकृत्यतांमन्यंतेमुमुक्षवइतिशेषः तथाचश्रुतिः एषनित्योमहिमाब्राह्मणस्यनकर्मणावर्द्धतेनोकनीयानि राम
ति यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यतइतिस्मृतेश्च तस्मादज्ञानाभावान्नास्तीदानींकिम ४५
पिकर्त्तव्यमित्यर्थः १७

ननु पद्यविपर्ययोक्तात्मविदः समाध्यादिकर्तव्यं नास्ति तथाप्यात्मनो ब्रह्मत्वे संपाद्ये प्रपंचस्य च विलयः कर्तव्यो ऽवशिष्यत इत्याशंक्य ब्रह्मरूपत्वस्य
नित्यसिद्धत्वात्प्रपंचस्य चाज्ञानमात्रविलसितस्य तत्त्वविद्दृष्ट्या स्वयमेव चाधिष्ठानात्मना विलीनत्वान्न तदनुष्ठेयमवशिष्यत इत्यभिप्रेत्याह अहं ब्रह्मास्मीति
सदेति ब्रह्मास्मीत्यादिषु सर्वेषु विशेषणेषु योज्यं अजस्तत्वे वेधहीनं सर्वत इति च पदमज्ञोक्तपदस्य भयत्रयोक्तं जन्मस्वरूपहेतुरहितत्वमर्थः
१८ ननु प्रत्यक्षदेहे चेतनभेदे भासमाने कथं ब्रह्मास्मीति प्रतीचः पूर्णतानुभवः इत्यत आह मदन्य इति उक्तेऽर्थे प्रमाणमाह कर्माध्यक्ष इति

अहं ब्रह्मास्मि सर्वोऽस्मि शुद्धो बुद्धोऽस्म्यनन्तः सदा अजः सर्वत एवाहमजरश्चाव्ययोऽमृतः १८
मदन्यः सर्वभूतेषु बोद्धा कश्चिन्न विद्यते कर्माध्यक्षश्च साक्षी च चेता नित्योऽगुणोऽद्वयः १९

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति श्रुतावेकस्यैव सर्वभूतान्त
रात्मत्वोपपादनाद्देहप्रतिभानस्याकाशभेदभानवदुपाधिनिबंधनत्वाच्चात्मान्तरशंकेनिवृत्तेः पूर्णब्रह्मात्मानुभवनमित्यर्थः २०

४६ प्ये

अहं ब्रह्मास्मीत्यत्रोक्तमात्मनो ब्रह्मत्वमुपपादितं सर्वोस्मीत्युक्तं तु बाधायां सामानाधिकरण्यमभिप्रायमित्युपपादयति नसद्याहमितिस अत्र प्रत्युत्तरवोऽयं
पृथिव्यप्तेजोरूपं भूतत्रयं अससत्वात्मक्षायोग्यत्वमुच्छब्दविद्धि एवं वाय्वाकाशात्मकं भूतद्वयं तमयं पंचभूतपरिणामात्मके शरीरसंघाते नेत्तत्सर्वं नाहमि
त्युक्ते नेतिनेतीति मध्यैवारोप्यनिषिद्धत्वान्मदन्यत्रमपि चासत्वाद् अहमेवेदं सर्वमिति सुक्तमेवोक्तमित्यर्थः केवलः सर्वविरोधशून्यः शि
वो निर्दोषगुण्यः संध्यादिकालविशेषयोगात्कथं केवलत्वमित्यत आह नमे संध्येति तत्र हेतुः सर्वदा दृशेरिति अलुप्तप्रकाशात्मत्वादित्यर्थः
यद्वा संध्यादिशब्दैः क्रमेण स्वप्नसुषुप्तिजागरणान्युच्यन्ते सदैवैकरूपेण प्रकाशमानस्य स्वरूपावरणविक्षेपरूपावस्थाः कुतस्त्या इत्यर्थः २०
तस्माद्द्वितीयकतानस्यात्मनो निर्विशेषस्य युक्तं ब्रह्मरूपेण पूर्णत्वमिति सदृष्टान्तमाह सर्वमस्तीति यथाकाशं सर्वस्मात्परिच्छिन्नाकाराद्धि

न सद्याहं न चास्मद्युतो मयं केवलः शिवः नमे संध्यानरात्रिर्वा नाहर्वा सर्वदा दृशेः २०
सर्वमस्ति विमुक्तं पथया खं सूक्ष्ममद्वयं तेनाप्यस्मि विनाभूतं ब्रह्मैवाहं तथाद्वयं २१

लक्षणमति सूक्ष्ममात्मस्यतेतत्पदं ब्रह्म परिपूर्णमनन्तं सूक्ष्मं द्वैताभावोपलक्षितं नित्यं तेन स्यादुह्यते द्वितीयत्वाद् आत्मनस्त
तदनन्यत्वाद् ब्रह्मैवास्मीत्यर्थः तर्हि ब्रह्माकाशयोरुपमानोपमेयभावेन भेदात्कथं ब्रह्माद्वितीयमित्यत आह तेनापीति
तेनाकाशेनापि विनाभूतं सिद्धं ब्रह्मास्मि व्यवहारदृष्ट्योपमानादिभेदेऽपि परमार्थतस्तदभावान्नाद्वैतहानिरित्यर्थः । एकमद्वयं राम
दमाकाशेनेमं बध्नाति द्वितीयं ब्रह्मणोऽन्यपोनरुक्तं २१ ॥२॥२॥२॥२॥२॥२॥२ ४६

पूर्वमाकाशदृष्टान्तेन पूर्णत्वनिरूपणात्परमार्थतः परिच्छेदाशंका निराकृता इदानीं तेनैव दृष्टान्तेन भेदपरिच्छेदप्रतीतेर्गतिमाह ममात्मेति ममता
तुरात्मा स्वरूपं ब्रह्मेति सर्वतः सर्वात्मेति च योयमात्मात्मीयभावेन भेदप्रतिभासः स एकस्य मनसोन्तःकरणाद्युपाधिकृतभेदपरिच्छेदायेद्वा विकल्पित
आरोपितो भवेद्यथैकस्य व्योम्नः सुषिभेदेन छिद्रभेदेन नाशाशिभावरूपो भेदो विकल्पितो भवति तद्वदित्यर्थः २२ ~~भेदोभेदस्तथा चैको नाना चेति विकल्पितं~~
तस्माद्विद्यादशायां भेदव्यवहारे पीदानीमवगतात्मतत्त्वस्य सोपि नास्तीति सिद्धमित्याह भेदोऽभेद इति मय्येवैकस्मिन्नेवं भेदोऽभेदश्च विक
ल्पितो व्यवहृतः तथा एको नाना चेति चाहमेव विकल्पितो ते यं ज्ञाता गतिः फलं गंता फलप्राप्तिकर्ता भोक्तेति चाह विकल्पित इति योजना एतत्स

ममात्मा सर्वत आत्मेति भेदो व्योम्नो यथा भवेत् एकस्य सुषिभेदेन तथा मम विकल्पितः २२
भेदोभेदस्तथा चैको नाना चेति विकल्पितं ज्ञेयं ज्ञाता गतिर्गंता मय्येकस्मिन्कुतो भवेत् २३
न मे हेयं न चादेयमविकारी यतो ह्यहं सदा मुक्तस्तथा शुद्धः सदा बुद्धो गुणो ह्ययः २४

र्वं कुतो भवेद्विचार्यमाणे न भवेदेवेत्यर्थः २३ ननु तथापि संसारित्वं हेयं ब्रह्मत्वं चोपादेयमिति न निर्विशेषत्वमात्मन इति चेत्तत्राह
न मे हेयमिति तत्र हेतुमाह अविकारीति यतो यस्मादहमविकारी कुतोऽविकारीत्यपेक्षायां तत्र प्रमाणं हि शब्देन सूच्यते अविकार्योयं
मुच्यत इति स्मृतेरित्यर्थः फलितमाह सदा मुक्त इति सदैव बंधसंसर्गशून्य इत्यर्थः तथा शुद्धस्तद्धेतुविद्यासंबंधरहितो यतः सदा बुद्धः न
हि किं बोधगुणो नेत्याह अगुणो बोधरूप एवेत्यर्थः न हि बोधं किंचिदन्यदस्तीत्याह ह्ययमिति २४

तदेवमुक्तलक्षणमात्मतत्त्वं शास्त्राचार्यप्रसादात् श्रवणमनननिदिध्यासननिष्ठां प्राप्तः सन् सदा मुमुक्षुरहं ब्रह्मास्मीत्यनुसंदध्यादिति मुमुक्षुं प्रो
४७ त्साहयति इत्येवमिति सर्वं पूर्वमुक्तं वेदनफलमाह विदित्वेति ऋषिः सर्वदर्शी २५ उक्ततत्त्ववित् उक्तां मुक्तिं प्रपंचयति स कृतकृत्यश्चेति स ब्राह्मणा
इति श्रुतेर्मुख्यो ब्राह्मण एव च भवेदिति संबंधः एवं निष्ठाहीनस्य प्रत्यवायमाहान्यथेति उक्तं श्रीभागवते भगवता नदेहमाद्यं सुलभं सुदु
र्लभं प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महेति उक्तस्य प्रकरणार्थस्य प्रामाणिकत्वं दर्शयन्प्र २६

इत्येवं सर्वदात्मानं विद्यात्सर्वं समाहितः विदित्वा मां स्वदेहस्थम् ऋषिर्मुक्तो ध्रुवो भवेत् २५
स कृतकृत्यश्च सिद्धश्च योगी ब्राह्मण एव च य एवं वेद तत्त्वार्थमन्यथा ह्यात्महा भवेत् २६ वे
दार्थो निश्चितो ह्येष समासेन मयोदितः संन्यासिभ्यः प्रवक्तव्यः शांतेभ्यः शिष्टबुद्धिना २७

तिपत्तिसौकर्यमाह वेदार्थ इति अस्य ग्रहणे मुख्याधिकारिणो दर्शयति संन्यासिभ्य इति न केवलं प्राप्तसंन्यासाश्रममात्रेभ्यः किंतु
शांतेभ्यः शमादिसाधनसंपन्नेभ्य इत्यर्थः उपदेष्टारं विशिनष्टि शिष्टबुद्धिनेति शास्त्राचार्यानुशिष्टबुद्धिनेत्यर्थः २७ इत्यचक्षुष्ट्व राम
प्रकरणं त्रयोदशं विवृतं १३ ४७

पूर्वस्मिन्प्रकरणेंऽतःकरणाविवेकादात्मनि संसारित्वप्रतीतिर्न स्वतः इति प्राक् प्रमाणाद्बाधिताज्ञानतत्कार्योपाधिस्वरूपस्य वान्येति निर्द्धारितं इदानीमं
तःकरणस्य परोक्षत्वात्संसारप्रतिभासस्य चापरोक्षत्वात्कथं तत्प्रतिभासो हि अविवेककृत इत्याशंक्यांतःकरणस्यापरोक्षत्वप्रतिपादनपूर्वकं पूर्वोक्तशा
स्त्रार्थयुक्तिप्रदर्शनपरं प्रकरणं प्रक्रमते स्वप्नस्मृत्योरिति हि यस्मात्स्वप्नस्मृत्योश्च घटादेर्विषयजातस्य रूपाभासः आकारावभासो दृश्यते तेनानुभूयते तस्मा
त्पूर्वं जाग्रदवस्थायामनुभवावस्थायामपि नूनमवश्यं तदाकारा घटाद्याकारा धीरन्तःकरणवृत्तिर्दृष्टा साक्षाद्दृष्टा दृष्टानुभूतेत्यनुमीयत इत्यक्षरार्थः॥ स्वप्न

स्वप्नस्मृत्योर्घटादेर्हि रूपाभासः प्रदृश्यते पूर्वं नूनं तदाकारा धीर्दृष्टेत्यनुमीयते १

स्मृत्योर्दृष्टार्थविषयत्वनियमात्पूर्वदृष्टस्य वा बाह्यार्थस्य चात्राभावात्स्वप्नस्मृत्योरुपलभ्यमानो विषयोऽर्थाकारवृत्तिमदन्तःकरणमेवेति जाग्रत्पूर्वानुभ
वयोरप्यन्तःकरणमेवार्थाकारवृत्तिमदपरोक्षमनुभूतमिति कल्प्यते तस्मात्सर्वास्वप्यवस्थासु वृत्तिमदन्तःकरणस्यापरोक्षत्वात्तत्कृतचिदाभासाविवेकादा
त्मनः संसारित्वावभासोऽपरोक्षो युक्त इति भावः १

एवमंतःकरणस्यापरोक्षत्वेन निरूपिते किमायातमात्मन इत्यपेक्षायां दृष्टांतः करणादिसंघाताद्विवेकसिद्धिरायातेति स दृष्टांतमाह भिक्षामिति सु-
४८ प्तस्य पतेः स्वप्ने भिक्षामटन्दृष्टो यो देहः स स्वयं द्रष्टा न भवतीत्यर्थात् देहात्मत्वमभिमन्यमानो यितदात्मको न भवति तथा जाग्रद्दृश्यात् देहात्स आ-
त्माः स एव द्रष्टृत्वादित्यर्थः। देहपदमुपलक्षणमिंद्रियांतःकरणयोरपि तथा च प्रयोगो विमतो देहादिर्नात्मा दृश्यत्वात् स्वप्नदृश्यदेहादिवदिति २
बुद्धिरेव सर्वा स्ववस्था स्वर्थाकारा दृश्यत इत्युक्तमर्थं दृष्टांतेन स्पष्टयति मूषेति   मूषांतःस्थविद्रावितमा यथाग्निसंपर्काद्द्रवीभूते ताम्रे मूषायां विषिक्ते

भिक्षामटन्यथा स्वप्ने दृष्टो देहो न स स्वयं जाग्रद्दृश्यात्तथा देहात्तद्द्रष्टृत्वादन्य एव सः ॥ २ ॥ मूषासिक्तं यथा ताम्रं तन्निभं जाय-
ते तथा रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥ ३ ॥ व्यंजको वा यथालोको व्यंग्यस्याकारतामियात् सर्वार्थव्यंजक-
त्वाद्धीरर्थाकारा प्रदृश्यते ॥ ४ ॥

निषिक्तं सत्तन्निभं जायते तत्संस्थानाकृतिर्भवति तथा चित्तमपि रूपादीन्विषयाननुवृत्तं तन्निभं दृश्यते तदाकारं जायत इत्यर्थः ३ ननु मूषा-
सिक्तताम्रस्य कुटिनमूषाभिघातेन शैत्यापत्तौ तदाकारापत्तिरिति युज्यते चित्तस्य त्वमूर्तत्वाद्विषयव्याप्त्यभावात्कथं तदाकारापत्तिसंभव राम
इत्याशंक्य दृष्टांतांतरमाह व्यंजको वेति व्यंजकोऽग्न्यादिरयःपिंडादेरालोको वा घटादेः स्पष्टार्थः ४ ४८

बुद्धेरन्वयमुखेन स्वप्रभत्वोरित्यत्रोपपादितमपरोक्षत्वमनूद्य व्यतिरेकेणोपपादयति धीरेवेति ५ आलोकादिवद्व्यंजकत्वाद्बुद्धेर्व्यंग्याकारत्वमुक्तं स्पष्टयति व्यंजकत्वमिति अस्या बुद्धेर्या रूपाद्याकारेण दृश्यता दर्शनयोग्यता प्रसिद्धा तदेव विषयव्यंजकत्वमित्यर्थः चैतन्यं हि विषयावभासो विषयस्तु न बुद्धेरन्यत्र स्वातंत्र्येण स्फुरन्ति तथा च बुद्धेर्विषयाकारत्वाभावे चैतन्यस्य विषयात्मना स्फुर्तिरनुपपन्नेति विषयाभिव्यक्त्यर्थं तया तदाकारापत्तिरेव बुद्धेर्व्यंजकत्वमित्यभि

धीरेवार्थस्वरूपा हि पुंसदृष्टा पुरापि च नचेत्स्वप्नेक्षणे पश्येत्स्मरतो वाकृतिः कुतः ५
व्यंजकत्वेन देवास्या रूपाद्याकारदृश्यता दृष्टत्वं च दृशेस्तद्वद्व्याप्तिः स्याद्धियस्ततः ६

प्रायः यथा रूपाद्याकारेणावभासमानत्वमेव धियो रूपादिव्यंजकत्वं तथा दृशेः आत्मनो चिद्रूपस्य धर्माधर्मवशादुत्पन्नोऽसत्यात्तद्व्याप्तित दात्मना स्फुरणमेव दृष्टत्वं न परिणाम इत्याह दृष्टत्वं चेति यद्यपि धियो विषयव्याप्तिः परिणामस्तथापि तेन न भवति विषयदेशे तस्याः प्रागेवास त्वात्तथापि चैतन्यात्मनो धीवृत्तिव्याप्तेन परिणामो दाचिदात्मन्येव तत्प्रकाशकत्वलिप्तायास्व धियः सद्भ्रान्तेरिति भावः ६

४८ बुद्धितद्वृत्तिसाक्षित्वेनविदात्मनः परिणामाभावेपि नतस्यब्रह्मरूपतयैकत्वेयुक्तं प्रतिदेहंतद्बुद्धिसाक्षिभेदादित्याशंक्यप्रमाणाभावान्मैवमित्याहचिन्मा
त्रेति यथैकस्मिन्शरीरेबुद्ध्यवभासोऽविकृतचिद्धातुमात्रस्तथासर्वशरीरगतबुद्ध्यवभासइतिभास्यबुद्धिभेदेपिनतदवभासस्वरूपभेदः प्रमाणायथमव
तरतिभेदस्यापिसाक्षित्वेनसाक्षिधर्मत्वाभावान्नसाक्षिभेदाशंकावकाशइत्यर्थः ७ चैतन्यस्यसर्वत्रैकत्वेपिदृश्यस्यबुद्ध्यादेरनेकत्वात्राद्वयब्रह्मात्म
ताक्षिद्धिरित्याशंक्यसकलदृश्यस्यानाद्यनिर्वाच्याविद्याविलासबुद्धिमात्रत्वाद्वैतनस्याद्वयब्रह्मत्वमविरुद्धमित्युपपादयतिकरणमिति यथाक्रियाकार

चिन्मात्रज्योतिषासर्वाःसर्वदेहेषुबुद्धयः मयायस्मात्प्रकाश्यंतेसर्वस्यात्मा ततोह्यहं ७
करणंकर्मकर्त्ताचक्रियास्वप्नेफलंचधीः जाग्रत्येवंयतोदृष्टस्तस्माद्द्रष्टान्यथा ८

धियो कफलानिस्वप्नेधीरेववाह्यार्थस्यतदानत्राभावादितिनिष्प्रित्तिएवमेवजायतिजाग्रदवस्थायांचयतोधीरेवक्रियाकारकफलरूपाद्दृष्टातत्रै
वंहि पदार्थसत्त्वमवगतंतथासतिसुषुप्तावपितदाकारविशेषस्फुरणंकदाचित्स्यात्तस्माद्विषयैः सहैवात्मनिबुद्धेरध्यस्तत्वात्तस्यास्त्वा राम
धंतवत्त्वेनमिथ्यात्वात्तद्रष्टात्मा ततोबुद्धेरन्यथाऽन्यादृशः सन्योऽद्वितीयइत्यर्थः ८ ४९

अन्यथेत्युक्तंस्फुटयति बुद्ध्यादीनामिति बुद्ध्यादयोनात्मस्वरूपधर्माआगमापायित्वाद्घटादिवदित्युक्ते चिदात्मनिव्यभिचारमाशंक्यपरिहरतिहा
नोपादानेति बुद्ध्यादेर्हानोपादानयोर्लक्षयविक्षेपयोः कर्तृत्वात् तदधिष्ठानमात्रेण कर्तेत्युच्यते सनकेनचित्त्याज्योनविलाप्योनचगृह्यते तेनविद्विप्य
ते आत्मनः सर्वाधिष्ठानत्वात्तस्यचाधिष्ठानान्तराभावादित्यर्थः आत्मनः स्वरूपेण हेयानुपादेयत्वेपितत्संबंधित्वेनप्राप्तस्यबाह्यस्यवस्त्वाभरणा
देरान्तरस्यचपापादेर्हेयत्वमांतरस्यचयोगध्यानादेरुपादेयत्वंचभविष्यतीतिनविशुद्धिरात्मनइत्याशंक्याह सबाह्येति बाह्याभ्यंतरसहितेबाह्य

बुद्ध्यादीनामनात्मत्वंहेयोपादेयरूपतः हानोपादानकर्तात्मानत्याज्योनचगृह्यते ९
सबाह्याभ्यंतरेशुद्धेप्रज्ञानैकरसेघने बाह्यमाभ्यंतरंचान्यत्कथंहेयंप्रकल्प्यते १०

माभ्यंतरंचात्मैवननतः पृथगित्यर्थः यतः शुद्धः केवलोतोबाह्याभावः यतश्चप्रज्ञानैकरसोऽतोनान्तरमपिपृथगस्तिएकरसत्वंस्पष्टय
तिघनइति सैंधवघनवद्धितानघनइत्यर्थः हेयमित्युपलक्षणंएवंभूतेह्यात्मनिकथंहेयमुपादेयंवाकल्प्यतइत्यर्थः सत्तास्फुर्त्ति
नास्तिगितस्यबाह्यस्याभ्यंतरस्यवोत्थितिविरुम्मशक्यत्वात्तयोश्चात्मस्वरूपत्वात्ततोबहिरंतर्वाकिमप्यस्तिपरमार्थतोयदुपादेयंहेयंवाभवेदितिनि
त्मनोविशुद्धिसंकोचावकाशइतिभावः १०

वस्तुस्वभावानुसारेणविचार्यमाणोनात्मनि हेयाद्यस्तीत्युक्तमिदानींविद्वदनुभवेनाप्ययमर्थोवगम्यतइत्याह यत्रआत्मेति ब्रह्मविदोज्ञानिनआत्मास्व
५० रूपेकथंपतेतत्कृतत्कृत्यत्वादित्यर्थः ११ एवंविधमात्मतत्त्वंनपरानुभवगम्यमिति स्वयमेवात्मविदाशास्त्राचार्योपदेशानुसारेणविविक्तव्यमित्याहशनायादी
तिषड्भिर्विरहितमित्यर्थः १२ एवंविमर्शेप्राज्ञंप्रापणीयमीतिकर्त्तव्यबुद्धिरेवनभवेदितितिदिष्टांतेनाह पारगइति नद्याःपारंपरतीरंगतोयथातत्स्थःपरतीत

यत्रात्मानेतितितीतिपरायोहेनशेषितः सवेद्ब्रह्मविदात्मेषोयतेतातःपरंकथम् ११ अशनायाद्यतिक्रांतंब्रह्मैवास्मिनिरंत
रं कार्यवानस्मि कथं चाहंविमृशेदेवमंजसा १२ पारगस्तुयथानद्यास्तत्स्थःपारंपिपासति आत्मज्ञस्तुतथाकार्यंकर्तुमन्य
दिहेच्छति १३ आत्मज्ञस्यापियस्यस्याद्धानोपादानतायदि नमोह्यार्हःसविज्ञेयोवांतोसौब्रह्मणाध्रुवं १४

रस्थस्तत्तमेवपारंपिपासतियांतुप्राप्तुमिच्छतिचेदित्यन्वयः तथायथोक्तात्मज्ञोऽन्यत्कार्यंकर्तुमिहश्रेयोमार्गेइच्छतीतियोजना नैवपिपा राम
सतिनेवेछतिचेत्यर्थः १३ यःपुनरात्मज्ञोपिकार्यवान्स्यात्सनसम्यग्दर्शीतितत्निंदत्यात्मज्ञस्यापीतिस्पष्टार्थः १४ ५०

आनागतं तु पूर्वो मनस्तत्तोत्र पश्चिमो संध्या नोपासते विप्रास्तेकथं ब्राह्मणाः स्मृताः इति स्मृतेर्ब्रह्मविदो विप्रस्य संध्यावंदनमस्ति कार्यमित्याशंक्य वेदस्तु ति
कन्याये न निराकरोति सादित्य इति आदित्यः सूर्यस्तत्सहितमिदं जगत्सर्वं हि यस्मात्त्रातो हिरण्यगर्भस्तस्मात्रातस्तस्यापि प्राणो हमस्मीति प्राणात्मभावमापन्न
स्यापुपासकस्येति यावत् अहर्निशे वा नस्यातां सुदयास्तमयरहितं सूर्यरूपत्वात्स्याहोरात्रे नस्यातामित्यर्थः तथा च श्रुतिः नह वा अस्मा उदेति न निम्लो
चति सकृद्दिवा हैवास्मै भवतीति तथा च प्राणोपास्यापि प्राणस्यापि प्राणाविशेषे विभेददर्शिनो यदहर्निशे न स्यातां तदास्य ब्रह्मविदो मुख्यब्रह्मभूतस्याद्वयस्व देहे
तावभासरहिते स्वरूपे सति ते कुतः स्यातां न कुतोपीति कालभेददर्शनाभावादेव तद्विमितकर्तव्याभाव इत्यर्थः १५ ब्रह्मविदो वा द्वृक्रियाभावे विसंध्य
समाधावात्मन्याचरेदिति श्रुतेः स्वात्मनि विस्मृतिवति त्वनुभो ज्ञायस्मृतिं कर्तव्येत्यत आह न स्मरतीति स्मरतीयोगात षष्ठी द्वितीयार्थे स्मरणाविस्म
रणयोरभावे हेतुरलुप्तविदिति पद्यशक्यत्वादात्मनः स्मरणानविधान्तेयुक्त तर्हि तत्त्वज्ञानाहङ्काराविर्भावतिरोभावादिविकारशांतये मनस्वा

सादित्यं हि जगत्त्रातात्तस्मान्नाहर्निशे वुवा प्राणात्तस्यापि न स्यातां कुतो ब्रह्मविदोऽद्वये १५ न स्मरत्यात्मनो ह्यात्मा विस्मरेद्वाप्यलुप्त
चित् मनोपि स्मरतीत्येतत्तज्ज्ञानमज्ञानहेतुजम् १६ ज्ञातृज्ञेयं परोह्यात्मासोविद्याकल्पितः स्मृतः अपोढे विद्ययात्मन्यसिज्ज्ञत्वास र्प इवाह्न
यः १७

त्मानं स्मरेदिति विधिः स्यादित्यत आह मनोपीति मनसो ऽचेतनत्वात्स्मर्तृत्वानुपपत्तेर्मनः स्मरतीति ज्ञानमप्यज्ञानहेतुजं मविवेककल्पितमित्य
र्थः तथा चासम्यग्ब्रह्मविद आत्मव्यतिरेकेण मनः पश्यतः संध्ये समाधाविति विधिर्न सम्यग्ब्रह्मविद इति भावः १६ यद्यप्यात्मा ऽलुप्तविद्य
त्वात्रात्मानं स्मरति तथापि परमात्मानं स्मरेदित्याशंक्याह ज्ञातृरिति यदि पर आत्मा ज्ञातृज्ञेयो विषयः स्यात्तदासोऽविद्याकल्पितः स्यात् ज्ञानक
ल्पितो हि निश्चितः स्मृतो ज्ञातो विद्भिः ज्ञानविषयस्य रज्जुसर्पवद्वद् विद्याकल्पितत्वनियमात्स आत्मैव न भवतीत्यर्थः तथा च तस्मिन्नात्मनः परत्व
ज्ञेयत्वादिके विद्ययात्मविद्यायाः पोढे वाधिते सति ज्ञातृज्ञेयविभागाभावाद्द्वय एवात्मा भवतीत्यर्थः तत्र दृष्टांतो रज्वां सर्प इवेति यथा रज्जुविद्या म

५१ प्रत्यगात्मनो वस्तुतोऽद्वितीयत्वेपि तस्मिन्ममाहमित्यादिसंसारप्रतिभासात्तन्निवृत्तये किमपि कर्तव्यं भविष्यतीत्यत आह कर्तृकर्मेति कर्तृकर्मफलभेदा
भावात्सबाह्याभ्यंतरमजमेवात्मस्वरूपं हि यतोऽतस्तस्मिन्नात्मनि ममाहमित्यादिरूपो यो भावः प्रतिभासः स कस्य भवेत्कुतो वा हेतोर्न वित्र भवेदेवेति योज
ना तस्मात्ज्ञानोत्पत्तेः प्रागेव सर्वकर्तव्यता नो इति भावः १८ आत्मविदो देहादावहंकारममकाराभावे हेतुमाह आत्मा ह्यात्मीय इति आत्मैकत्वज्ञाने स
तीति शेषः १९ केन प्रमाणेन तदात्मैकत्वं ज्ञातुं शक्यमित्यपेक्षायां वेदांतवाक्यप्रमाणबलादित्याह दृष्टृश्रोत्रिति द्वाभ्यां यत्तद्दृष्टृश्रोतृमंतृविज्ञातृ प्रति
रूपमस्थूलं तदक्षरमेव सर्वाधिष्ठानं ब्रह्मैवेति योजना तथा च श्रुतिरक्षरं प्रकृत्याऽदृष्टं दृष्टृ अश्रुतं श्रोतृ अमतं मंतृ अविज्ञातं विज्ञातृ इति तथा नान्यदतोस्ति दृष्टृ

कर्तृकर्मफलाभावात्सबाह्याभ्यंतरं ह्यजं ममाहं चेति यो भावस्तस्मिन्कस्य कुतो भवेत् १८ आत्मा ह्यात्मीय इत्येष भावोऽ
विद्याप्रकल्पितः आत्मैकत्वे ह्यसौ नास्ति बीजाभावे कुतः फलं १९ दृष्टृ श्रोतृ तथा मंतृ विज्ञात्रेव तदक्षरं दृष्ट्याद्यन्यन्न तद्य
स्मात्तस्माद्दृष्टाहमक्षरम् २० स्थावरं जंगमं चैव दृष्ट्यादित्रियायुतं सर्वमक्षरमेवातः सर्वस्यात्माक्षरं त्वहम् २१

नान्यदतोस्ति श्रोतृ नान्यदतोस्ति मंतृ नान्यदतोस्ति विज्ञात्रित्युत्तरवाक्यार्थमाह दृष्ट्यादीति तद्दृष्ट्यादिप्रत्यक्स्वरूपं तस्मादक्षरादन्यन्न भवती
त्यर्थः यस्मादेवमविषयभूतमेवाद्वयमात्मतत्त्वं श्रुतिसिद्धं तस्माद्दृष्टाहमक्षरमित्युपसंहारः २० प्रत्यगात्मनोऽक्षरब्रह्मात्मत्वेपि कथमद्व राम
यात्मत्वसिद्धिरित्याशंक्यैतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति श्रुत्यर्थवदक्षरद्रूपात्मत्वं साधयति स्थावरमिति उपाधिरूपं हि तत्सुपाध्याधा ५१
रत्वेति सर्वमक्षरमेवातोऽहमक्षरं सर्वस्यात्मा स्वरूपं न मदन्यत्किमप्यस्तीत्यर्थः २१

स्थावरादिसर्वमक्षरमित्युक्तेः सप्रपंचमेवाहमात्मेति प्रतिभासशोकोवारयन्नागमिकमात्मज्ञानेस्फुटयत्यकार्यशेषमिति अकार्यशेषत्वमकर्तृत्वेतत्र
हेतुरक्रियात्मेति क्रियास्वरूपतत्फलविलक्षणमित्यर्थः क्रियातत्फलसंसर्गशून्यमितिवा कुतो यतो निर्ममं तदपि कुतः नहंकारं एवंविधमात्मानं यः सम्यक्
पश्यति स एव तत्त्वदर्शीत्यर्थः २२ आत्मविदोहंकाराद्यभावादकर्मशेषत्वमुक्तं प्रपंचयंस्तस्य कृतकृत्यतामाह ममाहंकारेति आत्मनि स्वभावतः शून्या
एवाविद्याप्रयुक्तदेहाद्यभिमानैर्विनानसंतीत्यर्थः हेतुमुद्बोधयन्वेद्यानंतं हि स्वस्थानिर्व्यग्राः संत आध्वंतिष्ठत किमीहितैः कर्मभिः कृतं ज्ञानेनेव

अकार्यशेषमात्मानमक्रियात्मक्रियाफलं निर्ममं निरहंकारं यः पश्यति स पश्यति २२
ममाहंकारयत्नेच्छाः शून्या एव स्वभावतः आत्मनीति पद्धित्तात माध्वं स्वस्थाः किमीहितैः २३
योहं कर्तारमात्मानं तथा वेत्तारमेव च वेत्त्यनात्मज्ञ एवासौ योन्यथाज्ञः स आत्मवित् २४

कृतकृत्यत्वात्कर्मणां चानधिकृतकृतानां विफलत्वाच्चेत्यर्थः २३ देहाद्यतिरिक्तात्मज्ञानवतः सर्वेषु पारलौकिककर्मस्वधिकाराभ्युपगमाद्दत्या
त्मविदोपि सफलं कर्मेति त्याशंक्य तस्यात्मतत्त्ववित्वमेव नास्तीत्याह योहं कर्तारमिति कस्तर्ह्यात्मविदित्यत आह योन्यथाज्ञ इति योकर्तारमज्ञाता
६ रमभोक्तारं चात्मानं ज्ञात्वा नाति स आत्मतत्त्वविदित्यर्थः २४

किमितिकर्त्तात्मेति ज्ञानतो नात्मविश्वमात्मन्येव कर्तृत्वादिप्रतिभासादित्याशंक्य कर्त्रविवेकनिबंधनोयं भ्रमइत्यभिप्रेत्याह यथात्मत्वेपीति यथापरमार्थ
५२ तो देहादिभ्यो न्यत्वे प्यात्मनस्तेषु तादात्म्यमाध्यासिकं मतं तथा ऽकर्तुरभोक्तुरविज्ञानादात्मनः फलं कर्मात्मता भोक्तृकर्तृत्मता मताय थास्थूलदेहात्मनोरध्य
दाध्यासान्मनुष्यत्वाद्यभिमानस्तथाहंकारप्रधानलिंगदेहाविवेकात्कर्तृत्वाद्यभिमानो मिथ्याबुद्धिरित्यर्थः २५ नन्वहंकारस्यैवात्मत्वात्कथमहंकारात्म
नोरविवेकइत्युच्यतइत्यत आह दृष्टिरिति दृष्ट्यादिशब्दैश्चक्षुरादिद्वारकोंतःकरणवृत्तयो निर्दिश्यंते तास्तु सदैव स्वप्नेजाग्रे दृष्टाः सहतिकस्यांतःकर

यथात्मत्वेपि तादात्म्यं देहादिष्वात्मनो मतं तथा कर्तुरविज्ञानात्फलं कर्मात्मनात्मनः २५
दृ[illegible]ःस्फूर्तिर्मतिर्ज्ञातिः स्वप्नेदृष्टाज्जनेः सदा तासामात्मस्वरूपत्वादतः प्रसक्ततात्मनः २६

णस्यस्वप्नेवेद्याकारत्वान्नहेदितान्याःसाक्षीसिद्धइत्यभिप्रायः किंचतासोहदृष्ट्यादीनामात्मस्वरूपत्वादित्ययमर्थः स्वप्नेसद्वृत्तिकस्यांतःकर
णस्याविद्यामात्रतयात्मन्यस्तमयादात्मनप्युनस्तमयात्वन्तस्तस्माद्धितीयापरोक्षविन्मात्रतयावभासमानत्वाच्चांतःकरणादहंकारादिरूपादा राम
त्मनोव्यतिरेकसिद्धिरिति यतएवमतआत्मनःप्रसक्तता साक्षिमात्रत्वस्वयंप्रकाशमानतया नित्यापरोक्षब्रह्मरूपतासिद्धेत्यर्थः २६ ५२

एवमशेषप्रमाणसाक्षिभूततया प्रत्यगात्मनो ब्रह्मत्वापादनेन लाभं दर्शयन् योऽन्यथाज्ञः स आत्मविदित्युक्तमात्मवित्त्वं स्पष्टीकरोति परलोकभयमिति
यस्य परलोकभयं परलोकनिमित्तं भयं किमहं साधु नाकरवं किमहं पापमकरवमित्यादिरूपं नास्ति नैनं कृताकृते तपत इति श्रुतेः तथा यस्य मृत्युभयं म
रणभयं नास्ति न जीवो म्रियत इति श्रुतेः आत्मव्यतिरिक्तस्य द्वितीयस्यादर्शनात् द्वितीयदर्शननिमित्तं हि भयं द्वितीयाद्वै भयं भवतीति श्रुतेः तस्यात्मज्ञस्य
ब्रह्मेन्द्राद्या अपि ज्ञाने ऐश्वर्ये संपन्नतया ईश्वरा अपि शोच्याः शोचनीयाः स्युः अहो एते ऐश्वर्यासक्ततया व्यग्राः कथं स्वस्थाः स्युरिति तस्माद्यः परलोकभ

परलोकभयं यस्य नास्ति मृत्युभयं तथा तस्यात्मज्ञस्य शोच्याः स्युः सब्रह्मेन्द्रा अपीश्वराः २७
ईश्वरत्वेन किं तस्य ब्रह्मेन्द्रत्वेन वा पुनः तृष्णा चेत्सर्वतश्छिन्ना सर्वदैन्योद्भवाऽशुभा २८

रणनिमित्तं व्यग्रताहेतुरहंकारादिशून्यतया ब्रह्मनिष्ठः स एवात्मवित् तद्विपरीत इति सिद्धं २७ ब्रह्मेन्द्रादिभावस्य सर्वैः प्रार्थ्यमानत्वात्कथं शो
च्यन्ते त्याशंक्य ब्रह्मात्मज्ञानादूर्द्ध्वं न किमपि प्रार्थ्यमस्तीत्याशयेनाह ईश्वरत्वेनेति सर्वत्र दैन्यस्योद्भवो यस्यां सा तथाभूता एवाशुभा पापप्रवृत्तिहे
तुत्वात् तृष्णा चेत् सर्वतः सर्वात्मना सह मूलेन छिन्नेत्यर्थः तथा च श्रुतिः यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्र
ह्म समश्नुत इति २८

निर्ममत्वं नहंकारं यः पश्यति स पश्यतीत्युक्तं स्यैवं यत्रात्मत्वस्य तत्त्वज्ञानमाहाहमितीति यस्य शास्त्राचार्यानुगृहीतस्य पदार्थद्वयविवेकवतोऽहं ममे
५३ ति चात्मात्मीयविषयधीरपि आवर्त्य भूत्येव प्रयोजनं भूत्येव दासस्य तौतं तथोक्तं व्यवहारहीनः पुमानयमित्यादि इत्यर्थः तदास आत्मविद्वैदेहादौ तदनुवंधेव
व्यवहारकालेपि एवं विद्वत्स्वात्मोल्लेखरहितत्तया आत्ममात्रदर्शीत्यगात्मविदित्यर्थः २९ यदेवमात्मज्ञानेवाक्याप्नवतित दाकृतकृत्यत्वान्न तस्यका
र्यशेषता संभवतीति प्रागुक्तं मकार्यशेषत्वं प्रपंचयति बुद्ध्यादाविति जाग्रत्स्वप्नयोर्बुद्ध्यादावुपाधौ सति तथा सुषुप्तावसति च यस्यात्मनोऽविशेषतावे

अहमित्यात्मवीर्यं च ममेत्यात्मीयधीरपि । अर्थभूत्येव दासस्य आत्मज्ञो भवेत्तदा ॥ २९ ॥
बुद्ध्यादौ सत्युपाधौ च तथासत्यविशेषता । यस्य चेदात्मनो ज्ञाता तस्य कार्यं कथं भवेत् ॥ ३० ॥
प्रसन्ने विमले व्योम्नि प्रज्ञाने करसे ह्यये । उत्पन्नात्मधियो ब्रूत किमन्यत्कार्यमिष्यते ॥ ३१ ॥

रज्ञाता चेत्तु देहोऽसंदेहेपि संदेहे वचनो वेदा स्युस्तमाराममितिवत् तस्याविशेषात्मनस्तस्य कार्यं कथं भवेन्न कथं चिदित्यर्थः ३० आत्मविदे राम
नास्ति कार्यमित्यत्र हेत्वंतरमाह प्रसन्न इति व्योम्निव्योमसदृशे प्रसन्ने स्वतो दोषरहिते विमले आगंतुकमल वर्जिते उक्त विशेषणाद्वयसाधके ५३
कर्मेणाविशेषणाद्वयं प्रज्ञाने करसेऽह्वये इति एतस्मिन्ब्रह्मण्युत्पन्ना आत्मधीरात्मेति मतिरेवं विधं ब्रह्मैवाहमिति बुद्धिर्यस्य तस्यात्मस्वरूपज्ञानाद
न्यत्किं कार्यमिष्यते तद्ब्रूत न किमपीत्यर्थः ३१

ननु शास्त्राचार्यप्र॰ सदादेवं तत्त्वेऽवगम्यमाने विक्षेपो मार्गप्राप्तिप्रतिबंधकस्य शत्रोः संभवात्तत्परिहारार्थं किमप्यनुष्ठेयं स्यादिति चेन्नेत्याहात्मान
यो मिति यथोष्णस्वभावस्य विभावसोः शीतस्वभावतापादनेन संभाव्यते तथा सर्वभूतात्मभूतस्य शत्रुमित्रादिसंभावनाहं संपादेतिनानुष्ठेयकल्पनाव
सर इत्यर्थः ३२ आत्मनः कार्यशेषत्वे किं सोपाधिकस्येष्यते निरुपाधिकस्य वेति विकल्पाद्यमंगीकृत्याहितीयं दूषयति प्रज्ञेति प्रज्ञा बुद्धिः प्रज्ञाप्राणा
वत्तु कर्तृ शीलमस्यास्तीति प्रज्ञाप्राणानुकारी प्रज्ञाप्राणोपाधिक इत्यर्थः छायेव सूर्यादिप्रतिबिंबमिव जले चक्षुरादिगोचरः इंद्रियतद्वारकवृत्तिषु प्र त

आत्मानं सर्वभूतस्थमभिन्नं चात्मनो विदः । यद्यप्युष्णस्वभावोऽसौ नूनं शीतीकर्तुं विभावसुं ३२
प्रज्ञाप्राणानुकार्यात्मा छायेवाक्षादिगोचरः । ध्यायतीवेति चोक्तो हि शुद्धो मुक्तः स तो हि सः ३३

तिविवित आत्मानंदविवेकात्करोतीवेति ध्यायतीव लेलायतीवेति श्रुत्योक्तस्तस्योदशायां कर्मशेषत्वमभ्युपगमोपि स्वतः शुद्धो मुक्तश्च हि स आ
त त्मा भवति उदकानुगतत्वेन सूर्यस्य कंपादिमत्तया भासमानत्वेपि न परमार्थतः सूर्यः कंपादिमान्भवति तथा चोपाधिविगमे भेदविपर्यासादि
विगमाद्दूरहीनेकर्मात्मतत्त्वविदं न ढौकत इत्यर्थः ३३

निरुपाधिकस्यात्मनो नकर्तृत्वमित्युक्तमुपपादयन्प्राणायामान्षडाचरेदित्यादियतिधर्म्मविधिशेषतापि नास्यास्तीत्याह अप्राणस्ये
५४ ति॥ क्रियाशक्तिप्राणहीनस्य ज्ञानशक्तिमनोहीनस्य सदा अतोऽसंसर्गिणोऽसंगस्य व्योमवदपरिछिन्नस्य सतस्तु ज्वलनशक्तिरहितस्येति
यावत्तद्दृशेश्चिदेकरसस्यास्यैवंविधस्य मम कथं कार्यं भवेत्कथमपीत्यर्थः ३४ तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः। उपवि

अप्राणस्यामनस्कस्य तथासंसर्गिणो दृशेः। व्योमवद्व्यापिनोऽस्य कथं कार्यं भवेन्मम ३४
असमाधिं न पश्यामि निर्विकारस्य सर्वदा। ब्रह्मणो मे विशुद्धस्य शोध्यं नान्यद्धि पाप्मनः ३५

श्यासने युंज्याद्योगमात्मविशुद्धय इत्यादिभगवद्वचनान्मनःसमाधानानुष्ठानेनात्मशुद्धिः संपाद्यावशिष्यत इत्याशंक्य तत्सा
प्रागेव सिद्धत्वान्नेदानीमस्त्यवसर [illegible] त्याह असमाधिमिति विकल्पो ह्यसमाधिस्तं नाहं पश्यामि तद्धेतूपाधिशून्यतया सदा निर्विकारस्ये राम० १
न पश्यामि ब्रह्मात्मनस्तस्यात एव सर्वदा विशुद्धस्य प्रागेव विपाप्मनो नित्यनिवृत्तकल्मषस्य शोध्यं चान्यन्न पश्यामीत्यर्थः ३५ ५४

धा

नन्वन्यत्र पश्यामीत्युक्तं गंतव्यं ब्रह्मलोकादेर्गमनसाधनस्यार्चिरादिमार्गस्य च ब्रह्मविदो विज्ञातव्यत्वादित्याशंक्य सगुणब्रह्मविदस्तत्त्वेपि न निर्गुण
ब्रह्मविदस्तथात्वमिति सहेतुकमाह गंतव्यमिति गंतव्यमिति भावकर्मणोस्तव्येन ग्रहणं तथा च सर्वगत्वेन चलनासामर्थ्याद्गंतव्यं नैव पश्यामि गमनधा
त्वर्थं न पश्यामीत्यर्थः तथा गंतव्यं गत्वा प्राप्यं देशं दृष्ट्वा न विशेषेण पश्यामि कुत इत्यत आह नोर्ध्वमिति तिर[illegible]ति पुरस्तात्पश्चाद्दक्षिणतो वोत्तर

गंतव्यं च तथा नैव सर्वगस्याचलस्य च नोर्ध्वं ना
धस्तिरो वापि निष्कलस्यागुणात्वतः ३६

त्वेनैव पश्यामीत्यनुषंगः कुतो देशभेदाभाव इत्यत आह निष्कलस्येति पूर्णस्येत्यर्थः। कुतो निष्कलत्वं ज्ञानसुखादिगुणात्मकावयवयोगा
दित्यत आह अगुणात्वत इति। ज्ञानसुखयोः स्वरूपत्वात्संसर्गिगुणस्य चासंगे मय्यसंभवाद्गुणतोपि विभागशून्यस्य न गंतव्यं प्राप्यं गतिः प्राप्तिर्वा वि
घत इति न तत्साधननिष्ठाविधानावकाश इत्यर्थः ३६

किंचाज्ञानोपाधिं विना त्मनि नित्यमुक्ते कस्यापि विशेषस्यो त्पेद्वितुमशक्यत्वाद्(ज्ञानेस्मच) ज्ञानस्वभावे वस्तुतोऽसेमात्वमानत्वान्न कदाप्यात्मनः क्रियायोग्यतेति
ह्रितेकुत इदानीमत्तान प्रतिभासस्याप्यभावे कर्मशेषता स्यादित्यभिप्रेत्याह चिन्मात्रेति तस्मिन्नात्मनि तमः स्वरूपतः प्रतिभासतोऽपि न विद्यते कु
५५ तः श्चिन्मात्रज्योतिषः ज्योतिष्ट्वत इति भावप्रधानो निर्देशः सुगममन्यत् ३७ किंचाज्ञानाभावे वाह्यान्तःकरणानां संसर्गाभावात्तैर्विना प्रवृत्त्यभावा
च्च मे कर्मावसरः इत्याह अमनस्कस्येति प्राणमनोविहीनत्वे प्रमाणमाह अप्राणो ह्यमना शुभ्र इति श्रुतेर्वचः सत्यं सत्यार्थं निर्दोषत्वात् स्वतः प्रमाणत्वादित्यर्थः

चिन्मात्रज्योतिषो नित्यं तमस्तस्मिन्न विद्यते कथं कार्यं ममैवाद्य नित्यमुक्तस्य शिष्यते ३७
अमनस्कस्य का चिंता क्रियावाऽनिंद्रियस्य का अप्राणो ह्यमनाः शुभ्र इति सत्यं श्रुतेर्वचः ३८
अकालत्वाददेशत्वाददिक्त्वादनिमित्ततः आत्मनो नैव कालादेरपेक्षा ध्यायतः सदा ३९

३८ अपररात्रादिकालस्य विविक्तपूतादिदेशस्य प्राच्यादिदिग्विशेषस्य मनोविक्षेपरहि(तस्य गोरूः)तत्वाणादिनिमित्तस्य च प्रतीक्षाया आत्मचिन्तने क
र्त्तव्यत्वात् कथं कार्याभाव इत्याशंक्याह अकालत्वादिति सदात्मानं ध्यायतो यतेर्नैव कालादेरपेक्षास्तीति योजना तत्र हेतुरात्मनोऽकालत्वादि राम
त्यादिः आत्मस्वरूपस्य कालाद्यनवच्छिन्नत्वात्तद्ध्याने तदपेक्षेत्यर्थः तथा चाह भगवान्सूत्रकारः यत्रैकाग्रता तत्राविशेषादिति ३९ ५५

ब्रह्मविदो देशकालादिसव्यपेक्षे कर्म्मतपये त्वाभावेपि तद्यागादितीर्थे स्यादये त्वागंगातीरे वसेन्नित्यं मिद्रुमे त्वपरायणा इत्यादिस्मृतिविहितत्वादित्याशंक्य ब्रह्मात्म
ज्ञानरूपे तीर्थे साक्षान्मुक्तिहेतोस्नाते स्मिविदो न तीर्थांतरापेक्षास्तीत्याह यस्मिन्निति यस्मिन्ब्रह्मात्मस्वरूपे देवास्तत्तीर्थस्थानविशेषाधिष्ठातारो माधववि
श्वेश्वरमास्वरविक्रमादयः पूजादर्शनस्पर्शनस्मरणादिभिर्भक्तपावनाः प्रसिद्धास्तथा वेदाश्च ऋग्यजुःसामाथर्वाख्या अध्ययनब्रह्मयज्ञपाठार्थानुष्ठाना
दिभिः पावयंति तथा कृत्स्नं पवित्रं पावनं तीर्थविशेषे हरिहरनामोच्चारणादि एतत्सर्वमेकतामेकत्वं व्रजेद्यस्मिन्सरित इव सागरेंतर्भवंतीत्यर्थः सर्वात्मक
ब्रह्माविर्भावरूपत्वादिति परमो हेतुरत्रानुसंधेयः तस्मान्सं मननशिवेदांतमहावाक्यजनितांतःकरणवृत्तिरूपसखंडलक्षिते मानसं तीर्थं संसारपापमूलाविद्याना

यस्मिन्देवाश्च वेदाश्च पवित्रं कृत्स्नमेकतां व्रजेत्तस्मान
सं तीर्थं यस्मिन्स्नात्वाऽमृतो भवेत ४०

रकं तीर्थत्वं स्पष्टयति यस्मिन्निति यस्मिन्स्नात्वा निमग्नोदकराशौ निक्षिप्तोदकविंदुवत्तदेकतां प्राप्य अमृतो भवेद्विविशेषनित्यात्मस्व
रूप एव भवेत्तस्मिंस्तीर्थे नित्यं निमग्नस्य न तीर्थांतरापेक्षेति भावः तथा च श्रुतिः यत्रैकं भवंति सर्वे वेदा यत्रैकं भवंति सर्वे होतारो
यत्रैकं भवंति स मानसीन आत्मा जनानामिति यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानतः आत्मा भवति गौतमेति च ४०

एवं कृतार्थत्वापादकं ज्ञानं तीर्थकेनोपायेन प्राप्यमित्यपेक्षायां पूर्वोक्तः पदार्थविवेक एव तत्प्राप्त्युपाय इति वक्तुं प्रथमं स्थूलदेहान्यत्वमात्मनो विशदय
तिन चास्तीति शब्दादिर्गुणो विषयोऽनन्यवेदनो न चास्ति स्वयंप्रकाशः स्वावज्ञास्तीत्यर्थः तथा परस्परेणापि शब्देन स्पर्शः स्पर्शेन शब्द इत्येवं प
५६ रस्परेणापि न चैव दृश्यते जडत्वादेवेत्यर्थः दर्शनमंतरेण व्यवहारानुपपत्तेर्दर्शनस्य स्वतः परस्परतश्चाभावे परिशेषात्परेण स्वविलक्षणेनाजडेन प्र
काश्या एव तु शब्दोऽवधारणार्थः तथा च दैहिका अपि रसादयः परेण दृश्याः दृश्यत्वाद्यथा बाह्यरसादयस्तथैवेमे तस्मान्न ते त्वद्गतार्थः ४१ तदे

न चास्ति शब्दादिरनन्यवेदनः परस्परेणापि न चैव दृश्यते परेण दृश्यास्तु यथा रसा
दयस्तथैव दृश्यत्वत एव दैहिकाः १४ अहंममेत्येषणयत्नविक्रियाः सुखादयस्त
द्वदिह प्रदृश्यतः दृश्यत्वयोगाच्च परस्परेण ते न दृश्यतां यान्ति ततः परो भवान् ४२

वं पंचभूतात्मकात्स्थूलदेहात्तद्द्रष्टारमात्मानं विविच्य तस्मादपि देहान्तं विविनक्ति अहंममेति अहमहंकारः एषणा यत्न विक्रियाः सुखादयः
कामप्रयत्नकर्तृत्वभोक्तृत्वसुखदुःखमोहद्वेषादयो ममेति निर्दिश्यमाना मनोवृत्तयस्तद्वदिव ज्ञानन्यवेदनाः कुतः इह व्यवहारभूमौ प्रदृश्य राम
तोर्दर्शनकर्मत्वतः परस्परेणापि दृश्यतां न यान्ति न प्राप्नुवंति दृश्यत्वयोगादेव परिशेषात्तेषां द्रष्टा नतस्तेभ्योऽहंकारादिभ्यस्तत्संघातरूपाल्लिंगदेहा ५६
दिति यावत् भवान् आत्मा परोऽन्य इति योजना ४२

यद्यप्येवं देहद्वयग्राहकत्वात्तद्व्यतिरिक्त एवात्मा तथापि तत्संबंधप्रतीतेस्तस्य न नित्यमुक्तरूपतेत्याशंक्याहाहंक्रियाग्राहीति अहंक्रियाहंकारस्तामहं ममेत्येवमाग्राहि समस्तविक्रियाश्चितिस्वरूपेण चैतन्यप्रकाशात्मना ऽर्कवदर्कोतो व समंततः प्रकाश्यमाना हि यतोऽत आत्मनोऽध्यस्ता ततः बद्धता तिह्याविक्रियासंबंधस्याविद्यकत्वाद्दृश्यधर्मत्वानुपपत्तेर्न मुक्तिविरोध इत्यर्थः ४३ देहद्वयविविक्तस्याप्यात्मनः प्रतिदेहं परिच्छिन्नत्वान्न ब्रह्मात्मता

अहंक्रियाग्राहि समस्तविक्रियासकर्तृकाकर्मफलेन संहताः चितिस्वरूपेण स-
मंततोऽर्कवत्प्रकाश्यमाना हि ततात्मनोद्धृताः ४३ दृशिस्वरूपेण हि सर्वदेहिनां
वियद्यथा व्याप्य मनांस्यवस्थितः अतो न तस्मादपरोऽस्ति वेदिता परोऽपि तस्मादत एव ई-
श्वरः ४४

परिच्छिन्नतासिद्धेरित्याशंक्याह दृशिस्वरूपेण हीति। हि यतः आत्मा सर्वदेहिनां मनांसि दृशिस्वरूपेणो व्याप्य घटादीनि वियदिव स्थितो न परिच्छिन्नरूपेण अतस्तस्मादात्मनश्चितिस्वरूपादपरो जीवो वेदिता नास्ति तथा परईश्वरोपि तस्मादन्यो वेदिता नास्ति चितिस्वभावत्वाविशेषात्तस्मादेक एवात्मेत्यर्थः। आत्मा न स्वरूपभेदवान्तु पाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वादाकाशवदिति भावः ४४

ध श्री

देहद्वयसाक्षीब्रह्मस्वभावश्चेदात्मा कथं तर्हि तस्य नास्तिताशंका केषांचिदित्याशंक्य स्वदोषवशादेवेत्यभिप्रेत्याह शरीरेति शरीरद्वयोः स्थूलसू
५७ क्ष्मदेहयोर्यद्यन्येन नित्यसद्रूपस्य दृश्यता पूर्वोक्तन्यायेन न सिद्ध्यति तदा निरात्मवादाः शून्यनास्तिकाद्यात्मवादाः मया निराकृता एवेत्यर्थः तत्र यावो
विशुद्धिकरात्कर्मणो धर्मादितरद्वाराक्कर्मणः परो व्यतिरिक्तस्तत्साक्षित्वादत एव शुद्धोऽकर्ता तत एव सुनिर्मलः कर्मफलभोगमललेशेनापि
रहितः सर्वगतोऽपरिच्छिन्नोऽत एवासितो बंधनशून्यश्चेत्यर्थः ४५ भवेदेतदेवं यदि शरीरद्वयोरात्मदृश्यता सिद्ध्येत्तस्यास्तु न संप्रतिपत्तिरित्या
शंक्य तयोरात्मदृश्यत्वाभावे बाधकमाह घटादीति यदि ते तव मते स्ववृत्तिभिर्बहुधा प्रवृत्तं घटादिरूपं विषयाकारं मनोऽन्येनात्मना न गृह्येत
न प्रकाश्यते तदात्मनो मनोऽन्यत्वासिद्धावशुद्धचिद्रूपविकारदोषदुष्टता यथा मते बुद्धेस्तत्त्वावारयितुं न शक्यते तत्र साक्षित्वानभ्युपगमे

शरीरद्वयोर्यद्विनान्यदृश्यता निरात्मवादाः सुनिराकृता मया परश्च शुद्धो ह्यविशुद्धिकर्मतः सुनिर्मलः सर्वगतोऽसि
तोऽद्वयः ४५ घटादिरूपं यदि ते न गृह्यते मनः प्रवृत्तं बहुधा स्ववृत्तिभिः अशुद्धचिद्रूपविकारदोषता मतेर्यथा वारयितुं
न पार्यते ४६

सति मतिदोषाणां तस्मिन्नवश्यंभावात्तथा चानिर्मोक्षप्रसंग इत्यर्थः अथवा यद्यपि शरीरद्वयग्राहकता या तदन्यस्यात्मा नित्यसद्रूपस्त
थापि दृश्यसंसर्गकृतदोषो न परिहर्तुं शक्यते स्वचैतन्याभेदेन हि दृश्यमवभासयन्नदुष्टो भवति अन्यथा दृश्यस्यापरोक्षानुपपत्तेरतो राम
विशुद्धत्वाद्यनुपपन्नमिति शंकते घटादिरूपमिति स्ववृत्तिभिर्बहुधा प्रवृत्तं घटाद्याकारं मनो यदि चेत्तन्नात्मना गृह्यते तदात्मस्य दृ ५७
श्यसंबंधा[illegible]दशुद्ध्यादिदोषता वारयितुं न पार्यते यथा मतेर्बुद्धेस्तत्संसर्गाद्विशुद्धायतां वारयितुं न पार्यते तद्वदित्यर्थः ४६

स्यादेतदेवंयदिमनिवत्स्यावयवंपरिछिन्नंपरिणामि चात्मस्वरूपंस्यात्रैवमात्मस्वरूपमतोनास्याशुद्ध्यादिशंकावकाशइतिदृष्टांतेनोपपादयन्नुत्तरमाह
यथाविशुद्धमिति विशुद्धंपरिणामविक्रियामलरहितंनिरंतरमपरिछिन्नमतएवनिरवयवंचेतिद्रष्टव्यं।एवंविधंयथागगनेनसज्जतेकाष्ठजतुव
न्नसंलग्नंभवतिनापिलिप्यतेमलात्तकरसेनेववस्त्रादितथात्मापिविशुद्धोनिरंतरोनिरवयवश्चसर्वाण्यभिव्याप्तोनबुद्ध्याविशुद्धसज्जतेनापितद्दोषैर्लि
प्यतइत्यर्थः।अत्रशास्त्रप्रसिद्धिंहिशब्देनद्योतयन्हेतुमाह समस्तभूतेष्विति तत्तदभिमानिदेवतासहितेष्वपिसमस्तभूतेषुअयमात्मासदास

यथाविशुद्धंगगनंनिरंजनंनसज्जतेनापिचलिप्यतेतथा सम
स्तभूतेषुसदैवतेष्वयंसमःसदात्माह्यजरोऽमरोऽभयः ४१

मोहियस्मात्तस्मादजरोऽमरोऽभयो नित्यशुद्धइत्यर्थः।तथाचश्रुतिः।यःसर्वेषुभूतेषुतिष्ठन्सर्वेभ्योभूतेभ्योंतरोयंसर्वाणिभूतानिनविदुर्यस्यसर्वा
णिभूतानिशरीरंयःसर्वाणिभूतान्यंतरोयमयत्येषतआत्मांतर्याम्यमृतइति समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरं विनश्यत्स्वविनश्यंतंयःप
श्यतिसपश्यति नलिप्यतेलोकदुःखेनवाह्यइत्यादि ४१

ते त्रा

किंच दृश्यस्य बाधितत्वादपि न तत्कृतदोषसंबंधश्चात्मनः संभाव्यते न हि मिथ्यार्थेन सत्यं वस्तु संस्पृश्यते कथं बाधितत्वमिति चेत् प्रतिपत्त्रीपाधौ नि
५८ षिध्यमानत्वाद्रज्जुसर्पादिवदित्यभिप्रेत्याह अमूर्त्तेति अमूर्त्तं च मूर्त्तानीति अमूर्त्तं च मूर्त्तानि च अमूर्त्तमूर्त्तानि पंच महाभूतात्मकानि स्थूलानि द्विधा व
ब्रह्मणो रूपे मूर्त्तं चैवामूर्त्तं चेति श्रुतेः दृशिस्वरूपस्य ब्रह्मणः संबंधीनि श्रुतानि च अपरं कर्मवासना कर्मवासना अयं लिंगमिति यावत् तदपि तस्य
हैतस्य पुरुषस्य रूपं यथा महारजनं वास इत्यत्रोक्तेः एतत्सर्वं सकारणं मूढबुद्धिभिरविद्यया मोहरूपया आत्मनि दृशिस्वरूपे प्रत्यगात्मनि ब्रह्मणि प्रक
ल्पितं वासना प्रकल्पिता अमूर्त्तमूर्त्तानि प्रकल्पितानीति योजना हि यस्मादविद्ययाध्यस्तमात्मनि सप्रपंचं तत्त्वं तस्माद्वेति नेति नेतीति वीप्सया तत्सर्वमात्मनो

अमूर्त्तमूर्त्तानि च कर्म्मवासना दृशिस्वरूपस्य बहिः प्रकल्पिता अवि
द्ययाह्यात्मनि मूढदृष्टिभिरपोह्य नेतीत्यवशेषितो दृशिः ५८

बहिरपोह्यात्मविशेषणतापन्नं रूपं बाधित्वा केवलं दृशिश्चिन्मात्र एवावशेषितः सत्यस्य सत्यमिति श्रुत्येति योजना यदा प्रकल्पिता इति विस
र्गान्तपाठस्तदैवं योजना अविद्यया मूढदृष्टिभिरात्मनि प्रत्यग्रूपे प्रकल्पिताः आरोपिताः कर्मवासना अमूर्त्तमूर्त्तानि च भूतानि दृशिस्वरूप राम
स्य प्रत्यक्स्वरूपस्य ब्रह्मणो बहिर्नेति नेतीत्यपोह्य दृशिरेवावशेषितो निषेधावधिभूतः श्रुत्या हि यस्मात्तस्मान्नास्यात्मनि दोषसंग इति ५८ ५८

स्थूलसूक्ष्मप्रपंचस्य सुषुप्त्या बाधमुक्त्वा दृश्यत्वादिति युक्त्यापि बाधमाह प्रबोधेति अर्थयोगाद्विषयसंबंधाज्जातं मनसः प्रबोधरूपं विषयाकारवृत्तिरूपं
यन्नाम तोऽस्य स्वप्नस्थायं पुनः सुप्तस्य पुंसः स्वप्नावस्थायां चार्थवदर्थाकारमेव दृश्यते तथा स्वप्नस्य योरर्थाभावेप्यर्थाकारं दृश्यमानमात्मनः पृथग्भ
वनात्मविशेषणं तद्दृश्यत्वात्तथैव दृश्यतो दृश्यत्वहेतोः शरीरं मनश्च देहप्रतिमानतो देहप्रतिमा नेचतसे स्यार्वविभक्तिकत्वांगीकारात्प्रथमार्थः
सद्दृग्घ्यते देहद्वयवासनात्पंचदृशेरात्मनः पृथक्कृनदृशि वि[illegible]शेषणमिति योजना अतआत्मन्येव दृश्यस्यात्मनि निषेधान्मिथ्यात्वं सुप्तिरू
प्यादिवत्सिद्धमिति भावः ४९ ननु सुषुप्तिप्रध्वस्तनिषेधेनात्मा प्रतिपाद्यते तदा निवृत्तसंसारत्वविशेषयोगाद्विक्रियावत्त्वेनानित्यत्वादि दोषप्र

प्रबोधरूपं मनसोऽर्थयोगजं स्मृतौ च सुप्तस्य च दृश्यतेऽर्थवत् तथैव देहप्रतिमा ततः पृथ
क्दृशेः शरीरं च मनश्च दृश्यतः ४९ स्वभावशुद्धे गगने घनादिके मलेऽपयाते सति वाविशे
षता यथा च तद्वच्छ्रुतिवारितद्वये सदा विशेषो गगनोपमे दृशौ ५० इति स्वप्नसुप्तिप्रकरणं

संगरतिचेन्नेत्याह स्वभावेति यथा स्वभावशुद्धे शुद्धस्वभावे गगने अधिष्ठाने घनादिके मलेसति तस्मिन्नपयाते वा विशेषता न विशेषः क
श्चिदस्ति अविक्रियमेव सदा गगनमित्यर्थः तद्वद्दृशावात्मन्यधिष्ठाने गगनोपमे स्वभावशुद्धे श्रुत्या वारितं वाधितं द्वयं यस्मिं[illegible]स्मिन्सदैव
विशेषः कू[illegible]तेति योजना तथा च संसारनिवृत्ते मिथ्यार्थप्रतियोगिकायाधिष्ठानदशात्मव्यतिरेकेणानिरूपणान्न कोपि विशेष इति भावः
५० इति स्वप्नसुप्तिप्रकरणं चतुर्दशं विवृतम्

स्य

ननु नस्वभावशुद्ध आत्मा तथा सति साधनवैयर्थ्यात्किंतु संसारिस्वभाव एव सन् ज्ञानध्यानादिसाधनानुष्ठानेन स्वभावशुद्धब्रह्मस्वरूपो भविष्यती
ति केचिदिदं कंदेशीयाः प्रतिपेदिरे तन्न अशुद्धेयं शुद्धश्चुमित्तस्य श्रुतियुक्तिबाधितत्वादित्याह नानादिति जीवब्रह्मणोरत्यंतभेद[illegible] किं वा भेदो नो
५९ त्यो विरुद्धस्वभावत्वात्ब्रह्माहमित्येकरूपध्यानज्ञानयोरसंभवात् तदसंभवे वा संसारिब्रह्मभावफलानिष्पत्तेरिति मनसि निधायाद्येदोषमाह नान्यदन्यद्भ
वेद्यस्मादिति यस्मादन्यज्जीवरूपं ब्रह्मिन्नं सदन्यद्ब्रह्म न भवेत्तद्रूपत्वं ति विरोधात्तथा तदेव ब्रह्मणोन्यज्जीवरूपं वस्तु नष्टं सदन्यत्ब्रह्म न भवेत् नष्टत्वादेव
तस्य ब्रह्मभावं प्राप्तुमभावादिति योजना ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतिविरोधः स्फुट एवेति नात्रोदाहृतः यस्मादेवं श्रुतियुक्तिविरुद्धमिदं मतं तत
स्मात्किंचिदितोन्यात्मानमन्यद्ब्रह्मेति न विचिंतयेत्तुमुमुक्षुरिति शेषः किं त्वहमेव ब्रह्मब्रह्मैवाहमिति भेदोपमर्देनैकरूपमेवात्मवस्तु चिंतयेदित्य

नान्यदन्यद्भवेद्यस्मान्नान्यत्किंचिद्विचिंतयेत् अ
न्यस्यान्यत्वभावे हि नाशस्तस्य ध्रुवो भवेत् १

र्थः ननु अन्यस्याप्यन्यात्मतादृष्टा साधनविशेषसाध्या यथौषधविशेषयोगात्ताम्रादेरपि सुवर्णात्मता तद्वदिहापि स्यादित्याशंक्याहान्यस्ये
ति जीवस्य खविरुद्धस्वभावस्यान्यब्रह्मरूपेक्यीभावे तन्नायोगोलकप्रविष्टोदकबिंदुवत्तस्य नाशो ध्रुवो भवेत् यथा च न ब्रह्मभावः पुरुषार्थः
किं त्वनर्थ एव स्यादित्यर्थः दृष्टान्तेऽसंप्रतिपन्नो वह्निरूपाभिभावकनील्यादिवद्रसविशेषस्य ताम्ररूपाभिभावकमात्रत्वात्कालांतरे सुवर्णका राम ५९
लोपगमदर्शनाच्च ताम्रादेस्तत्स्वधर्ममात्रेणेत्यभिप्रायः १

ननु यद्येवमन्यत्र ध्येयं स्यात्तन्निच ध्यानं न संभवत्येकस्मिन् ध्यातृध्येयभावायोगात् कथं तर्हि निदिध्यासनविधिरिति चेदन्यथैवोपपत्तेर्न्न तदर्थमेव
आक्षिपद्य इत्याह स्मर्तुरिति दृश्यं नीलपीतादि स्मर्तुः पुंसो यत्रांतःकरणे तद्वासनारूपं पटेऽर्पितं चित्रमिव दृश्यते येन च चैतन्यात्मना दृश्यते तेउ
पलभ्येते तौ सत्वक्षेत्रज्ञसंज्ञकौ यत्र दृश्यते तत्सत्वं येन दृश्यते स क्षेत्रज्ञ इत्यर्थः तथा चात्मा निदिध्यासितव्य इति विधिनानेरंतर्येणात्मपदार्थवि

स्मर्तोर्दृश्यते दृश्यं पटे चित्रमिवार्पितं य
त्र येन च तौ ज्ञेयौ सत्वक्षेत्रज्ञसंज्ञकौ २

वेकसंपादनमेव कर्तव्यतयोच्यते विविक्तत्वमर्थस्यैव ब्रह्मत्वादहं ब्रह्मास्मीत्यपरोक्षानुभवसंभवात्संसारनिवृत्तिफलसिद्धिः अ
न्यभावनायां तु प्रागुक्तन्यायेनान्यस्यानात्मताऽयोगात्संसारानिवृत्तेर्निःफलो विधिः स्यादिति भावः २

ऽतः करणस्याप्रत्यक्षत्वात्कथं स्मृत्यवस्थायां तस्मिन्नीलपीताद्युपलंभ इत्यत आह फलांतमिति फलांतं सुखादिफलावसानं कर्त्रादिकारकैः
युतं युक्तं यद्वृत्तं पूर्वमनुभूतं तदिदानीं स्मर्यमाणं कर्मस्थं दृश्यं तेन दृष्टं निर्दिष्टं हि यस्मात्तस्मात्पूर्वमपि तत्स्मर्यमाणस्याधिकरणमतः करणं चिं आत्मनः त
६० कर्मैव दृश्यमेवेत्यर्थः अयंभावः पूर्वानुभूतविषयाकारा हि वृत्तिरंतः करणपरिणामात्मिका स्मृतिरित्युच्यते तस्यां हि विषयोभासमानः साश्रयो भा
सतेन हि तदा साक्षिणानुभूयमानस्य विषयस्य वहिराश्रयेऽवस्थानमस्ति तथा चेदं स्मरामीति परामर्शयोग्यतया दृश्यस्थितयानुभवस्यावश्यंभावात्त
दाचित्तमेव स्मर्यमाणाधिकरणतया दृश्यतरेतिसिद्धमंतः करणस्य साक्षिप्रत्यक्षत्वमिति ३ आत्मैव द्रष्टा दृश्यं चेति भाट्टा मेनिरेऽतः स्वगतमेव वास

फलांतं यावदनुभूतं यद्युतं कर्त्रादिकारकैः स्मर्यमाणं हि कर्मस्थं पूर्वकर्मैव नात्मनः ३
द्रष्टुश्चान्यन्न वेद्दृश्यं दृश्यत्वात् घटवत्सदा दृश्यात् द्रष्टाऽसजातीयो न धीवत्सा
क्षितान्यथा ४

नारूपमात्मा यदृश्यतीतीदं स्मरामीत्यनुभवस्यान्यथासिद्धत्वान्नांतः करणस्य साक्षिप्रत्यक्षत्वेनेत्याशंक्याह द्रष्टुश्चेति विमतं दृश्यं द्रष्टुरन्यत् ते
भिन्नं दृश्यत्वाद्घटवदित्युक्ते द्रष्टृदृश्ययोर्भेदेपि परिणामत्वे न साजात्यसंभवात् द्रष्टुः सजातीयमेतद्दृश्यमित्याशंक्याह दृश्यादिति द्रष्टा सदैव
दृश्यादसजातीयो दृश्यांशस्याचेतनत्वादात्मत्वानुपपत्तेरित्यर्थः विपक्षे दोषमाह न धीवदिति अन्यथा द्रष्टृदृश्ययोरसजातीयत्वानंगीकारे द्र राम
ष्टुः परिणामित्वाद्धीवत्साक्षिता आत्मता न स्यादित्यर्थः ४ ६०

ननु न भवत्येवात्मा साक्षी तस्य ब्राह्मणादिजातिमत्तया सविशेषत्वात्कर्माधिकारित्वेन परिणामित्वोपपत्तेरित्याशंक्याह स्वात्मेति असौ जात्यादिर्ब्रा
ह्मणत्वादिः आदिशब्दाद्वयोवृद्धादिग्रहणं ते स्वात्मबुद्धिं स्वस्मिन्नात्मात्मीयाभिमानेऽहंममेति मिथ्यादृष्टिमपेक्ष्य विधीनां प्रयोजकः प्रवर्तकः स्यान्ना
न्यथा यथा शववद्युक्तो तथाहि देहो मम माता मम पिता वेत्यध्यासानुसारेणाहंकारप्रयोजको हि प्रयतते तदभावे न हि प्रयतत इति योजना तेन हे
तुना तद्धानेन शववदेव जात्यादिरात्मधर्मो न भवतीत्यर्थः अन्यथा जात्यादिमत्वे त्वात्मनो घटादिवदनात्मता प्रसज्येतेति योजनीयं तस्मात्सा
क्ष्येवात्मा न कर्माधिकारितया परिणामीति भावः ५५ ननु बाध्यासनिबंधनं कर्तृत्वं विदुषोपि मोक्षाय क्रियानुष्ठानादिति चेन्नेत्याह नप्रि

स्वात्मबुद्धिमपेक्ष्यासौ विधीनां स्यात्प्रयोजकः जात्यादिः शववन्नेन तद्धानात्मतान्यथा ५

नप्रियाप्रियसंस्पृक्तेर्न देहत्वं क्रियाफलं देहयोगः क्रियाहेतुस्तस्माद्विद्वान्क्रियास्त्यजेत ६

येति अदेहत्वमशरीरत्वं हि मोक्षस्तत्र क्रियाफलं क्रियाफलं तु सुखदुःखे प्रसिद्धे ते तु नाशरीरस्य दृष्टे श्रुतेर्वा अशरीरं वाव संतं न प्रि
याप्रिये स्पृशत इत्युक्तेः श्रुत्येवमुक्तत्वादित्यर्थः क्रियाहेतुर्यस्य स क्रियाहेतुर्देहयोगः क्रियया देहसंबंध एव स्याद्यो न मोक्ष इत्यर्थः
यस्मादेवं तस्माद्विद्वांश्च कर्मसाध्या मुक्तिः किंतु ज्ञानैकसाध्येति ज्ञानक्रियाः सर्वा नित्या अहंकारात्मिकः कर्माणि त्यजेत्संन्यासश्रवणादिनिष्ठो भ
वेदित्यर्थः ६

नतुसर्वेषांकर्मणामात्मकर्त्तृत्वप्रतीतेर्नविद्वानक्रियास्त्यक्तुंशक्नुयादितिचेन्नेत्याहकर्मस्विति आत्माचेत्कर्मसुस्वतंत्रःकर्त्तातर्हिनिवृ
त्तौचकर्मत्यागरूपेचतथेष्यतांयथारागादिमान्प्रवृत्तिलक्षणेकर्मणिस्वतंत्रस्तथाविशुद्धसत्वोवीतरागस्तत्त्यागेपिस्वतंत्रइष्यतांकर्मसा
६१ ध्यफलाभिलाषाभावेकर्मत्यागस्यार्थप्राप्तत्वादित्यर्थःएतदेवस्पष्टयत्यदेहत्वइति देहसंबंधशून्येफलेमोक्षलक्षणेऽकार्येकेनापिक
र्मणासाध्येशास्त्रादिनाज्ञातेसतिक्रियाःकथंकुर्यान्नकुर्यादेवताभिःप्रयोजनाभावादित्यर्थः ७ किंक्रियापरित्यागमात्रेणकार्यंविदे

कर्मस्वात्मास्वतंत्रश्चेन्निवृत्तौचतथेष्यतां अदेहत्वेफलेऽकार्येज्ञातेकुर्यात्कथंक्रिया ७
जात्यादीन्संपरित्यज्यनिमित्तंकर्मणांबुधः कर्महेतुविरुद्धंयत्स्वरूपंशास्त्रतःस्मरेत् ८

हकैवल्यंप्राप्यतेनेत्याहजात्यादीनिति बुधःपंडितोबुद्धिमान्कर्मणांनिमित्तंनिमित्तभूतान्जात्यादीन्संपरित्यज्यजात्याद्यभिमानं एम
परित्यज्ययत्स्वरूपंकर्महेतुविरुद्धंकर्मनिमित्तोपमर्दकमुद्भाव्यस्वरूपंतच्छास्त्रतोयथाशास्त्रोक्तंतथास्मरेदनुचिंतयेदित्यर्थः ८ ६१

शास्त्रमेवोदाहरन्स्मर्तव्यमात्मरूपं विशदयत्यात्मैकइत्यादिना यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विजुगुप्सत इति
मंत्रार्थः॥ पूर्वश्लोकेनोच्यते॥ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमिति मंत्रार्थं सार्धश्लोकेनाह पर्यगादिति एषां द्वयोर्जना
सर्वभूतेष्वहमेक एवात्मा न चेतनभेदोस्ति हि किं भूतान्यविकरणमात्मनो नेत्याह तानीति तानि च भूतानि तस्मिन्नात्मन्येवाध्यस्तानि न ततः पृथ
ग्वर्तंते तथा च स्वाध्यस्तसकलविकारानुस्यूतसत्तास्फूर्तिरूपो विकारोपमर्देनानुसंधेय इत्यर्थः खेपथेति श्रुतं सुषिररूपेण बहिरवकाशरूपे
ण वर्तमाने प्रकाशे यथा भूतसंबंधस्तथेत्यर्थः पर्यगादात्मा व्योमवत्स्वसत्तामात्रेण परिसमंतादगात् गतवान्सर्वमशेषमात्मना न किंचिदव्याप्तम
ते स्तीत्यर्थः तथा च ब्राह्मणे नैनेन किंचनानावृतं नैनेन किंचनासंवृतमिति शुक्रमिति मंत्रपदं तस्य व्याख्यानं दीप्तिमदिति प्रकाशस्वभावं शुद्धं

आत्मैकः सर्वभूतेषु तानि तस्मिंश्च खे यथा पर्यगाद्व्योमवत्सर्वं शुक्रं दीप्तिमदिष्यते ९
व्रणस्नाय्वोरभावेन स्थूलं देहं निवारयेत् शुद्धापापतयालेपं लिंगं चाकायमित्युत १०

मात्मस्वरूपमिष्यत इत्यर्थः ९ अव्रणमस्नाविरमिति पदयोरर्थमाह व्रणेति व्रणः क्षतं शिराजालं तयोरभावेन स्थूलदेहात्मत्वमात्मनोऽपोढमित्यर्थ
: शुद्धमपापविद्धमित्यनयोरर्थमाह शुद्धेति शुद्धो रागादिदोषहीनमत एवापापं पुण्यपापहीनं तस्मात्कारणाभावादेव हेतुदुःखादि तद्भव संस्का
रलेपहीनमित्यर्थः अकायमिति मंत्रपदेन सूक्ष्मदेहात्मतां निरसनीयेत्याह लिंगमिति निवारयेदिति सर्वत्रानुषंगः स्थूलसूक्ष्मदेहतत्कार्य
तद्वासनाभ्यो व्यावृत्तः सम एको परिछिन्न आत्मेति सदा चिंतयेदित्यर्थः १०

श्री

यएवं यथोक्तमात्मानं वेत्ति स ब्रह्मविदामुत्तम इत्याह वासुदेव इति वासुदेवो भगवान्कृष्णोऽप्यं[illegible] निकृष्टोपाधौ स्वदेहे चाविर्भूतविज्ञानैश्वर्यश

६२ क्तिमदात्माधिष्ठितेऽन्यत्रोपाधौ च यथा सममविशिष्टमात्मानमब्रवीदश्वत्थः सर्ववृक्षाणामिति वृष्णीनां वासुदेवोऽस्मीति च तद्वद्य आत्मानं स

ममुपाधिकृतवैषम्यापोहेनैकरूपं वेत्ति सोतिशयेन ब्रह्मविदित्यर्थः ११ वासुदेवस्य पुनः सर्वत्र समात्मदर्शनं तस्योपाधिषु ममाहंकाररहितत्वाच्च तद्व

मुमुक्षोरप्यनर्हं तद्वैपरीत्यादित्यत आह यथाहीति अन्यशरीरेषु वहिर्दृश्यमानेषु देहेषु यथा ममाहंता ममाहमोभावो न चेष्यते तेनस्यदृश्यत्वेनानात्मत्व

श्री

वासुदेवो यथाऽश्व[illegible]स्वदेहे चाब्रवीत्समं तद्वद्वेत्तिय आत्मानं समं स ब्रह्मवित्तमः ११

यथा ह्यन्यशरीरेषु ममाहंता न चेष्यते अस्मिन्नप्यापितथा देहे धीसाक्षित्वाविशेषतः १२

निष्प्रयत्नत्वात्तथास्मिन्नप्यापितत्वाभिमते देहे ममाहंता नेष्यते कुतः धीसाक्षित्वाविशेषतः उभयदेहाकारपरिणतबुद्धिसाक्षित्वाविशेषादित्य राम

र्थः तथा चात्मतत्त्वालोचनाया महंकारादेरनवसरत्वाद्वासुदेववत्समात्मदर्शनं युक्तमेवेति भावः १२ ६२

रागद्वेषभयोपलंभाच्चात्मनि शुद्धेऽरपि मानाभाव इति चेत्तत्राह रूपेति नीलादिरूपसंस्कारेण तुल्यः समान आधिराश्रयो ययोस्तौ रागद्वेषौ रूपसंस्का
रतुल्याधीयत्तु भयं तदपि तत्समानाश्रयमिति संस्कारो नाम स्वाश्रयस्य प्रागुद्भूतावस्थासमानावस्थान्तरापादकोऽतीन्द्रियो धर्मः तत श्चायमर्थः रूपा
द्याकारपरिणतांतः करणो हि रूपादिसंस्कारः पुनरपि रूपाद्याकारपरिणाम हेतुर्विद्यते तत्रैव च रागद्वेषौ रूपादिदर्शननिमित्तौ तन्निमित्तकं च भयं
तत्रैव कामः संकल्पो ह्री धीर्भीरित्येतत्सर्वं मन एवेति श्रुतेः यस्माद्धीश्रयं बुद्धिसंश्रयमेव रागद्वेषौ भयं चेति त्रयमात्मना गृह्यते न त्वात्मसंश्रयं तस्मा
त्त्वात्मा शुद्धो रागादिरहितोऽभयश्च सदेति १३ ननु न सदा शुद्ध आत्मा किंतु यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति श्रुतेः यं यं
वापि स्मरन्भावं त्यजत्यंते कलेवरं तं तमेवैति कौंतेय सदा तद्भावभावित इति स्मृतेश्च पूर्वमशुद्धोऽपि पुरुषो ब्रह्मभावनया शुद्धः पश्चात् ब्रह्म

रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत् गृह्यते धीश्रयं तस्मात्त्वात्मा शुद्धोऽभयः सदा १३
यन्मनास्तन्मयोऽन्यत्वेनात्मत्वाद्धि क्रियात्मनि आत्मत्वे चानपेक्षत्वात्सापेक्षं हि न तत्त्व
यम् १४

भविष्यतीत्याशंक्याह यन्मना इति यस्मिन्ध्येये देवादौ मनो यस्य स यन्मनाः ध्यायी पुरुषः स तन्मयो ध्येयदेवादिमयो भवति ध्यातृध्येययोरन्य
त्वे सति ध्यानक्रियायाः शास्त्रार्थवत्वसंभवादित्यर्थः न पुनरात्मत्वात्स आत्मस्वरूपावस्था न प्राप्यधर्मात्मनि क्रियाध्यानादिरूपापेक्ष्यत इत्यर्थः
तत्र हेतुरात्मत्व इति मोक्षरूपस्य ब्रह्मण आत्मत्वे सति तस्य चतुर्विधक्रियाफलविलक्षणत्वात् क्रियाया अनपेक्षत्वादित्यर्थः मोहमा
त्रव्यवधानाच्चात्र न क्रियापेक्षेति विवक्षार्थः विपक्षे दोषमाह सापेक्षं हीति यदि क्रियासापेक्षं कैवल्यं भवेत्तर्हि न तत्त्वयमात्मरूपं न स्यात् क्रि
यासाध्यस्यानात्मत्वादनित्यत्वाच्चेत्यर्थः तस्मात्सदा शुद्ध एवात्मा तस्मिन्नशुद्ध्याभासो मिथ्याध्यास इति भावः १४

विभागादिमत्ताभावाद्विविकरसत्वाच्चात्मा सदा शुद्ध एवास्तु पिपर इत्याह खमिवेति यथैवं खमभावे वा ज्ञप्तिः सहितैस्याज्जन्मविनाशभेदप्रतिभासः क
६३ थमित्याशंक्य चन्द्रराहूपाधिसंसर्गदोषादित्याह चन्द्ररा इति १५ आत्मनः प्रतिपादितममलत्वं विशदयति दृश्यत्वादिति अहमित्येषोऽहम्प्र
तिप्रत्ययोऽनात्मधर्मोऽनात्मनि घटादिरूपत्वाद्धटवत् तथान्येऽपि प्रत्ययाः परिणामाः दोषाः दोषरूपा रागद्वेषादयोऽनात्मधर्मा ज्ञेया हि यस्मादतश्चा
त्माऽमलो हि निर्मल एवेत्यर्थः १६ अहंकारादीनामात्मधर्मत्वाभावेऽपि नात्मनो विशुद्धिः सिध्यति विकारित्वात्परिच्छिन्नत्वाच्चेत्याशंक्या

खमिवैकरसात्तत्त्विरविभक्तोऽन्तरामला चन्द्रराहुप्रधानात्सा विपरीता विभाव्यते १५
दृश्यत्वादहमित्येषोऽनात्मधर्मो घटादिवत् तथान्ये प्रत्यया ज्ञेया दोषाश्चात्माऽमलो ह्यतः १६
सर्वप्रत्ययसाक्षित्वादविकारी च सर्वगः विक्रियेत यदि द्रष्टा बुद्ध्यादीवाल्पविद्भवेत् १७

ह सर्वप्रत्ययेति विपक्षे दोषमाह विक्रियेतेति विक्रियेत परिच्छिन्नो वा यद्यात्मा तदाल्पविद्विषयमात्रावभासको भवेत् बुद्ध्यादीवबु राम
द्धिवित्तमनोवदित्यक्षरार्थः बुद्ध्यादिशब्देन तत्तन्नाभासोऽत्र ह्युच्यते अन्यथा स्वरूपतोऽचेतनत्वाद्वेदनयोगवत्त्वेनाल्पवित्त्ववचनमनु ६३
पपन्नं स्यात् च बुद्धेः साभासाया विषयावभासनमात्रे उपक्षीणे परिणामापायया पूर्वापरानुभूतितदवस्थानतत्प्रत्यायनुसंधानाभा
वो विक्रियावत्त्वान्नरथाद्द्रष्टुरपि विक्रियावत्त्वेऽनुसंधानाभावप्रसंगात्सर्वव्यवहारविलोपप्रसंग इति भावः १७

ऽद्रष्टुरात्मनोपि बुद्धिवदल्पवित्वमेव ज्ञानस्य साधनाधीनस्योत्पत्तिविनाशवत्त्वादिति चेत्तत्राह नदृष्टिरिति यथैव चक्षुरादिद्वारकदृष्टिर्लुप्यते यपरि
णामित्वान्न तथा द्रष्टुरात्मनो दृष्टिर्लुप्यते अपरिणाम्यात्मस्वरूपत्वान्न लुप्यत इत्यर्थः तद्दृष्टेर्नित्यत्वं नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिति हि
श्रुत्योक्तमित्यर्थः यस्मात्प्रमाणसिद्धमिदं तस्मादित्यर्थः सदैकदृक् एकरूपदृष्टिस्वभाव इत्यर्थः सदैकधुगिति पाठे धुंक्ते पश्यतीति धुक् साक्षीत्यर्थः
१८ यस्मादेवमात्मा शुद्धस्वभावोपि सन्नुपाधिसंबंधादन्यथा प्रतीयते तस्मादात्मानं ब्रह्मत्वेन प्रतिपत्तुं पदार्थविवेकं कुर्यादित्युपदेष्टुरित्याह संघा
तोवेति अयमर्थः अहमिति तावदात्मावभासते तत्र भासमानोहं मनुष्यः कृशः स्थूल इत्यादौ भूतसंघातात्मकदेहरूपः स्फुरति तदिदमुच्यते सं

न दृष्टिर्लुप्यते द्रष्टुश्चक्षुरादेर्यथैव तत् न हि द्रष्टुरिति ह्युक्तं तस्माद्द्रष्टास्मि सदैकदृक् १८
संघातो वास्मि भूतानां करणानां तथैव च व्यस्तं वान्यतमो वास्मि को वास्मीति विचारयेत् १९

घातो वास्मि भूतानामिति तत्राहं द्रष्टा श्रोता रसयिता काणो वधिर इति करणेष्वप्यहमुल्लेखो दृश्यते अतः करणसंघातो वाहमिति तथापि प्रत्य
कत्वेन वाहंकारदर्शनाद्व्यस्तमेकैकं चेन्द्रियमहमस्मि अथवैकस्मिन्देहेऽनेकात्मत्वं कदाचिदिष्टमत्यसंभवाद्भोगव्यवस्थानुपपत्तेरन्यतमो वास्मि
इन्द्रियसंघातादन्यो वा तदधिष्ठातास्मि यद्यन्यतमस्तर्हि स केवलं ज्ञः करणग्रामाद्यन्यतमः किं वा तत्साक्षी निर्लिप्तस्वभाव इति विचारयेत् १९

द

न२

विचारफलं पदार्थविवेकं कथयति व्यस्तं नाहमिति ॥ भूतं चेंद्रियं वा समस्तं व्यस्तं वा नाहमस्मि ज्ञेयत्वादचेतनत्वात् घटादिवत् करणत्वात् कुठारादि
वदिति यथायोगं योज्यं तस्मात् ज्ञाता चेतनोऽन्योऽतः करणप्राणादिभ्योऽप्यचेतनेभ्य इति दृष्टदृश्ययोरन्वयव्यतिरेकालोचनेन विवेकः कार्य इत्यर्थ
ः ॥ ६० ॥ इदानीं साक्षिसाक्ष्ययोरन्वयव्यतिरेकालोचनेनावस्थात्रयविवेकद्वारा तत्साक्षिणस्तुरीयस्याधिगमप्रकारमाह आत्माग्नेरित्यादिना तत्रैवं
६४ सति यतः प्राक्तने श्लोके आत्मैवाग्निस्तस्येंधनाद्‌ध्यस्तप्रकाश्यते व्यवहारयोग्यः क्रियतेऽनयेतींधनाबुद्धिरात्मचैतन्यस्य विशेषाकारतयाभिव्यक्ति

व्यस्तं नाहं समस्तं वा भूतमिंद्रियमेव वा ॥ ज्ञेयत्वात्करणत्वाच्च ज्ञातान्योऽस्माद्घटादिवत् ॥ ६० ॥
आत्माग्नेरिंधनाद्बुद्धिरविद्याकामकर्मभिः ॥ दीपिता प्रज्वलत्तस्य द्वारैः श्रोत्रादिभिः सदा ॥ ६१ ॥

कारणभूतेत्यर्थः सा विद्याकामकर्मभिर्दीपिता उत्तेजिता वायुनेवाग्निस्समिंधनमाध्माता सती प्रज्वलति चैतन्यग्रस्ततया प्रकाशमाना जायतेऽ राम
भिव्यक्ताग्निना दह्यमानमिंधनमिवेत्यर्थः गवाक्षेभ्यो निःसृतदीर्घप्रभान्यायेन श्रोत्रादिभिर्द्वारैश्चित्तं स्वज्ञा सती सदा प्रज्वलत्येवेति योजना अ ६४
त्राग्नींधनादिरूपकनिर्देशप्रयोजनं व्यवहारकाले विषयग्रहणस्य होमत्वभावनात्तत्फलं च विषयेष्वासक्तिनिवृत्तिरिति द्रष्टव्यम् ॥ ६२ ॥

एवंविधसुषुप्त्यवस्था जागरणं तस्यामात्मा स्थूलपदार्थमुपभवतीत्याह दक्षिणाक्षीति दक्षिणास्यांगस्य पुरुषश्रेष्ठत्वप्रसिद्धेरिदं विशेषणं दक्षिणाम
क्षिप्रधानं मुख्यं येषां मिंद्रियाणां तेषु बुद्धिर्यदा विचेष्टते व्यापारवती भवतीह विः स्थानीये विषये दीप्ता विषयं व्याप्य तदाकारेण दीप्यमाना सती ति
यावत्तदात्माग्निः स्थूलभुक् स्थूलविषयाणां भोक्ता जागर्तीत्युच्यते इत्यर्थः २२ रूपकनिरूपणफलं स्पष्टयति हृद्यंतरिति रूपादिग्रहणे

दक्षिणाक्षिप्रधानेषु यदा बुद्धिर्विचेष्टते विषये हविषा दीप्त आत्माग्नि
ः स्थूलभुक् तदा २२ हृद्यंतस्तु हवींषीति रूपादिग्रहणे स्मरन् अरागद्वे
षश्चात्माग्नौ जाग्रद्दोषैर्न लिप्यते २३

विषयग्रहणसमये अरागद्वेषः शोभनाशोभनाशोभनाभ्यासेन रागद्वेषावकुर्वन् हवींषीमान्यात्माग्नौ हूयंत इति स्मरन् ध्याय
न्नात्मा जाग्रद्दोषैर्विषयोपलब्धिनिबंधनैः पुण्यापुण्यलक्षणैर्न लिप्यते न संश्लिष्यत इत्यर्थः २३

इदानीं स्वप्नावस्थामाह मानसे त्विति मनःपरिणामोपाधिर्मनसं गृहं सः तत्राभिव्यक्त आत्मा विद्याप्रवृत्तैः कर्मभिर्हेतुभूतैर्वासनाः विद्याकर्मवासनास्तु व्यंते
६५ तो विषयाकारान्पश्यंस्तैजस इत्युक्तो विहृदि तेजसि वासनामये विषयेऽभिव्यक्त इति श्रुतेरित्यर्थः तत्र भासमानकर्तृहेतुर्विद्युत्वादीनां मनोमात्रत्वात्
स्पर्शदृश्यत्वेन वर्तनादवस्थानादात्मनः उपाध्यंतराभावे सति बाह्यस्य चादित्यादिज्योतिषस्तदानीमुपरमादात्मैव स्वयंज्योतिः सन्प्रकाशितः मास्तीभ

मानसे तु गृहे व्यक्तः सो विद्याकर्मवासनाः पश्यंस्तैजस आत्मोक्तः स्वयंज्योतिः प्रकाशिता २४
व विषया वासनो वापि चेद्यंते नैव कर्मभिः यदा तु हृदि तज्ज्ञेयः प्राज्ञ आत्मा घनस्तदा २५

वतीत्यर्थः तथा च श्रुतिः दृष्ट्वैव पुण्यं च पापं चेति अत्रायं पुरुषः स्वयंज्योतिर्भवतीति २४ सुषुप्तिमाह विषया इति यदा तु ह्यावंतः कर
णो विषयाः स्थूलाः वासनाश्च सूक्ष्माः स्वप्नदृश्याश्च कर्मभिर्न चोद्यंते नोद्भूताः क्रियंते तदात्मा प्राज्ञो ज्ञेयः स तत्संज्ञकस्तदा भवतीत्यर्थः प्रज्ञा राम
तिशयात्तदा प्राज्ञ इति सुषुप्तिमभिव्याप्य विशिनष्टि घनस्तदेति अन्यदात्मव्यतिरिक्तं विषयं वासनां वा न पश्यतीत्यतो घनस्तदा अपरिच्छिन्न इ ६५
त्यर्थः २५

एवमवस्थात्रयं तदवस्थे चात्मानं दृश्यभावेन विविच्येदानीमभिमानिसहितावस्थात्रयसाक्षित्वयाविश्वादित्रयापेक्षया तुरीयं प्रत्यं च मात्मानं नित्य
विज्ञप्तिस्वभावमुपलंभयति मनोबुद्धीति इंद्रियाणामवस्था जागरितं मनोवस्था स्वप्नः बुद्ध्यवस्था कारणावस्था साहसुषुप्तिरिति विभागः स्पष्टमन्य
त २६ ननु यद्यात्मा निर्विकार एव साक्षी कथं तर्हि बुद्ध्यादीनां कर्तृत्वं मन्यते तत्राह तथैव सतीति तत्र तस्मिन्नात्मनि एवं सति अवस्थात्रये ध्यसति

मनोबुद्धींद्रियाणां या अवस्थाः कर्मचोदिताः चैतन्येनैव भास्यंते रविणेव घटादयः २६
तथैव सति बुद्धीः स्वात्मभासावभासयन् कर्तृता तासां यदर्थात्तां मूढैरेवाभिधीयते २७

सावस्थाः बुद्धीः आत्मभासा स्वचैतन्याभासेनावभासयन्नात्मा तासां कर्तेति मूढैः शास्त्राचार्योपदेशरहितैरभिधीयते व्यपदिश्यत इति
योजना तथा व्यवहारप्रवृत्तौ निमित्तं च यन्नबुद्धौ विशिनष्टि यदर्थात्ता इति यस्यात्मनः सुखदुःखप्रतिभासार्थात्ताभासयन्निति कर्मोन्मादाति
न्तु स्यवस्थानुगतचिदाभासाविवेकादात्मादर्शनकर्तृत्वं तु मन्यते मूढैरित्यर्थः २७

एवमज्ञानेनात्मकार्यवत्प्रतीतिविवर्तितस्यचिदात्मनोज्ञातत्वमुपाधिनिर्वचनंकृत्वाघसर्वज्ञत्वंसर्वकर्तृत्वंचतस्यैवमायोपाधिकृतमिति विवशादिति सूत्रादपतिस
र्वज्ञोपीति अतएवेत्सूत्रमेवविशदयति स्वेनेति स्वात्मरूपविषयकमायाविवर्तं सर्वं स्वचैतन्येनादित्यप्रकाशवदविकृतेनभासयन् सर्वज्ञस्तु व्यंजेन
६६ पुनःसर्वविषयज्ञानकर्तृत्वेनेत्यर्थः नच्यातत्कृत्स्नायानिर्वेधनमेवात्मनःसर्वज्ञत्वंसर्वकर्तृत्वंतदेवाहसर्वक्रियाहेतोरिति संनिधिमात्रेण श्रा
मकवत्सर्वकारकप्रवृत्तिहेतुत्वादित्यर्थः १८ नदेवमवस्थात्रयसाक्षित्वयाविविक्तशुद्धचिद्रूपस्यात्मनःकार्यकारणात्मकमायोपाधिवशात्ज्ञातत्व

सर्वज्ञोऽप्यतएवस्यात्स्वेनभासावभासयन् सर्वंसर्वक्रियाहेतोःसर्वकृत्त्वंतथात्मनः १८
सोपाधिस्त्वेवमात्मोक्तोनिरूपाख्योऽनुपाधिकः निष्कलोनिर्गुणःशुद्धस्तंमनोवाक्चनाप्नुतः १९

कर्तृत्वसर्वज्ञत्वादिव्यवहारास्पदत्वेनस्वभावतइत्युक्तमर्थमनूद्यकिंतत्स्वाभाविकंविवकल्प्यमात्मस्वरूपमित्यपेक्षायांतदाहसोपाधिरि राम
ति यस्तुनिरूपाख्योविषयतयोत्क्षेत्ववियोग्योनभवतिसोनुपाधिकःसर्वव्यवहारातीतइत्यर्थः गुणावयवरहितत्वाच्छुद्धःकूटस्थइत्यर्थ ६६
ः निरूपाख्यत्वमुक्तंव्यनक्तितमिति १९

मनोवागगम्यत्वं साधयति चेतन इति अयमर्थः अहमितिशब्दप्रत्ययौ तावत्परागव्यावृत्तत्वात्मानं प्रत्यंचमवगाहेते इत्यविवादं तौ चेच्छुध मेवात्मा
नं गोचरयेतां तदा प्रत्यक्षोपलब्धे घटवदाविवादिनां विप्रतिपत्त्यभाव एव स्यात् विप्रतिपद्यंते तु ते देहेंद्रियमनोबुद्धीनामन्यतमो चेतन एव चेतनो वा आ
त्मेति वेदबाह्याः तदन्यश्चेतन इति वेदवादिनः तेषु विवेकिनस्त्वकर्तेति केचित्कर्तेति गतो व्यापकोऽणुपरिमाणो देहपरिमाणो वेति केचित्तु बद्धो जीवो
मुक्तोऽन्य ईश्वरस्तथा सर्वशरीरेषु कोन्वेकोवा शुद्धो रागादिगुणरहितोऽन्यथा तद्युक्तश्चेति ३० अतो विप्रतिपत्तेरयथाभूतात्ममात्रगोचरत्वादसमर्थौ
शब्दप्रत्ययौ शुद्धात्मनीत्याहाप्राप्यैवेति कथमात्माप्राप्तिर्वाचां धियामिति चेत्परमार्थतः प्रवृत्तिबीजाभावादित्याह निर्गुणत्वादिति रूपादिगुणाही
नत्वाद्बाह्येंद्रियद्वारकधीभिस्तावदात्मा न प्राप्यते मनसस्तु बाह्येंद्रियद्वारेपत्त्वं विषयातिरेकेणात्वत्तत्रस्य विषयस्यानिरूपणात्तदगोचरमात्मनं

चेतनोऽचेतनो वापि कर्ताऽकर्ता गतोऽगतः बद्धो मुक्तस्तथा चैकोऽनेकः शुद्धोऽन्यथेति वा ३०
अप्राप्यैव निवर्तंते वाचो धीभिः सहैव तु निर्गुणत्वात्क्रियाभावाद्विशेषाणां ह्यभावतः ३१

नत्वप्राप्नोति क्रियाभावादात्मनो मनोगोचरत्वाभावः नहि क्रियाहीनेऽनवच्छिन्ने वस्तुनि क्रियावदनुगतिमात्रेणाऽपूर्वधर्मोपजनिः संभवति घ
नादिनानुगतेन गगनेन तद्दर्शनात्तस्मादात्मनः संयोगजज्ञानासंभवान्न मनसा प्राप्य आत्मेत्यर्थः तथा विशेषाणां गोधनरूपाणां वाह्यानां स्वग
तानां वा जात्यादीनां प्रवृत्तिनिमित्तानामभावाच्छब्दोपि प्राप्नोत्यात्मानमित्यर्थः तथा च श्रुतिः यतो वाचो निवर्तंते अप्राप्य मनसा सह इति
न च वस्तु प्राग्दृष्टं नापि वाचा नामैर्देवैस्तपसा कर्मणा चेति च ३१

६७ अविषयस्यात्मनःकथंवेदांतवेदनीयत्वमित्याशंक्यतल्लक्षणावर्त्मनेत्यभिप्रेत्याह व्यापकमिति सर्वैर्मूर्तैःसर्वतोवियोजितंपरिच्छिन्नप्रतिभासहेतू
पाधिवर्जितंव्यापकंस्वरूपतोऽपरिच्छिन्नंचव्योमयथातद्वदेवमवस्थात्रयोपाधिवियोजितमवस्थात्रयसाक्षितयालक्षितंसूक्ष्ममात्मानमिहवेदांतसमयेपरंप
दंपरमात्मानंब्रह्मविद्यादितियोजना ३२ एवमात्मतत्त्वेऽवधारितेपुनरवस्थात्रयाभिमानंनकुर्यादित्याह दृष्टमिति दृष्टंजागरितंतद्द्वित्वाद्द्रष्टाश्रोता
मंतेत्यवमेकैकक्रियोपरक्ततयात्माभिमानंत्यक्त्वेत्यर्थः दर्शनाद्यवस्थायामपिनिर्विशेषमेवात्मानंमन्वीतेतिभावः तस्मिन्दृष्टेऽर्थेस्मृतिंस्वप्नंहित्वा
संस्कारद्वारकत्वात्स्वप्नएवेहस्मृतिरुच्यते अहंस्वप्नेदेवोभूवंव्याघ्रोवाऽभूवमितितदभिमानंहित्वेत्यर्थः दृश्यस्यसवासनस्यमनसोविकारत्वेनै
नात्मनइत्यसंगतामात्मनेतुसंदधीतेतिभावः तथातमःसुषुप्तिंत्यजेत्तमसोविशेषणंसर्वग्रइति सर्वंग्रसतीतिसर्वग्रःसोऽतमिदंपदंसुषुप्तेरप्य

व्यापकंसर्वतोव्योममूर्तैःसर्वैर्वियोजितं यथातद्वदिहात्मानंविद्याद्ब्रह्मपरंपदं ३२ दृष्टंहि
त्वास्मृतिंतस्मिन्सर्वग्रंचतमस्त्यजेत सर्वदृक्ज्योतिषांपुंजोदिनकृच्छार्वरंयथा ३३

यमासक्ततयाऽन्यस्तुप्रकाशस्वभावएवात्मानतुमूढोऽज्ञानवानस्वेतिमन्वीतेत्यर्थः कोऽसावस्थात्रयत्यक्तेतितमाह सर्वदृगिति सर्वदृक्सर्व राम
साक्षीप्रत्यगात्माज्योतिषांपुंजोज्योतिषांज्योतिरित्युक्तेनब्रह्मणैकीभूतइत्यर्थः यथादिनकृत्सविताशार्वरंभवंशार्वरंतमःस्वतेजसाग्रसित्वा ६७
निरस्तमस्कएवावतिष्ठतेतथावस्थाविकारहेतुत्वात्तानवस्थाराज्योतिषामभिभूयाऽद्वयानंदस्वभावएवावतिष्ठेतेत्यर्थः ३३

उक्तमेव त्यागप्रकारं प्रकारं प्रकटयन्निरूपयन्नाह इति । रूपस्पर्शांधकाराद्या यस्त्वप्रसुप्तप्रत्ययोऽर्थविषयविषयप्रत्ययानन्ततथो ज्ञातिपस्सा द्वितो गोचरः प्रति मा
स्याः स एवात्मा सर्वभूतेषु द्रष्टा तथापि समो निर्विशेषो यतः सर्वगः परिच्छेदकरहित इत्यर्थः ३४ यद्येवमुक्तस्वभाव एवात्मा कुतस्तस्मिन्बुद्धि
त्र संसारप्रत्ययो दृश्यते इत्याह आत्मबुद्धीति अज्ञानत्वदृशोऽज्ञानोपाधिनिर्बंधन इत्यर्थः ३५ अविद्यातत्कार्योपाधीनामात्मनश्चाविवेकादुपलंभादे
व संसारप्रतिभास इति सिद्धे मुमुक्षोः कर्तव्यमुपदिशति विविच्येति अस्माद्बुद्ध्यादिसंघाताद्धि विच्य स्वमात्मानं विद्यादिति संबंधः स्पष्टमन्यत ३६

रूपस्पर्शांधकाराद्यैः प्रत्ययस्यागोचरः सएवात्मा समो द्रष्टा सर्वभूतेषु सर्वगः ३४ आत्मबुद्धिमनश्चित्तविष
विचित्रो यालोकसंगमात् विचित्रो जायते बुद्धेः प्रत्ययो ज्ञानलक्षणः ३५ विविच्यास्मात्स्वमात्मानं विद्याद्बुद्धेः परं पदं द्व
यारे सर्वभूतस्थं संस्थं भयातिगम् ३६ समस्तं सर्वगं शान्तं विमलं व्योमवत्स्थितं निष्कलं निष्क्रियं सर्वं नित्यं द्वंद्व
विवर्जितम् ३७

विधमेवात्मरूपं पुनर्विशिनष्टि समस्तमिति समस्तमात्मानं सर्वपरं पदं ब्रह्मेति एवंरूपोऽस्म्यहमित्यनुसंदध्यात् अत्र विधिमुखेन प्रतिषेधमुखेन च ये
विशेषा निर्दिष्टास्तानशेषान्साक्षित्वं पदार्थे च तत्पदार्थे ब्रह्मणि अनुसंधायानयोस्तुल्यलक्षणत्वं विज्ञाय तत्त्वमसि वाक्यादहं ब्रह्मेति निश्चिनुया
दिति तात्पर्यार्थः ३७

एवं ब्रह्मात्मरूपेणैव ज्ञानमपि स्तुत्वा पुनर्मुमुक्षुं शिक्षयति सर्वेति सर्वप्रत्ययसाक्षी ज्ञानैकस्वभावो यदुक्तः स कथं कीदृक्स्वभाव इति विमृश्य इत्यादिति योजनी
६८ यं कथं शब्दसूचितं विमर्शमेव विभजते ज्ञेय इति मया ज्ञेयः उत न ज्ञेय इति शेषः यदि ज्ञेयस्तद विज्ञानं प्रतिकर्म वा न वेत्येवं विमृश्य विजानीयात्तत्त्वमात्म
न इत्यर्थः ३८ एवं विमर्शे ज्ञेयत्वपक्षस्तावन्न संगच्छत इत्याह अदृष्टमिति यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपमिति ज्ञेयस्या
ल्पत्वोपदेशाद् ब्रह्मणा परेरदृष्टमविज्ञातमिति च श्रुतिशासनात् ब्रह्मात्मतत्त्वं ज्ञानकर्मत्वेन मयान्यैर्वा कथंचन ज्ञेयमित्यर्थः ३९ यद्येवं ज्ञेयत्वं
न संभवति कथं तर्हि आत्मन्येवात्मानं पश्येदित्याद्युपदेश इत्याशंक्याविषयत्वेनाविर्भावमात्रमेवात्मतत्त्वविज्ञानं न विषयत्वेन यस्यामतं तस्य मतं

सर्वप्रत्ययसाक्षी ज्ञः कथं ज्ञेयो मयेत्युत विमृश्यैवं विजानीयाज्ज्ञानकर्म न वेति वा ३८
अदृष्टं द्रष्टृ विज्ञातं द्रष्टृमित्यादिशासनात् नैव ज्ञेयं मयान्यैर्वा परं ब्रह्म कथंचन ३९
स्वरूपाव्यवधानाभ्यां ज्ञानालोकस्वभावतः अज्ञातानन्यपेक्षत्वाज्ज्ञातं चैव सदा मया ४०

मतं यस्य न वेद स इति श्रुतेरिति मत्वा नोक्तज्ञेयत्वपक्षमपि स्तुतिद्विपति स्वरूपेति यज्ज्ञानस्वरूपादन्यत्तद्द्वयं चक्षुर्व्यवहितं ज्ञानदेशान्तरादागन्तुक राम
ज्ञानसापेक्षसिद्धिकं च ज्ञानविषयतया ज्ञेयं भवति न तथेदमात्मतत्त्वं कथं तर्हि स्वप्रगुणज्ञानालोकस्वभावतो ज्ञानप्रकाशस्वरूपत्वात्स्वरूपाव्यव ६८
धानाभ्यां हेतुभ्यामन्यज्ज्ञानानपेक्षत्वादविषयत्वेन विज्ञातं भवत्यात्मतत्त्वमिति योजना ज्ञातुरेव ब्रह्मत्वोपदेशाज्ज्ञातुश्च स्वज्ञेयत्वानुपपत्ते
रविज्ञातत्वाभावाच्च सदा मया ज्ञातं च ब्रह्मात्मतत्त्वमित्यर्थः ४०

ज्ञानस्वरूपस्य नान्यज्ञानापेक्षेत्येतद्दृष्टान्तेन साधयति नान्येनेति स्पष्टार्थः ४१ दृष्टान्तस्य दार्ष्टान्तिकस्य चैक्यरूपेण युक्तं साधयति न तस्येति आत्मा नान्यतो ज्ञानमपेक्षते न स्वरूपत्वाद्यद्यस्य स्वरूपं तत्तन्नान्यतस्तदपेक्षते यथा प्रकाशरूपः सविता न प्रकाशमन्यतोऽपेक्षते तथा चायं तस्मादेवमित्यर्थः किंच नात्मा प्रकाशान्तरदृश्यः प्रकाशरूपत्वादादित्यवदित्याह प्रकाशान्तरेति ४२ ननु प्रकाशान्तरदृश्यत्वाभावेऽपि स्वरूपप्रकाशदृश्यत्वं किं न स्यात् यथा सविता घटादि प्रकाशयन् स्वात्मानमपि प्रकाशयत्येवमात्मापि दृश्यमवभासयन् स्वात्मानमपि भासयेदिति चेन्नेत्याह व्यक्तिः

नान्येन ज्योतिषा कार्यं रवेरात्मप्रकाशने स्वबोधान्नान्यबोधेच्छा बोधस्यात्मप्रकाशने ४१
न तस्यैवान्यतोऽपेक्षा स्वरूपं यस्य यद्भवेत् प्रकाशान्तरदृश्यो न प्रकाशो ह्यस्ति कश्चन ४२
व्यक्तिः स्यादप्रकाशस्य प्रकाशात्मसमागमात् प्रकाशस्त्वर्के कार्यं स्यादिति मिथ्यावचो मतः ४३

स्यादिति अप्रकाशस्य स्वभावतः प्रकाशहीनस्य प्रकाशात्मसमागमात् प्रकाशस्वभावसंसर्गमात्राद्व्यक्तिरभिव्यक्तिस्तमोनिवृत्तिलक्षणा स्यात् न तत्र प्रकाशगुणोदय इत्यर्थः अतः प्रकाशोऽर्के कार्यं इति मिथ्या व्यपदेशः प्रकाशावगुण्ठिते वस्तुनि प्रकाशोदयाभावेऽपि व्यवहाराभावाद् दर्शनादित्यर्थः तस्माद्भासमानस्वरूपसंसर्ग एव भास्यस्याभिव्यक्तिरिति प्रकाशस्वभावस्य सवितुर्नान्यप्रकाश्यता स्वप्रकाश्यता वास्तीति न दृष्टान्तत्वसिद्धिरतो न दार्ष्टान्तिकसिद्धिस्त्वत्पक्ष इति भावः ४३

६७ घटादिप्रकाशः कस्माद्दर्शकार्यो न भवतीति चेत्तत्राह यतो भवेति यत्तु प्राग्भूत्वा यतो भवेत्तत्तस्य कार्यमिष्यत इति संबंधः स्पष्टमन्यत् ४४ क
थं तर्हि प्रकाशस्वरूपस्यादित्यस्य प्रकाशयितृत्वमात्मनश्च बोधमात्रस्वभावस्य बोद्धृत्वं व्यपदिश्यते तत्राह सत्तामात्र इति प्रकाशस्य सन्नि
धिसत्तामात्रे सति घटादिव्यक्तितो यद्यपि व्यक्ते दर्शनादादित्यादिः प्रकाशस्य कर्तेष्यते यद्वत्तद्वद्बोधरूपेप्यात्मनि सर्वाध्यस्तवस्तुसन्निधिसत्तामा
त्रे सति बोद्धृत्वमिष्यतां मेने क्रियतामिति योजना ४५ स्वगतविकारमंतरेणैवात्मनोर्थप्रकाशकत्वमित्येतदपरि विदृष्टांतेन स्पष्टयति विल्ला
दिति सर्प्पस्य बिलद्वारान्निर्गमिते ज्ञायमाने यद्वत्सूर्यः प्रयत्नेन विना पूर्वसिद्धेनैव स्वज्योतिषावभासयन्प्रकाशको व्यपदिश्यते तद्वदात्मा बो

॥सत्तामात्रे प्रकाशस्य कर्त्रादित्यादिरिष्यते॥ घटादिव्यक्तितो यद्वत्तद्बोधात्मनीष्यतां॥४५॥१

यतोऽभूत्वा भवेद्यत्तु तस्य तत्कार्यमिष्यते स्वरूपत्वादभूत्वा न प्रकाशोऽजायते रवेः ४४ बिलात्सर्प्पस्य निर्याणे सूर्यो
यद्वत्प्रकाशकः प्रयत्नेन विना तद्वद्दाताऽत्मा बोधरूपतः ४६ दग्धेव मुष्णा सत्तायां तद्बोधात्मनीष्यतां सत्येव
यद्वा घोतदत्ता ते सर्व्व इवो [illegible]ति ४७ सत्तामात्रे प्रकाशस्य कर्त्रादित्यादिरिष्यते घटादिव्यक्तितो यद्वत्तद्बोधात्मनी
ष्यतां ४५

धरूपत्वात्प्रयत्नेन विना विकारमंतरेण ज्ञाता व्यपदिश्यत इत्यर्थः ४६ इदानीमुपाधिभावेज्ञातृत्वव्यपदेशात्तदभावे तदभावादौपाधिकमे राम
पत्र वज्ञातृत्वमिति दर्शयितुमुदाहरणमाह दग्धेवमिति यथा दाह्यसन्निधावुष्णस्वरूपस्याग्नेः सत्तामात्रेण दाहकत्वं तथा बोधस्वरूपस्या ६७
प्यात्मनो बोध्यसन्निधिमात्रेण बोद्धृत्वमिष्यतां यस्मादुपाधौ नष्टे सत्येवात्माज्ञाता च्यते यथा बिलादुच्छिते सर्पे उपाधौ नष्टे सत्येव सविता
प्रकाशकः कथ्यते न तदभावे तस्मादौपचारिकमेवात्मनो ज्ञातृत्वव्यपदेश इत्यर्थः ४७

प

औपाधिकं ज्ञातृत्वं आत्मनोऽरविदृष्टांतेन प्रतिपाद्यते नैवदृष्टांतेन कर्तृत्वमप्यौपाधिकं प्रतिपादयति ज्ञातेति यद्यप्ययं आत्मा यत्नरहितोऽपि ज्ञाता व्याख्या
तत्सहत्वगतविशेषस्यापि सन्निधिमात्रेण कारकाणि प्रवर्त्तयन् क्रियाणां कर्त्तेति व्यपदिश्यते भ्रामकवदित्यर्थः भ्रामयति प्रवर्त्तयति प्राकुण्ठेजनसमू
हमिति भ्रामकः सूर्यः यद्वा भ्रामकोऽयस्कांतः स यथा स्वयं चलनादिव्यापाररहितोऽपि लोहकीलादीनां चालको दृष्टस्तथाऽयमपीत्यर्थः तदेवं व्य
क्तिः स्यात्प्रकाशस्येत्यारभ्योक्तं प्रासंगिकमात्मनो ज्ञातृत्वं कर्तृत्वं चौपाधिकं व्यवस्थाप्य प्रकृतमात्मनो ज्ञानकर्मत्वाकर्मत्वाभ्यामज्ञेयज्ञेयत्वपक्ष

ज्ञाताऽयत्नोऽपि तत्सांनिध्यात्कर्त्ता भ्रामकवद्भवेत् स्वरूपे
ण स्वयं नात्मा ज्ञेयोऽज्ञेयोऽथवा ततः ४८

द्वयं समर्थनमुपसंहरति स्वरूपेणेति यतोऽयमात्मा निर्विशेषः स्वभावतोऽस्तु प्रप्रकाशरूपस्ततः स्वयं स्वरूपेणासाधारणस्वभावेन न
ज्ञेयो ज्ञानक्रियाव्याप्यो न भवति तथा नाज्ञेयोऽव्यवहितवस्तुवज्ज्ञानप्रकाशरहित इत्यर्थः अथवेत्यनेन ज्ञाताना वाऽन्यस्याऽज्ञाता वा न भवत्या
त्मा निर्विकारत्वाद्वैतेनान्ययोगाद्वा तथा कर्त्ताकारकाध्यासाधिष्ठानत्वाच्च कर्त्ता च निर्व्यापारत्वादित्यादि विरुद्धप्रतिभासव्यवस्थोपसंहाररूपो वेदित
व्यः ४८

६० श्रीत्मन उक्तेरैयत्वाद्यभावेप्रमाणमाह विदिताविदिताभ्यांतदिति अन्य देवतद्विदितादथो अविदितादधीति श्रुत्याविदिताविदिताभ्यांकार्यकारणा
भ्यामन्यदात्मतत्वंब्रह्मेतिशासनात्कार्यकारणधर्मविलक्षणस्वभावएवायमात्मेत्यर्थः तथाच यथात्मनिज्ञातृत्वकर्तृत्वमकर्तृत्वंकारणत्वमित्यादि
सर्वमविद्यावशाद्देवकल्पितंतथाचबंधोमोक्षः मित्रोमित्रं सुखीदुःखीत्यादयोपिभावा आत्मनिकल्पिता एवेत्याह बंधेति ४९ बंधादीनामात्मनिक
ल्पितत्वेसदृष्टान्तहेतुमाह नाहोरात्र इति अबोधनिबंधनो बंधो बोधनिबंधनो मोक्षस्तयोरभावइत्यर्थः ५० उक्तेनोपायेनोक्तस्वरूपंब्रह्म

विदिताविदिताभ्यांतदन्यदेवेतिशासनात् बंधमोक्षादयोभावास्तद्वदात्मनिकल्पिताः ४९
नाहोरात्रेयथासूर्येप्रभारूपाविशेषतः बोधरूपाविशेषान्नबोधाबोधौतथात्मनि ५० यथो
क्तंब्रह्मयोवेदहानोपादानवर्जितं यथोक्तेनविधानेनससत्यंनैवजायते ५१

विज्ञानतःफलमाह यथोक्तमिति हानोपादानवर्जितमितिहानोपादानकर्तृत्वंकर्मत्वंचयस्यावर्त्तते अनेनसर्वएवविशेषाःप्रतिषिद्धाभ राम०
वंति परिग्रहपरित्यागात्मकत्वात्सर्वविशेषाणामित्यर्थः यथोक्तेनविधानेनपदार्थपरिशोधनप्रकारेणनैवजायतइतिसत्यमितिसंबंध ६०
ःनसभूयोभिजायतइतिस्मृतेरित्यर्थः ५१

यथोक्तब्रह्मवेदनेन विना वियथोक्तफलसिद्धेः कृतं ज्ञानेनेत्याशंक्य नान्यः पंथा विद्यतेऽयनायेत्यादिश्रुतिविरोधान्मैवमित्याह जन्मेति इतएभो
जन्ममृत्युप्रवाहेभ्यः केनचित्साधनांतरेण ५२ उक्तेर्थेन्यत्र्वोपनिषद्वाक्यं प्रमाणयति भिद्यत इति ५३ प्रकरणार्थं संक्षिप्योपसंहरति ममाह
मिति सर्वतः सर्वात्मना ममाहमित्येतत्सविषयमपोह्य त्यक्त्वा नरो मनुष्योऽस्मिन्नर्थे यदि निश्चितो निश्चितमतिः स्यान्नदा स विमुच्यत इति योजना अस्मिन्न

जन्ममृत्युप्रवाहेषु पतितो नैव शक्नुयात् इत उद्धर्तुमात्मानं ज्ञानादन्येन केनचित् ५२ भिद्यते हृदयग्रंथिः
छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे इति श्रुतेः ५३ ममाहमित्येतदपोह्य सर्वतो विमुक्तदे
हे पदमेवरोपमं सुदृष्टशास्त्रानुमितिभ्यईरितं विमुच्यतेऽस्मिन्यदि निश्चितो नरः ५४ इति नान्यदन्यत्प्रकरणं

स्मिन्नर्थे निश्चितन इति तदाह विमुक्तदेहमिति देहद्वयसंबंधशून्यं यस्य तत्त्वंपदं तद्ब्रह्मोवरो ममं निरतिशयं निःप्रपंचमिति यावत्कुतए
वं विधं ब्रह्मात्मस्वरूपमित्यपेक्षायां श्रुतियुक्तिभ्यां निष्ठुरितत्वादत्रासंभावनानास्तीत्यभिप्रेत्यत हि शान षिद्द दृष्टे त्यादी रितमित्यतेनपदं वंवि
ध्वंसम्यग्विचारितशास्त्रानुमानेभ्योऽस्माभिरीरितमस्मिन्निति संबंधः इति नान्यदन्यत्प्रकरणं पंचदशं विहन्तमिति ५

७१ पूर्वस्मिन्प्रकरणे एकदेशिमतप्रतिक्षेपमुखेन ब्रह्मैकत्वज्ञानमेव स्वरूपावस्थानलक्षणमोक्षसाधनं नेन भेदाभेदज्ञानमिति प्रतिपादितम् अधुनास्
वैतार्किकमतप्रतिषेधेन मुमुक्षुं स्वाराज्येभिषेक्तुं प्रकरणांतरमारभमाणः प्रथमं स्थूलशरीरात्मवादिमतं निराकरोति पार्थिव इति यः स्थूलदेहे
कठिनो धातुर्मांसादिरूपः स पार्थिवः पृथिव्यंशः पृथिवीपरिणामात्मकः स्मृतो ज्ञातो विद्वद्भिरित्यर्थः एवं ऊष्मयोऽपयपरिणामः पक्तिः पाकः क्षुब्धा
स्पंदनमवकाशोऽन्नपानमनसांसंचारमार्गो देहगतच्छिद्रयोऽस्तु एतेषु क्रमेण वह्निवाय्वंबरोद्भवा देहानुगतवह्न्याद्यंशकार्यभूताः स्मृता इत्यन्व
यार्थः देहो नात्मा भूतपरिणामत्वाद् हस्तीकादिवदिति भावः १ इंद्रियात्मवादिनं प्रत्याह घ्राणादीनीति घ्राणादीनींद्रियाणि तदर्थास्तेषां विषया

पार्थिवः कठिनोष्मा त्वई वो देहे स्मृतोम्मयः पक्तिचेष्टावकाशाः स्युर्वह्निवाय्वंबरोद्भवाः १
घ्राणादीनि तदर्थाश्च पृथिव्यादिगुणाः क्रमात् रूपालोकवदिष्टं हि सजातीयार्थमिंद्रियं २

गंधादयस्तु क्रमात् पृथिव्यादीनां गुणाः कार्याणीत्यर्थः गंधरसरूपस्पर्शशब्दानां पृथिव्यप्तेजोवाय्वाकाशानां क्रमेण धर्माः प्रसिद्धास्ते
षां घ्राणाद्येकैकेंद्रियग्राह्यता चान्वयव्यतिरेकसिद्धा तथा च यदिंद्रियं यस्य धर्मं ग्राहयति तदिंद्रियं तस्य सजातीयं भवितुमर्हति यथा तै
जसस्य रूपस्य प्रकाशको दीपादिस्तैजसो दृष्टस्तथेंद्रियाण्यपि भौतिकानां प्रकाशकत्वाद्भौतिकान्येवेत्यनुमानमाह रूपालोकवदिति
एवमिंद्रियाणां भौतिकत्वे सिद्धे देहवदेषामप्यनात्मत्वं सिद्धमिति भावः २ राम ७१

किंचेंद्रियाणिनात्मनः करणत्वात्कुठारवदित्यनुमानांतरं सूचयन्कार्यवशादिंद्रियाणामेकादशत्वनियममाह बुद्ध्यर्थानीति एतानि घ्राणादीनि बु
द्ध्यर्थानि ज्ञानकरणान्याहुः वाक्पाणिपादपायूपस्थाख्यानींद्रियाणि कर्मणे कर्मार्थं वचनादानगमनविसर्गानंदार्थं तत्करणान्याहुरित्यर्थः तेषां द
शानामिंद्रियाणां विकल्पार्थं युगपद्बहुविषयसन्निधाने क्रमेणात्तद्विषयज्ञानादिनियमार्थं यदिंद्रियं तन्मनः उक्तदशापेक्षया एकादशं भवेत् मन
श्चैकं साधारणं करणमवश्यमंगीकार्यमन्यथात्म नो युगपदनेकेंद्रियविषयसंप्रयोगे सति युगपदेवानेकज्ञानानि जायेरन्न चैवमस्ति तथा च
तस्यापि मनसः करणत्वादनात्मत्वमिंद्रियवदिति सिद्धं ३ बुद्धिरपिनात्माकरणविशेषत्वान्मनोवदिति बौद्धमतं निराकुर्वंस्तस्याः स्वभावं दर्शयति निश्च

बुद्ध्यर्थान्याहुरेतानि वाक्पाण्यादीनि कर्मणे तद्विकल्पार्थमंतःस्थं मन एकादशं भवेत् ३
निश्चयार्था भवेद्बुद्धिस्तां सर्वार्थानुभाविनीं ज्ञातात्मानः स्वरूपेण ज्योतिषा व्यंजयन् सदा ४

यार्थेति निश्चयोऽर्थपरिच्छेदः सोऽर्थः प्रयोजनं यस्याः अंतःकरणवृत्तेः सा निश्चयार्था बुद्धिर्भवेत् निश्चयकरणं बुद्धिरित्यर्थः अन्यदृश्यत्वाद
पि तस्याः अनात्मत्वमित्याह तामिति बुद्धिज्ञातुरपि बुद्धिवदन्यज्ञेयत्वशंकां वारयति स्वरूपेण ज्योतिषेति तथा च भास्यभासकयोर्घटालो
कयोरिव भेदाद्भास्याया बुद्धेरन्यो भासक आत्मेत्यर्थः ४

यदि बुद्धेरात्माभासकस्तर्हि तयासंसर्गाद् बुद्धिरापद्येतेत्याशंक्य दृष्टांतेन प्रत्याह व्यंजक इति यथालोको व्यंजको दीपालोकादिर्व्यंग्यस्य घटादेरा
७२ कारतां गतः सन् व्यतिकीर्णोपि व्याप्तिमिश्रतयाभासमानोपि वस्तुतोऽसंकीर्णो विविक्तस्वभाव एव भवति तद्वदेव तत्र आत्मा सदा प्रत्ययैर्बुद्धिवृत्तिभिरित्यर्थः
अतो नित्यशुद्ध एवात्मेति भावः ५ यदि बुद्ध्यादेरत्यंतविलक्षणो निर्व्यापार आत्मा कथं तर्हि तस्य तद्वभासकत्वमित्याशंक्य तदपि दृष्टांतेनाह स्थित इति
स्पष्टार्थः ६ तथापि कथं बुद्धिः सुखित्वादिस्फुरणादित्याशंक्याह शरीरेति सुखादयः शरीरादिसंघाते आत्मत्वेन प्रवृत्तां धियं बुद्धिं विशिंषंतीन
त्वात्मानं विलक्षणं नित्यात्मज्योतिषा दीप्तां प्रकाशितां तथा च भास्यभासकबुद्ध्यात्मनोरविवेकादात्मा सुखादिमानिति भ्रांतिरित्यर्थः ७ कुतए

व्यंजकस्तु यथालोको व्यंग्यस्याकारतां गतः व्यतिकीर्णोप्यसंकीर्णस्तद्वद्दृक्प्रत्ययैः सदा ५ स्थितो दीपो यथायत्तः प्राप्तं सर्वं प्रका
शयेत् शब्दाद्याकारबुद्धीर्दृक् प्राप्तास्तद्वत्प्रपश्यति ६ शरीरेंद्रियसंघात आत्मत्वेन गतां धियं नित्यात्मज्योतिषा दीप्तां विशिंष
ति सुखादयः ७ शिरोदुःखादिनात्मानं दुःख्यस्मीति हि पश्यति द्रष्टा नो दुःखि नो हृष्टो द्रष्टृत्वान्न दुःख्यसौ ८ र

वं निश्चय इत्यत आह शिर इति शिर आदिदेहावयवगतेन दुःखेन हि यस्माद् दुःख्यहमस्मीत्यात्मानं पश्यति तस्माद्देहमात्मत्वेन गता बुद्धि र
रिति योजना अयमाशयः आत्मनो विशेषविज्ञानं तु अध्यासनिबंधनमिति हि स्थितिस्तथा च शिरोदुःखी नोदरदुःखी न वा दुःख्यस्मीत्यभिमाना राम
त्मकबुद्ध्यवच्छायां तु विशेषस्यैव दुःखित्वात्सुखदुःखादयो बुद्धिं विशिंषंतीति युक्तं वक्तुमिति द्रष्टा तु दुःखिनो हृष्टपादन्यः आत्मत्वेनाभि ७२
मन्यमानदेहावयवोपघातादिजनितदुःखाकारसाभासबुद्धेर्द्रष्टायाः साक्षी तदन्य एवासौ द्रष्टृत्वादेव न दुःखीत्यर्थः ८

स्यात्

दुःखिनं पश्यतो

द्रष्टृत्वादसौ न दुःखीत्युक्तमेव स्यष्टृ पतिदुःखी स्यादिति अयमात्मा दुःख्यहंमानात् दुःखाकारपरिणामवत्यन्तःकरणोऽहमित्यभिमानात् दुःखीनादुः
खाकारपरिणामवतो दर्शनान्निष्पासन्तु साक्षी नानामपि दुःखित्वप्रसंगइत्यर्थः प्रकृतेति किमायातं तत्राह संहत्त इति रागादिभिर्हस्ताद्यंगे प्रवृत्ते
दीद्रियेषु संहतेन देहे यत्र दुःखं तत्र स्य दुःखस्य दृष्टा य आत्मा साक्षी स नैव दुःखीत्यतिसिद्धमिति शेषः ९ दुःखिनो द्रष्टृत्वेऽपि दुःखित्वमात्मनो
युक्तमिति दृष्टान्ते न शंकते चक्षुर्वदिति यथा चक्षुषो दर्पणादिनिष्ठतया दृश्यत्वेन तस्यैव मुखदेशस्थतया द्रष्टृत्वं च तथात्मनो दुःखसंभिन्नतया दृश्य
त्वे स्वरूपचैतन्यावस्थतया द्रष्टृत्वं चेति कर्मकर्तृत्वविरोधं इत्यर्थः सिद्धान्ती परिहरति नेति कुत इत्यत आह नैकमेव तदिति तद्वस्तु नैकमनेक

त्व

दुःखी स्याद्दुःख्यहंमानो दुःखिनो दर्शनान्न च। संहतेन रागादिभिर्दृष्टा दुःखी दुःखस्य नैव सः ९

चक्षुर्वत्कर्मकर्तृत्वं स्याच्चेत्तन्नैकमेव तत्। संहतं वर्तते नात्मा द्रष्टृत्वात्कर्मतां व्रजेत् १०

काकारमेव संहतं च भवतीत्यतो वृत्ते तस्य कर्मत्वं कर्तृत्वं चांशभेदोपपन्नमित्यक्षरार्थः गोलकांशस्य दर्पणस्थस्य दृश्यत्वं तस्यैव शक्तिम
त्वांशस्य मुखनिविष्टस्य द्रष्टृत्वमिति युक्तमुभयरूपत्वमिति विवक्षितोऽर्थः आत्मनस्तु नैवमंशभेदोऽस्ति एकरूपत्वादसंहतत्वाच्चेत्यभिप्रे
त्याह न तद्वदिति चित्प्रकाशैकस्वभावो ह्यात्मा द्रष्टैव न दृश्यः अंशसंभिन्नो दृश्यांशस्यानात्मत्वात् तेऽद्रष्टृत्वात्कर्मतां न प्राप्नोतीत्यर्थः १०

न्वात्मनोपि ज्ञानादिभिरनेकात्मत्वसंभवाच्चक्षुर्वद्दृश्यमानकत्वस्यादित्याशंक्य प्रत्याह ज्ञानयत्नादीति ज्ञानप्रयत्नेच्छाद्वेषादिगुणभेदैरनेकात्म
कत्वादात्मनोपि केन चिदंशेन विशिष्टस्य ग्राह्यत्वमंशांतरेण ग्राहकत्वं च यदि मतमिति शंकाग्रंथार्थः तुशब्दः शंकानिषेधार्थः नैवमेकत्वानगुण
७३ त्वात्कृत्स्नः प्रज्ञानघन एवेति श्रुत्या ज्ञानैकस्वभावत्वावधारणादनेकात्मत्वायोगाज्ज्योतिर्वन्न स्यान्न कर्मता ग्राह्यता तस्य न संभवतीति परिहार
ग्रंथार्थः ११ दृष्टांतं व्याचष्टे ज्योतिषद्र इति अयमर्थः यथात्मनो ग्राहकांशभेदोभ्युपगम्यते तद्देहवत्कर्त्वं ग्राह्यांशोपि चेतनः किंवा जड इति त
त्राद्यं निराकरोति दृष्टांतेन ज्योतिषद्र इति आदित्यादिज्योतिषो द्योतकत्वेपि प्रकाशनस्वभावत्वेपि नात्मप्रकाशनेन ज्योतिः स्वरूपप्रकाशनेन तद्व
देवं यथा दृष्टांतस्तथा पदेप्यंशभेदकल्पनेपि ज्ञ आत्मा समत्वाच्चेतनत्वस्वभावाविशेषादात्मानं नैव पश्यति न स्वांशं विषयीकरोतीत्यर्थः नह्यिति

ज्ञानयत्नाद्यनेकत्वमात्मनोपि मतं यदि । नैकत्वानगुणत्वात्तु ज्योतिर्वन्न स्यकर्मता ११ ज्योतिषो द्योतकत्वेपि यद्वन्ना
त्मप्रकाशने भेदेप्येवं समत्वाज्ज्ञ आत्मानं नैव पश्यति १२ यद्धर्मा यः पदार्थो न तस्यैवेयात्सकर्मता नह्यात्मानं दहत्य
ग्निस्तथा नैव प्रकाशयेत् १३

योजडाजडयोरंशांशित्वेनाभेदानुपपत्तेश्च ग्राह्यांशस्यात्मत्वमिति नात्मनः स्वविषयत्वसिद्धिरितिहृदयं स्पष्टमेवेत्युपेक्षितमिति द्रष्टव्यं १२
स्वरूपेणांशद्वारेण वा यद्यप्यात्मात्मानं नैव पश्यति तथापि स्वगुणज्ञानस्य कर्मत्वं गमिष्यतीत्याशंक्याह यद्धर्मेति यः पदार्थो यद्धर्मा येनासाधारण राम
धर्मेण धर्मवान् स न तस्यैव धर्मस्य कर्मतां नेयात्तथा च ज्ञानस्वभाव आत्मा ज्ञानेनैव कर्मतां गंतुमर्हतीत्यर्थः दृष्टांतभागः स्पष्टार्थः आत्मा न स्वी ७३
यधर्मव्याप्यः पदार्थत्वादग्निवदित्यर्थः १३

उक्तन्यायेन विज्ञानवादी बौद्धोपि निराकृत इत्याह एतेनैवेति आत्मन इत्यस्मिन्नात्मान इति छांदसः प्रयोगः बुद्धेरात्मनः स्वरूपस्यात्मना स्वेनै-
व ग्रह इति बौद्धपक्षोप्येतेनोक्तदूषणेन प्रबंधेन निराकृत इत्यर्थः स्वरूपस्य स्वरूपेणैव ग्राह्यत्वाभावेपि स्वेनांशेन ग्राह्यत्वमंशांतरेण ग्राहकत्वमि-
ति कल्पनोप्यत्र नदृष्टनेत्याहांशोप्येवमिति एवं प्रागुक्तवर्त्मना तदेवाह समत्वान्निर्भेदत्वादिति १४ एवं बुद्धेः स्वग्राह्यत्वनिराकरणेनार्थाद्ग्रा-
ह्यत्वमुपदिष्टमन्यथा तस्याः साक्षिकत्वाप्रसिद्धेः ननु मा भूत्तर्हि बुद्धिसद्ग्राहकस्त्वपरः शून्यमेवात्मतत्त्वमस्तीति वादिनं निराकरोति शून्यतापीति
एवं सति शून्यतापि न युक्ता यद्यप्ययं बुद्धेः स्वग्राह्यता न युक्ता युक्तिविरोधादेवं शून्यतापि बुद्धेस्तदवभासस्य च न युक्ता अपरोक्षतया तस्याः

एतेनैवात्मनात्मानो ग्रहो बुद्धेर्निराकृतः । अंशोप्येवं समत्वाद्धि निर्भेदत्वान्न युज्यते ॥ १४ ॥
शून्यतापि न युक्तैवं बुद्धेरन्येन दृश्यता । युक्ता नो द्रष्टृवत्तस्याः प्राक्सिद्धेश्च विकल्पतः ॥ १५ ॥

प्रतीयमानत्वादित्यर्थः अतो हेतोर्द्रष्टृवदन्येन साक्षिणा बुद्धेर्ग्राह्यता युक्ता साक्षिणि पर्यवसानात्तस्या अपि न शून्यताशंकेत्यर्थः किंच
तस्या बुद्धेर्विकल्पतो विकल्पनात्प्रागेव तत्साक्षिणः सिद्धेर्न शून्यता कदापीत्यर्थः बुद्धिर्विकल्पनात्पूर्वमेव सुषुप्तावप्यात्मप्रकाश-
सद्भावोंगीकर्तव्योन्यथा सुषुप्तेरसाक्षिकत्वादवस्थांतरे परामर्शानुदयप्रसंगादिति भावः ॥ १५ ॥

किंच यत्कार्यं यदन्वितं दृश्यते तत्तस्य कारणं कार्यविकल्पास्त्वाकूटस्थेऽद्वयथ्याद्यनन्विता अतस्तथा बुद्ध्यादेर्विकल्पस्यासदर्थान्वितत्वोपलभ्यमान
त्वात्साकूटस्थस्तत्कारणत्वमेव समन्नमित्याह अविकल्पमिति सर्वविकल्परहितं कूटस्थमित्यर्थः अकारणकार्योत्पत्तेरनुपपत्तेः कारणसत्त्वमे
७५ ष्टव्यमन्यथा कार्यविशेषार्थिनां कारणविशेषोपादानप्रवृत्तिनियमानुपपत्तिः शून्यस्य सर्वत्र सुलभत्वादिति भावः १६ कूटस्थस्य ब्रह्मात्मनः
कथं कारणत्वे व्यापारवद्धि कारणं नामेत्याशंक्य रज्जुवत्सर्पस्य विवर्ताधिष्ठानतया तस्य कारणत्वं घटते इत्यभिप्रेत्याहाज्ञानमिति अज्ञानमनाद्य
विद्या कूटस्थे प्रत्यगात्मनि ब्रह्मणि सर्वकल्पनायाः मूलं मतद्रूपप्रतिभासहेतुरित्यर्थः तथा च चिदविद्याविवर्तेषु कार्येषु सत्तात्मना भासमानत

अविकल्पं तदस्त्येव यत्पूर्वं स्याद्विकल्पतः विकल्पोऽन्यन्निहितत्वाद्यद्यस्यैव तु कारणं १६
अज्ञानं कल्पनामूलं संसारस्य नियामकं हित्वात्मानं परं ब्रह्म विद्यान्मुक्तं सदाभयं १७

या कारणत्वं कूटस्थस्यापि घटत इति भावः संसारस्य नियामकमिति विशेषणेन सर्वविकल्पनाया अज्ञानमूलत्वेऽन्वयव्यतिरेकाख्यं प्रमाणमनुमा
नं सूचयति तर्ह्यज्ञानविशिष्टमेव किं ब्रह्म प्रत्यक्त्वेनानुसंधेयं नेत्याह हित्वेति सकार्यमज्ञानं हित्वा साक्ष्यत्वेन तत्स्य साक्षिधर्मतां बाधित्वात्मा राम
नं प्रत्यंचं साक्षित्वेनोर्ध्वरितं साक्ष्य बाधया परं ब्रह्म परिपूर्णं मुक्तं कार्यकारणप्रपंचसंसर्गरहितमभयमद्वयमहं ब्रह्मास्मीति महावाक्यार्थभूतं ७५
सदा विद्यादनुसंदध्यादित्यर्थः १७

संसारनियामकमज्ञानंहित्वात्मानंब्रह्मविद्यादित्युक्तंतत्र कः संसारः कथंवात्स्याज्ज्ञानेकारणंनतोकथमात्मनोविवेकःस्यादित्यपेक्षायां ८ माहजा
ग्रदिति जाग्रत्स्वप्नौस्थूलसूक्ष्मविषयभोगलक्षणौ संसार इति शेषः तयोर्बीजं कारणं तमोमयमज्ञानप्रायं सुषुप्ताख्यं सुषुप्तिसंज्ञितं तमोबी
जमितिवक्तव्ये मयपदप्रयोगाद्ज्ञानस्य स्वातंत्र्यं वार्यते साभासं तमोबीजमित्यर्थः एवं कार्यकारणस्वरूपमुक्त्वा तत्त्यागप्रकारमाहान्योन्यस्मि
न्निति स्थूलसूक्ष्मकारणावस्थानामन्योन्यस्मिन्नसत्वात्तत्त्वव्यभिचाराच्चकारादृश्यत्वाच्चैतत्त्रयं रज्जौ दृष्टसर्पधारादिवदनात्मनिततोन्यत्र च

जाग्रत्स्वप्नौ तयोर्बीजं सुषुप्ताख्यं तमोमयं अन्योन्यस्मिन्नसत्वाच्च नास्तीत्येतत्त्रयं त्यजेत् १८
आत्मबुद्धिमनश्चक्षुरालोकाद्यादिसंकरात् भ्रांतिः स्यादात्मकर्मेति क्रियाणां सन्निपाततः १९

नास्तीतिज्ञात्वात्यजेद्विलापयेदात्मानं शोधयेदित्यर्थः १८ त्यजेदित्युक्तेकर्तृत्वप्रतीतेः कथमस्यात्मनो ब्रह्मत्वमित्यत आहात्मबुद्धीति
आत्मा देहः अर्थादीत्यादिपदाद्देशकालादिग्रहः आत्मादीनां संकरान्मिथो गुणप्रधानभावेनाध्यासाद्धेतोः क्रियाणां सन्निपाततः समुद्भवादात्म
कर्म आत्मनः कर्म क्रियेत्यात्मा तदधिष्ठानभूतः कूटस्थोविकरोतीति भ्रांतिः स्यात् तस्मादात्मनः स्वतोनिःक्रियात्वात्त्रिक्रियब्रह्मत्वमविरुद्ध
मित्यर्थः १९

अन्यधर्मस्याप्यन्यत्रारोपे दृष्टांतमाह निमीलेति येन च गोलकस्थानेन निमीलोन्मीलने दृष्टे ते वायव्ये वायुकार्ये क्रियात्मकत्वाद्वायोस्तदाश्रयत्वा
७५ त् न चक्षुरिंद्रियस्य तस्य प्रकाशरूपत्वात् क्रियाश्रयत्वानुपपत्तेः तथापि चक्षुष्येव ते व्यपदिश्येते ऽध्यासाद्यथा एवं मनसि बुद्धौ च चलनाचल
ने न स्तः प्रकाशत्वादेव वस्तुतो न विद्येते तथापि प्राणव्यापाररूपे ते तयोरारोप्येते चंचलं मनः स्थिरा बुद्धिरिति व्यपदेशदर्शनादित्यर्थः २० म
नोबुद्ध्योरसाधारणधर्मकथनपूर्वकं प्रासंगिकमुपपादितमुपसंहरति संकल्पेति संकल्पधर्मकं मनो ऽध्यवसायधर्मिका बुद्धिरिति व्यवस्थे

निमीलोन्मीलने स्थाने वायव्ये तेन चक्षुषः प्रकाशत्वान्मनस्येवं बुद्धौ न स्तः प्रकाशतः २०
संकल्पाध्यवसायौ तु मनोबुद्ध्योर्यथाक्रमात् नेतरेतरधर्मत्वं सर्वं चात्मनि कल्पितं २१

वनसांकर्यमित्यर्थः तस्मात्कूटस्थस्यात्मनः स्वतः कर्तृत्वासंभवाद्विद्यादेश्च जडस्य स्वातंत्र्येण प्रवृत्त्यसंभवाज्जडाजडयोरप्यपरमार्थ राम
तः संबंधानिरूपणात् सर्वं सहेतुकं संसारबंधनमात्मनि कल्पितमध्यस्तं न परमार्थत इति सदैवात्माऽद्वयं ब्रह्मेति सिद्धमित्यर्थः २१ ७५

एवं देहेंद्रियमनोबुद्धिभ्य आत्मवादनिराकरणेन तद्भिन्नतया आत्मा विवेचितः इदानीं देहादिविलक्षणोप्यात्मा देहसमपरिमाण इति जैनमतेनात्मनः
परिछिन्नत्वशंकायां न तस्य बृहत्त्वमुपपद्यते न च तत्त्वस्य सर्वं कल्पितमिति युज्यते कल्पकाभावादित्याशंक्याह स्थानेति इंद्रियाणां देहाद्बहिर्वृत्त्यभावाद्देहा
वयवगोलकस्थानावछेदेन दृष्टिरुपलंभः स्यात् भवतीत्यर्थः स्यादुक्तः तथा च त्वगादीनामिंद्रियाणां यथायोगं देहपरिमाणत्वात्तदात्मतां गता
धीः सेंद्रियदेहतादात्म्यं प्राप्ता बुद्धिः स्यादिति योजना तां बुद्धिं यस्य त्वं भासयन्नात्मा स्वतोऽपरिछिन्नोपि देहमात्र इव देहपरिमाणावछिन्न इव

स्थानावछेदाद्दृष्टिः स्यादिंद्रियाणां तदात्मतां गताधीस्तां हि यस्य त्वं नो देहमात्र इवेक्ष्यते २२

वेक्ष्यते ज्ञायतेऽयं आत्मा प्रतिभासतेऽन्यथा मध्यमपरिमाणस्य बृहदादिवत्सावयवत्वेनानित्यत्वापत्तेः पारलौकिकसाधनप्रवृत्त्यसंभवप्रसंग इति दि
कृत्स्नोपाधिमंतरेणात्मनः स्वतः परिछेदानुपलंभाद्युक्तं तस्य बृहत्त्वं निरवयवस्य च परमार्थत उपाधिसंसर्गायोगाद्युक्तं तस्मिन्सर्वस्य क
ल्पितत्वं चेति भावः २२

७६

दिगंबरमतनिराकरणेन यदनंतत्वमात्मन उक्तं तदसहमानाः शाक्याः प्रत्यवतिष्ठंते क्षणिकं हीति तत्र ज्ञानं ज्ञेयं चेत्युभयं क्षणिकं हि निष्ठि
तं कुतिपयानेकक्षणावर्त्तित्वशंकां वारयन्नत्यर्थमिति स्वरसभंगुरमित्यर्थः धर्म्ममात्रं वस्तुमात्रं न स्थापि किंचित्स्याधिष्ठानमस्तीति मात्रस्या
र्थः तर्हि कथं विच्छेदो नोपलभ्यते तत्राह निरंतरमिति नैरंतर्येणोत्पद्यमानमित्यर्थः यदि सर्वं क्षणिकमेव कथं तर्हि तदेवेदमिति चसो
हमिति दृश्यदृष्टविषये प्रत्यभिज्ञानं वृत्त्वरत्या शंकातिसादृश्यादित्याह सादृश्यादिति तद्धीस्तदेवेदमिति मतिः तद्भ्रांतिस्तस्य स्वाभाविक्यप्रति
भासस्य ज्ञानज्ञेयगतस्यैव न्मूलस्याविवेकस्य च शांतिरस्तमयः प्रतिभासनिवृत्तिरेव पुरुषार्थता मोक्ष इत्यर्थः २३ सिद्धांतीदृषणविभागज्ञा

क्षणिकं हि तदत्यर्थं धर्ममात्रं निरंतरं सादृश्याद्धीः पुनस्तद्धीस्तद्भ्रांतिः पुरुषार्थता २३
स्वाकाराध्यावभासं च येषां रूपादि विद्यते येषां नास्ति ततस्त्वान्यत्सर्वासंगतिरुच्यते २४

नाय बौद्धमतभेदं विविच्य दर्शयति स्वाकारेति स्वाकारस्याध्येन ज्ञानेनावभासोऽस्यास्तीति स्वाकाराध्यावभासं रूपादिवाह्यं वस्तु येषां बौद्धा राम
नां मते विद्यते येषां च ज्ञानमात्रास्तित्ववादिनां मते तत्तोऽवभासाद्भिन्नाद्न्यत्तद्वाह्यं रूपादि नास्ति पूर्वाद्विगतचकारार्थे येषां मते विज्ञानमपि
नास्ति शून्यमेव सर्वमिति तत्र सर्वासंगतिर्वाह्यार्थसत्ववादस्यासंगतिरुच्यमाना नेतां तावदुच्यत इति प्रतिजानीत इति योजना २४ ७६

तस्मात्तस्यासंगतिं प्रतिपादयति वाह्येतिज्ञानस्यैव चावाह्याकारत्वे तो वाह्यवस्त्वाकारत्वप्रसंगादित्यक्षरार्थः ज्ञेयस्योत्पत्तेः प्राक्तावत्तज्ज्ञा
नसंबंधो नास्ति उत्पन्नस्य च स्वरसभंगुरत्वात्कर्मकारकतया ज्ञानात्प्रागवस्था नाभावाज्ज्ञानेन संबंधानिरूपणाच्चोत्पन्नज्ञानानुभववीरोधान्नित्यानु
मेयत्वकल्पनानुपपत्तेश्च परिशेषात्ज्ञानस्यैवाकारो विषय इति विज्ञानमात्रास्तित्ववादिमतप्रवेश इति भावः किंचानुभवितुरपि तन्मते स्वा
लीकत्वादन्यानुभूते न्यस्य स्मृत्यदर्शनादनुभूतविषयस्मृत्यभावश्च प्रसज्येतेत्याह स्मृत्यभाव इति स्वाणात्स्वालीकत्वात्सदा स्मृत्यभा

वाह्याकारत्वतोऽतश्चेः स्मृत्यभावः सदा स्वाणात्
स्वालीकत्वाच्च संस्कारं नैवाधत्ते क्वचित्सुधीः २५

वः प्रसज्येतेत्यर्थः स्मृतिहेतुसंस्कारोपि तदुर्लभ इत्याह स्वालीकत्वादिति धीः क्वचिदपि संस्कारं नैवाधत्ते न निक्षिपति सर्वस्य
स्वालीकत्वादित्यर्थः चशब्दात्वत्रात्मनोपि स्वस्याप्यलीकत्वादित्यर्थः २५

क्वचिदित्युक्तं स्फुटयति आधारस्येति यत्र संस्कार आधातव्यस्त आत्मन्यन्ततः करोतीवात्तस्याप्याधारस्य संस्काराधानकालेऽसत्वात्तुल्यत्वाभाव इ
८१ त्यन्वयः यदुक्तं सादृश्यनिर्वन्धनो भ्रम एव प्रत्यभिज्ञानमिति तद्दूषयति तुल्यतेति इत आरभ्य क्रियमाणे दूषणे क्षणिकविज्ञानमात्र
वादेपि समानं ज्ञेयं तुल्यता निर्निमित्तत इत्येकं पदं तुल्यतायाः पूर्वापरक्षणयोः सदृशत्वस्य निमित्ताभावादित्यर्थः गुणो रूपत्वं चासा
मान्यं सादृश्यव्यवहारनिमित्तं तद्विज्ञानानां नास्ति निर्गुणत्वान्निरवयवत्वाच्च तथा पूर्वोत्तरक्षणयोर्द्वयोरेकस्यासत्वाच्च न सादृश्य
सिद्धिरतस्तुल्यताया असिद्धेर्न तन्निर्वन्धनं प्रत्यभिज्ञानमित्यर्थः अथ पूर्वापरक्षणसादृश्यदृष्टान्ताभावे कश्चिदाशंक्य तेन त्वाहस्था

आधारस्याप्यसत्वाच्च तुल्यता निर्निमित्तता स्थाने वा क्षणिकत्वस्य हानं स्यात्तत इष्यते २६
शान्तेश्चाप्यप्रसिद्धत्वात्साधनोक्तिरनर्थिका एकैकस्मिन्नसमाप्तत्वाच्छान्तेरन्यानपेक्षता २७

नैवेति तत्र क्षणिकत्वहानं नेष्यते त्वयेति शेषः २६ यत्तु क्षणिकत्वादिभावनया ख्यापितवादिभ्रान्तिर्मुक्तिरित्युच्यते बौद्धैस्तद शांति
पि नोपपद्यते इत्याह शान्तेश्चेति शान्तेरप्यसिद्धत्वमेव साधयत्येकैकस्मिन्निति भाव नामैकैकस्मिन् क्षणे समाप्तत्वान्न राम
संतानस्य चावस्तुत्वादेकैकस्मिन् ध्वंसान्यभावाच्छान्तेरन्यनिरपेक्षता सिद्धाऽतस्तस्या यत्नविधानोक्तिर्निरवकाशेत्यर्थः २७ ८१

ना

त

किंचास्मिन्मतेलोकेपिसाध्यसाधनभावोनघटतइत्याहापेक्षायदीति कार्यकारणलक्षणोनामसंबंधविलक्षणत्वात्तिव्यप्यत्यंतव्यावृत्ते
पिक्षीरेयदधिध्वोपेक्षातनापरसंतानेपिकूतादावपिदध्योपेक्षेष्यतामत्यंतभेदाविशेषात्कथंनेष्यतइत्यर्थः तथाचसिद्धतात्योविरुधिम
येतेनातिप्रसंगइतिभावः प्रसिद्धस्वरूपेनातिप्रसंगपरिहारशंकांतदीयामनूद्यनिराकरोतिसर्वार्थइति सर्वस्यजनस्यार्थेऽर्थमानेका
र्यकारणभावेनस्थितेदधिक्षीरादेवस्तुनिक्षणिकेपिकस्मिंश्चित्क्षीरएवकस्यचिद्ध्वोपेक्षानसर्वत्रेतिलोकप्रसिद्धेर्नातिप्रसंगइतिचेदिति
शंकानुवादार्थः तथापिप्रसिद्धाश्रयत्वेपिक्षणिकपक्षेऽन्यानपेक्षतैवेतिपरिहारभागार्थः २८ तत्रहेतुमाहतुल्यकालेति योभावो

अपेक्षायदिभिन्नेपिपरसंतानइष्यतां सर्वार्थक्षणिकेकस्मिंस्तथाप्यन्यानपेक्षता २८
तुल्यकालसमुद्भूतावितरेतरयोगिनौ योगाच्चसंस्कृतोयस्तुसोन्यंहीक्षितुमर्हति २९

तुल्यकालसमुद्भूतावेककालेनतत्त्वात्मकौइतरेतरयोगिनौपरस्परंसंबद्धौचयथायज्ञस्यांकुरोतदोर्मध्येयस्तुभावोंकुरलक्षणःप
ज्ञस्ययोगात्संस्कृतस्वलक्षणातिशयश्चभवेत्सहिखलुन्यस्तुपकारिणमीक्षितुमपेक्षितुमर्हतिनक्षणिकस्तथाप्रसिद्धाभावादतः क्षणिका
नांभिन्नकालतयापरस्परसंबंधाभावेनोपकारकत्वायोगात्रापेक्षाघटयितुंशक्यतइतिभावः २९

पकापे

तदेवंक्षणिकमतंनिराकृत्यशून्यमतंनिराकरिष्यन्नादौस्वमतसामंजस्यमुपन्यस्यतिमिथ्येति यद्वावेदांतिमतेपिब्रह्मात्मनोनाधेयातिशयत्वात्क्ष
७८ णिकमतइवतद्रूपमोक्षानुपपत्तिरित्याशंक्यपरमार्थतोतिशयायोगेपिकल्पयित्वातत्फलितत्वोपपन्नेर्नैवमित्याह मिथ्येतियत्राधिष्ठानेब्रह्मात्मनिक
र्तृत्वादिसंसाराध्यासोमृषामिथ्या अथवामृषाध्यासोऽविद्यानिबंधनोभ्रमःकर्तृत्वादिसंसारप्रतिभासोयत्रस्यादितियोजना तत्राहंब्रह्मास्मी ति
तिविद्ययातत्रैवतन्नाशोध्यस्तनाशइतिनोमतोस्माकंमतमित्यर्थः तथाचयोऽज्ञानाद्दुःखानुभववाँस्तस्यज्ञानाद्दुःखनिवृत्त्यासुखस्वरूपानुभवंपुरु
षार्थइतिवेदांतिमतेसमंजसमितिभावः इदानींशून्यमतेदोषमाहसर्वनाशइति अनुभवितुरभावात्कस्यपुरुषार्थःसर्वनाशइतिवदेत्यर्थः।

मृषाध्यासस्तुयत्रस्यात्तन्नाशस्तत्रनोमतः सर्वनाशोभवेद्यस्मिन्मोक्षःकस्यफलंवद ३०
अस्तितावत्स्वयंनामज्ञानंवात्मान्यदेववा भावाभावज्ञतस्तस्यनाभावस्त्वधिगम्यते ३१

अधिष्ठानारोप्ययोरुभयोरपिनाशेफलाभावात्फलासिद्धेर्मोक्षासिद्धिरितिभावः ३१ सर्वनाशएवमोक्षोबलादापततीयपरमार्थभा
वस्यास्तित्वेप्रमाणाभावादित्याशंक्याहास्तीति स्वयंनामास्तीत्यविवादंसर्ववादिनोसचज्ञानंवाआत्मावाऽन्यद्वाशून्यंवेतिपरंविकल्पस्त राम
स्याभावस्तुनाधिगम्यतेशून्यतातुनप्रामाणिकीत्यर्थः कुतइतितत्राह भावाभावज्ञइति लोकव्यवहारसिद्धार्थानांभावाभावा ७८
भिज्ञत्वादन्यथाखिलस्यकस्यचित्साक्षिणोऽभावेसर्वव्यवहारलोपप्रसंगइत्यर्थः ३१

तस्याप्यभावः कस्यचिन्मदात्तीत्याशंक्य यस्य भातितस्यैव सत्त्वप्राप्तेश्चैशून्यतत्वशंकावकाशइति परिहरति येनेति अथवाऽक्रमेवार्थप्रपंचय
ति येनेति येनाभावोवगम्यते सर्वस्यतत्सदेवस्यात् विपक्षेदोषमाह तन्नचेदित्यादिना अस्तुलोकस्य भावाभावानभिज्ञत्वमितिचेत् नेत्या
हन चेष्यत इति केनापि सोभिज्ञो निराकर्तुं नशक्यते निराकर्तुरेव तत्स्वरूपत्वात्तस्य च सत्त्वात्तस्यापह्नववचनं स्वानुभवविरुद्धमेवेत्यर्थः
३१ यद्यपि भावाभावविभागज्ञं किंचिदक्षीत्यवगतं तथापि तत्कीदृशमिति विशिषतो निर्द्धारणकारणं नास्तीत्याशंक्य तत्स्वरूपमुपपादयति
सदसदिति साक्षिस्वरूपं जगच्च सत्त्वसत्सदसद्रूपमिति त्रयो विकल्पो विवादस्तस्मात्प्रागेव सिद्धं निरात्त्वं नविकल्पानुपपत्तेर्यत्स्वरूपमि

येनाधिगम्यतेऽभावस्तत्सत्स्यात्तन्नचेद्भवेत् भावाभावानभिज्ञत्वं लोकस्यस्यान्नचेष्यते ३१
सदसत्सदसच्चेति विकल्पात्प्रागपदिष्यते तदद्वैतंसमत्वात्तु नित्यंचान्यद्विकल्पितात् ३२

ष्यते तत्त्वमद्वैतं तत्र हेतुः समत्वादिति विकल्पात्प्राग्वैषम्यहेत्वभावादित्यर्थः द्वैतजडविलक्षणाखंडतत्त्वरूपमभिधायाविनाशि
त्वं विशेषोत्तरमाह नित्यं चेति अन्यत विलक्षणात्वेन सत्यत्वं च विशेषोत्तरमाहान्यद्विकल्पितादिति विकल्पात् प्रागपदिष्यत इत्य
त्र स्वतः सिद्धत्वोक्त्या ज्ञानरूपत्वमुक्तं अद्वैतमित्यानंत्यमुक्तं नित्यमिति कूटस्थत्वोक्त्या दुःखाभावस्य सूचितत्वात्तदविनाभूतानंदरू
पता ध्वनिता तथा च सत्यज्ञानानंतानंदरूपमात्मतत्त्वमित्यनुभवादेव सिद्धमिति न तत्र कारणांतरं मृग्यमिति भावः ३२

७७

नानाविधे द्वैते प्रतीयमाने कथमद्वैतमात्मतत्त्वमनुभूयतइत्यत आह यद्वा इत्थं सत्यत्वमुपपाद्य दृश्यस्य विकल्पात्मकतया तत्त्वं प्रतिपाद
यति विकल्पोऽद्वयत इति द्वैतस्यासत्त्वं परमार्थत्वाभाव इष्यतां कुतो विकल्पोऽद्वयतो विकल्परूपेणाऽभूतत्वात्स्वप्नदृश्यवदिति योजना अद्वैतं न
परमार्थसत् दृश्यत्वात्स्वप्नदृश्यवदित्यर्थः हेत्वन्तरमाह प्रागिति सदसत्त्वादिविकल्पनात्प्रागसत्त्वाच्च स्वप्नदृश्यवदिति संबंधः नहि द्वैत
स्यात्मा तत्त्वे प्रमाणमस्तीति भावः ३४ न्यायतो द्वैतमिथ्यात्वमुपपाद्य शास्त्रादपि तस्य मिथ्यात्वमुपपन्नमित्याह वाचारंभणेति वाचा
रंभणं विकारो नामधेयमिति श्रुतिशास्त्राद्विकाराणामभावता सिद्धेति शेषः वाचारंभणशब्दो ह्यनृतत्ववचनोवगम्यते मृत्तिकेत्येव सत्य

विकल्पोऽद्वयतोऽसत्त्वं स्वप्नदृश्यवदिष्यतां द्वैतस्य प्रागसत्त्वाच्च सदसत्त्वादिकल्पनात् ३४

रा वाचारंभणशास्त्राच्च विकाराणां ह्यभावता मृत्योः स मृत्युमित्यादेर्मम मायेति च स्मृतेः ३५

मिति कारणसत्यत्वावधारणादित्यर्थः मृत्योः स मृत्युमिति शास्त्रेण द्वैतदर्शनस्य निंदितत्वात्सत्यत्वे द्वैतस्य तदयोगादर्थादनृत
त्वं तस्योक्तमित्यर्थः आदिशब्दान्नेह नानास्ति किंचनेत्यादि साद्यात् अद्वैतापवादकं शास्त्रं गृह्यते मम माया दुरत्यया मामेव ये प्रपद्यन्ते राम ७७
मायामेतां तरंति ते इति गुणमय्याः सकार्याया मायायाः परमात्मज्ञाननिवर्त्यत्वस्य भगवताऽनुशासनात्तस्याः सत्वे तदनुपपत्तेर्मिथ्या
त्वं द्वैतस्य सिद्धमित्यर्थः ३५

तदेवं श्रुतियुक्तिभ्यां द्वैतमिथ्यात्वप्रतिपादनेनात्मनोऽद्वितीयत्वे दृढीकृते सत्यशुद्धिकारणाभावात्तस्य विशुद्धिरपि सिद्धेत्याह विशुद्धिरिति अस्यात्मनो
विशुद्धिर्धर्माधर्मतत्फलसंस्पर्शाभावोऽत एव द्वैतस्यानृतत्वादेव सञ्चयतो विकल्पाद्विलक्षणा सद्रूपतस्वभावोऽत एव आत्मा नोपादेयो हेयो
वा भवति हानोपादाने हि मूर्त्तविषये नामूर्त्तप्रत्यगात्मनि ते संभवत इत्यर्थः किं चान्यैरकल्पितोऽन्यैः कल्पयितुमशक्यत्वादपि विशुद्ध एवा
त्मेत्यर्थः नहि सर्वकल्पनाधिष्ठानं केनचित्कल्पयितुं शक्यते अतो नित्यशुद्ध इति भावः ३६ कस्मादात्मा कल्पितो न भवतीत्याशंक्याक
ल्पनाहेतोरज्ञानस्य वस्तुत आत्मन्यनात्मनि चाभावादित्याह प्रकाश इति अनात्मनोऽज्ञानकल्पितत्वादेव तत्र तदभाव इति द्रष्टव्यं ३७
यथा नित्यबोधस्वरूपत्वादज्ञानमात्मनि वस्तुतो नास्ति तथा सर्वविक्रियारहितस्वभावत्वादवस्थान्तरं कूटस्थतापरिच्युतिरूपं तस्य नास्तीत्याह तथा

विशुद्धिश्चात एवास्य विकल्पाद्विविक्तलक्षणः उपादेयो न हेयोऽत आत्मा नान्यैरकल्पितः ३६ अप्रकाशो यथादित्ये नास्ति ज्यो
तिःस्वभावतः नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनि ३७ तथाऽविक्रियरूपत्वान्नावस्थान्तरमात्मनः अवस्थान्तरवत्त्वे हि
नाशोऽस्य स्यान्न संशयः ३८ मोक्षोऽवस्थान्तरं यस्य कृतकः स चलो ध्रुवः न संयोगो वियोगो वा मोक्षो युक्तः कथंचन ३९

विक्रियेति विपक्षे दोषमाहावस्थान्तरवत्त्वे हीति ३८ मोक्षस्यावस्थान्तरत्वात्कथमवस्थान्तराभाव इति तत्राह मोक्ष इति यस्य वादिनो
मते मोक्षोऽवस्थान्तरमात्मनः स्यात्तस्य मते कृतको मोक्षः स्यात् प्रागवस्थायां स्थितायां नष्टायां वा तदन्यावस्थायोगित्वानुपपत्तेः ततः स मो
क्षश्चलोऽनित्य एव स्यादिति पुरुषार्थतायन्निरित्यर्थः मा भूदवस्थान्तरं मोक्षस्तस्यापि ब्रह्मणा संयोगो वा प्रकृतेर्वियोगो वा मोक्षो भविष्य
तीति मतान्तरमाशंक्य प्रत्याह न संयोग इति ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

८०

अथुक्तं त्वे हेतुमाह संयोगस्येति कृतकस्यानित्यत्वनियमादित्यर्थः नहु जीवस्य संसारदेशात्परमात्मदेशगमनं वा परमात्मनो वा तत्वोपासका
नुग्रहायतत्प्रत्यागमनं मोक्ष इत्याशंक्याह गमनागमने चैवेति नमोक्षो युक्त इति पूर्वेणान्वयः जीवपरयोर्द्वयोरप्यविक्रियत्वाद्गमनागमनाभा
वादित्यर्थः परमतेदोषमुक्त्वा स्वमते निर्दोषतामाह स्वरूपं त्विति नहीयते न विनश्यति अत आत्मस्वरूपमेव मोक्षो युक्त इत्यर्थः ४० आत्म
स्वरूपस्य मोक्षस्य नित्यत्वेऽकार्यत्वे हेतुमाह स्वरूपस्येति नास्ति निमित्तं कारणं यस्य तदनिमित्तं तस्य भावोऽनिमित्तत्वं तस्मादकार्यत्वादित्यर्थः अ
परे त्वव्रक्षान्तराद्यः सनिमित्ता हीयन्तेऽनित्याः स्युरित्यर्थः स्वरूपस्यानिमित्तत्वं तल्लक्षणोक्त्या साधयन्नुपात्तमिति स्वरूपं हि नाम तद्यत्विना
न्येन चानोपात्तं उपार्जितं न भवति तथा हि विनान्येन वात्यक्तमपि न भवति न ह्युपादेयस्य हेयस्य वा वस्त्वादेः स्वरूपत्वं दृष्टमतो नागन्तुकं वस्तुस्व

संयोगस्याप्यनित्यत्वाद्वियोगस्य तथैव च गमनागमने चैव स्वरूपं तु न हीयते ४० स्वरूपस्यानिमित्तत्वादसनिमित्ता हि चापरे
अनुपात्ते स्वरूपं हि विना त्यक्तं तथैव च ४१ स्वरूपत्वाच्च सर्वस्य त्यक्तुं शक्यो न चान्यतः गृहीतुं वा ततो नित्योऽविषयत्वादपृथक्त्वतः ४२

रूपं किं तु नित्यमेवेत्यर्थः ४१ उक्तं स्वरूपलक्षणमात्मनि लक्षयति स्वरूपत्वादिति सर्वस्याकाशादेः स्वरूपत्वादारोपित
सर्पादेरज्ज्वादिवत्सर्वस्यात्मभूतत्वात्त्यक्तुं ग्रहीतुं वा न शक्य आत्मा कुतो हि यस्मादन्यतोऽन्ये दाभावादित्यर्थः हेयोपादेयत्वाभावे सि राम
द्धं फलितमाह ततो नित्य इति आत्मन उपादानहानयोरयोगे पुनरपि क्रमेणा हेतुद्वयमाह अविषयत्वादपृथक्त्वत इति नह्यविषय ८०
उपादीयते स्वरूपं वा त्यज्यत इति युज्यत इत्यर्थः ४२

आत्मनो नित्यत्वे हेत्वंतरमाह आत्मार्थत्वाच्चेति सर्वस्यागमापायिन आत्मार्थत्वादात्मभोग्यत्वान्नैष्ठ नागमापायी भोक्तात्मा नित्य एवेति
योजना केवलो निरुपाधिरित्यर्थः उपाधितो ऽप्यस्य विशेषो नास्तीत्यर्थः यस्मादात्मा नित्यो ऽन्यत्सर्वमनित्यमात्मार्थं चत्वात्मन्यवस्था
नं च मोक्ष इति सिद्धं तस्मान्मुमुक्षुणा सह साधनैः सर्वकर्म त्याज्यमित्याह त्यजेदिति ४३ इतोऽपि मुमुक्षुणा क्रियास्त्याज्या इत्याह आत्मलाभ
इति आत्मलाभान्न परं विद्यत इति स्मृतिशास्त्रं सर्वस्य त्यागेनाप्यात्मसंरक्षणप्रवृत्तिदर्शनमुपपत्तिः बहुवचनप्रयोगादनेकत्वं शा

आत्मार्थत्वाच्च सर्वस्य नित्य आत्मैव केवलः त्यजेत्तस्मात्क्रियाः सर्वाः साधनैः सह मोक्षवित् ४३
आत्मलाभः परो लाभ इति शास्त्रोपपत्तयः अलाभो ऽन्यात्मलाभस्तु त्यजेत्तस्मादनात्मतां ४४

स्त्रोपपत्तीनां सूचयति आत्मलाभस्य नित्यसिद्धत्वात्किमिदमपूर्वमिवोच्यत इत्यत आह अलाभ इति अन्यस्मिन्नात्मानात्मपरिनि
ष्पन्ने ऽहंकारादावभेदेनात्मस्फुरणमन्यात्मस्फुरणमन्यात्मलाभ उच्यते स तु लाभो न भवति संसारदुःखहेतुत्वात् तत्त्वतः सिद्धपरमा
नंदाविर्भावप्रतिबंधकत्वान्नप्रस्तुतहतिरेवमर्थः तस्मादनात्मतामहंकाराद्यात्माभिमानितामविद्याध्यारोपितां प्रमाणाजनितब्र
ह्मात्मतानेनानात्मनवाधनद्वारा त्यजेदित्यर्थः ४४

८१ आत्मतत्वब्रह्मस्वरूपावगमे आत्मलाभस्तदेव परमो लाभः परमपुरुषार्थ इत्यात्यन्तिकात्ताज्ञानमोक्षसाधनमात्मा चाद्वयानंदरूपस्तस्मिन्नज्ञानमूलः
संसारो न परमार्थतः इति स्वमतमभिधाय तत्रैव मुमुक्षूणां मतिस्थैर्याय मतांतरनिराकरणं कर्तुमारभमाणो भगवान्भाष्यकारः सांख्यकल्पनां ता
वन्निराकरोति गुणानामिति तत्र यत्प्रधाने त्रिगुणात्मके स्वतंत्रमचेतनं पुरुषस्य भोगापवर्गार्थं महदादिरूपेण परिणमत इति कल्पयंति
तावन्न संभवति यतो गुणानां सत्त्वरजस्तमसां साम्यभावस्य सृष्टिप्राक्कालीनमेलनस्य भ्रंशः प्रच्युतिः पूर्वावस्थात्यागेनावस्थांतरापत्तिरूपः परि

गुणानां साम्यभावस्य भ्रंशो न ह्युपपद्यते ॥ अ
विद्यादेः प्रसुप्तत्वात्र चान्यो हेतुरिष्यते ॥ ४५ ॥

णामो दुर्घटत्वान्नोपपद्यते कुत इति चेत्तत्र वक्तव्यं किं निर्हेतुक एव गुणपरिणाम इष्यते सहेतुको वा नाद्यः सदा परिणामप्रसंगात्
द्वितीयेप्यविद्या प्राणपदृष्टपुरुषार्थ एव हेतुस्तदन्यो वा परमेश्वरो नाद्य इत्याह अविद्यादेरिति तस्यामवस्थायामविद्यादेः प्रसुप्तत्वा राम
लीनत्वात्पुरुषाणामुदासीनत्वान्न त्रिविधितः साम्यावस्थाभ्रंश इत्यर्थः न द्वितीय इत्याह न चान्य इति अविद्यादिभ्योन्यः परमेश्व ८१
रांगीकारेऽपसिद्धांतप्रसंग इत्यर्थः ॥ ४५ ॥

गुणानामन्योन्यंप्रवृत्तिहेतुत्वंस्यादितिचेत्तत्राहेतरेति अस्मिन्पक्षेप्रयोजकांतरप्रतीक्षानपेक्षणात्सदाप्रवृत्तिःपरिणामःस्यात्तत्रवास्याद्विशेषाभावा
दित्यर्थः अथक्रमेणोत्पत्तिसंहारलोपप्रसिद्धत्वात्तस्सदातत्संगइति [illegible] तत्राहनियमइतिनियम्यतेनेनेतिनियमोनियामकोहेतुः
प्रकृतीनांगुणानांकार्योत्पत्त्यादीनांगुणेषुसत्वादिषु आत्मनिपुरुषेवाप्यतोनभवेन्नसंभवेदतःसदाप्रवृत्तिरप्रवृत्तिर्वास्यादितिप्रोक्तमा नहिगुणपुरु
षातिरिक्तंकिंचित्तत्वमभ्युपगतमस्तिसांख्यैर्यद्गुणेषुवापुरुषेषुवास्थित्वाप्रवृत्त्यादिनियामकंस्यादित्यर्थः ४६ यथाकथंचिदस्तुवाप्रधानप्र
वृत्तिस्तथापिदोषप्रसक्तिःपरिहर्त्तुंनपार्यतइत्याहविशेषइति तादर्थ्येप्रधानस्यपुरुषार्थत्वेसतिबद्धमुक्तानांबद्धानांमुक्तानांविशेषोन
युज्यतेनहिसर्वपुरुषार्थप्रतिसाधारणेप्रधानस्यैकस्यव्यापारेकेचिद्बद्धाःकेचिन्मुक्ताइतिव्यवस्थोपपद्यतेतस्माच्चसर्वएवसदाबद्धाः

इतरेतरहेतुत्वेप्रवृत्तिःस्यात्सदानवा नियमोनप्रवृत्तीनांगुणेष्वात्मनिवाभवेत् ४६
विशेषोमुक्तबद्धानांतादर्थ्येनचयुज्यते अर्थार्थिनोस्त्वसंबंधोनार्थीतोनेतरोऽपिवा ४७

मुक्ताःसर्वएववसदामुक्तावास्युरित्यर्थः किंचास्मिन्मतेऽर्थार्थिनोःशेषशेषिणोःसंबंधश्चनयुज्यतइत्याह अर्थ्यतेप्रार्थ्यतइत्यर्थ
ःसुखंतत्साधनरूपःपदार्थःसोभिलषितोविद्यतेयस्यसोर्थीतयोःसंबंधउपकार्योपकारकभावलक्षणःसप्रधानवादेनयुज्यतेनघट
तइत्यर्थः कुतइत्यतआहनेति तोत्तानैकस्वभावःपुरुषोनार्थीयुक्तःतस्यासंगत्वनिर्विशेषत्वाभ्युपगमात् नेतरोपिवाप्रधाना
ख्योपिनार्थीजडत्वादेवेत्यर्थः तस्मात्प्रधानस्यपरार्थत्वकल्पनमयुक्तमितिभावः ४७

८२ एवंप्रधानस्यपुरुषान्प्रतिप्रवृत्तिर्मंगीकृत्याव्यवस्थोक्तासापीदानींनघटतइतिसाधयतिप्रधानस्येति पुरुषस्याविकारतःप्रधानकृतातिशययो
गित्वलक्षणाविकाररहितत्वात्प्रधानस्यपारार्थ्यंचनयुक्तमितियोजना नह्यनुविधेयकृतातिशयायोगिनिस्वामित्वमुपपद्यतइत्यर्थः यदिपुरु
षस्यप्रधानंप्रतिस्वाम्योपपत्तयेविकारोभ्युपगम्यते तदंगीकृतेपिविकारेप्रधानस्यपारार्थ्यंनयुज्यते विकारवत्त्वेऽनित्यत्वनियमान्नित्यप्र
धानस्वाम्यायोगादित्यर्थः सांख्यशास्त्रेपीत्यपिशब्दाद्वेदबाह्यशास्त्रेष्वेवाव्यवस्था किंतुसांख्यशास्त्रेपीतितस्यापिपुंबुद्धिमूलत्वेनसम्यगेव

प्रधानस्यचपारार्थ्यंपुरुषस्याविकारतः नयुक्तंसांख्यशास्त्रेपिविकारेपिनयुज्यते ४८
संबंधानुपपत्तेश्चप्रकृतेःपुरुषस्यच मिथोयुक्तंनदर्शितंप्रधानस्याविदितत्वतः ४९

दमतत्त्वमस्तीतिनिषेधोत्पत्ते ४८ प्रधानपुरुषयोःसंबंधाभावमुक्तंप्रपंचयतिसंबंधानुपपत्तेश्चेति पुरुषस्यासंगोदासीनस्वभावत्वात्प्र राम
कृतेर्जडत्वेनक्षतः अन्यत्वमनुपपन्नैतयोर्मिथःसंबंधानुपपत्तेःप्रधानस्यतादर्थ्यंपुरुषार्थत्वमयुक्तंयुक्तिमुक्त्वाअविदितत्वेनोक्तत्वात्प्र ८२
धानस्यभूतवदुपकारकत्वासंभवादित्यर्थः अतःप्रधानपुरुषयोरर्थार्थित्वकल्पनानयुक्तिमतीतिभावः ४९

पुरुषस्याविकारत्वद् उक्तमविकारित्वं स्पष्टयति क्रियोत्पत्ताविति पुरुषे यदि किंचित् क्रियोत्पत्तावभ्युपगम्यमानायां विनाशित्वं तस्य प्रसज्येत यत्क्रियावत्त
दनित्यं यथा घटादीति व्याप्तिदर्शनात् नित्यश्च पुरुषोऽभ्युपगम्यते सांख्यैरित्यर्थः नतु न परिस्पंदः परिणामो वा पुरुषस्य क्रियाभ्युपगम्यते येना
नित्यत्वप्रसंगः किंतु ज्ञानमेव क्रियाभ्युपगम्यत इति चेत् तत्र हि जन्यमजन्यं वा ज्ञानमभ्युपेयते नोभयथापि घटत इत्याह ज्ञानमात्रे च पूर्ववदिति
जन्यज्ञानयोगे विकारित्वादनित्यत्वापत्तिरजन्यज्ञानयोगित्वे न प्रधानं प्रति स्वाम्यसंभवदुक्तदोषापत्तिरित्यर्थः तस्मात्पुरुषस्यासंगोदा
सीनत्वादनाधेयातिशयत्वात्प्रवर्त्तकत्वानुपपत्तेरन्यस्य च हेतुत्वं तस्य प्रधानविकाराद्यतिरिक्तस्यानभ्युपगमात्तत्पेव प्रधानविकाराणाम्

क्रियोत्पत्तौ विनाशित्वं ज्ञानमात्रे च पूर्ववत् निर्नि
मित्तत्वनिर्मोक्षः प्रधानस्य प्रसज्यते ५०

लब्धात्मलाभतया प्रवर्त्तकत्वायोगात् निर्निमित्तैव प्रधानप्रवृत्तिरंगीकार्या तथा चाव्यवस्था तस्यैवेति प्रतिपादयन्नुपसंहरति निर्निमित्तइ
ति प्रधानस्य व्यापारे निर्निमित्तेऽभ्युपगम्यमाने तस्य सर्वदा सर्वात्मना प्रवृत्तिसंभवोऽहकस्यात्किमतो पुरुषाणां तद्दर्शनस्यावर्त्तनीयत्वा
दनिर्मोक्षः प्रसज्येत नत्वेतत्त्वमव्यवस्थितं सांख्यशास्त्रेन मुमुक्षुभिः श्रद्धेयमिति भावः ५०

निर्गुणपुरुषमतप्रक्रियांनिराकृत्यसगुणाःपुरुषाइतिवैशेषिकमतप्रक्रियांदूषयतिनप्रकाश्यमित्यादिना आत्मगतेनज्ञानेनात्मगता
८३ ःसुखादयोगुणाःप्रकाश्यंतइतिहितेमन्यंतेतन्नोपपद्यतेतथाहियथोष्णत्वमग्निनिष्ठमग्निनिष्ठेनप्रकाशेननप्रकाश्यंप्रकाश्यंप्रकाशार्हंन

नप्रकाश्यंयथोष्णत्वंज्ञानेनैवंसुखादयः एक
नीडत्वतोःग्राह्याःस्युःकणादादिवर्त्मनां ५१

भवंतिएकाश्रयत्वादेवंसुखादयोगुणाआत्मनिष्ठाआत्मनिष्ठेनज्ञानेनग्राह्याःस्युःकुतःएकनीडत्वतःएकाश्रयत्वात्कणादादि राम
वर्त्मनांमतइत्यर्थः विषयविषयिणोःसमानदेशत्वेग्राह्यमिदंग्राहकमितिचभेदनियमासिद्धेरितिभावः ५१ ८३
मिद

न केवलमेकाश्रयत्वादेव ज्ञानसुखादीनां भास्यभासकत्वानुपपत्तिरपि तु यौगपद्यासंभवादपीत्याह युगपदिति नेति पूर्वश्लोकादनुवर्त्तनी
यं तथा चायमर्थः सुखविज्ञानयोर्न युगपत्समवेतत्वं संभवति कुतः मनोयोगैकहेतुत्वात् मनःसंयोगस्यासमवायिकारणस्यैकमेवात्म
गुणं प्रति हेतुत्वाभ्युपगमात्तथात्वे सुखासमवायिकारणतामनःसंयोगनाशे सुखस्य नाशात्संयोगांतरासमवायिकारणकज्ञानेन सुखस्य
नग्राह्यत्वं यत्पक्षे तत्रोपपद्यत इति अपिशब्दात्समवायोपि न प्रमाणयुक्तिपथमवतरतीति द्योत्यते चशब्दादात्ममनसोर्निरवयवयोः प्रदेशा

युगपत्समवेतत्वं सुखविज्ञानयोरपि मनो
योगैकहेतुत्वादग्राह्यत्वं सुखस्य च ५२

भावादात्ममनोरिव संयोगानुपपत्तिः संयोगे वा विभोरात्मनो विभागानुपपत्तिस्तदभावे संयोगांतरानुपपत्तौ ज्ञानादिकार्यक्रमानुपपत्ति
ः कार्याणामसमवायिकारणादेशाननतिवर्तित्वनियमदर्शनादन्यत्रेहापि तत्रसंगेऽणुपरिमाणमनःसंयोगस्याणुदेशमात्रवर्तितया तत्का
र्यस्यापि तन्मात्रवर्त्तित्वे सकलशरीरगतात्मवेदनायाअग्राह्यत्वप्रसंग इत्यादिदूषणगणः समुन्नीयते ५२

सुखवदेव हि दुःखेच्छाद्वेषप्रयत्नानामप्याग्राह्यत्वं स्यादित्याह तथेति अन्येषां गुणानां भिन्नत्वात्परस्परविलक्षणत्वात् ज्ञानसुखयोरविभु
८४ पत्तन्मनेष्यते एकस्यात्ममनःसंयोगस्यानेककार्यहेतुत्वासंभवस्योक्तत्वादित्यर्थः चकारादेकाश्रययोर्विषयविषयित्वायोगः पूर्वोक्तः संग
च्छते मा भूत् ज्ञानभासत्वं सुखादीनामेकस्मिन्नात्मनि समवेतत्वमेव तेषां ज्ञानं नाम इत्याशंक्य ज्ञाने न तेषां विशेषितत्वात्मेव मित्याह गुणानामिति
ज्ञातं सुखं ज्ञातं दुःखमिति विशिष्टव्यवहारदर्शनादित्यर्थः ५३ एतदेव विशदयति ज्ञानेनैवेति ज्ञानेन विशेष्यत्वादेव ज्ञानाप्यत्वं सुखादीना
मेष्टव्यमित्यर्थः ज्ञानाहितसंस्कारजन्यस्मृतिविषयत्वादपि ज्ञानाप्यत्वं सुखादेरेष्टव्यमित्याह स्मृतेस्तथेति सुखं मया ज्ञातमित्येवं स्मृतेरि

तथान्येषां च भिन्नत्वाद्युगपत्तन्मनेष्यते गुणानां समवेतत्वं ज्ञानं चेन्न विशेषणात् ५३
ज्ञानेनैवैव विशेष्यत्वात्तज्ज्ञानाप्यत्वमस्य तेन तथा सुखं ज्ञातं मयेत्येवं न वा ज्ञानात्मकत्वतः ५४

तिसंबंधः किंच ज्ञानविशिष्टात्मसमवेतत्वं सुखादेर्ज्ञानमिष्यते केवलात्मसमवेतत्वं वानाद्यो युगपत्सर्वातिकात्मविशेषगुणानां समवायासं राम
भवस्योक्तत्वादात्मगतसंख्यापरिमाणादेरपि ग्रहणाप्रसंगाच्चेत्यभिप्रेत्य द्वितीयं दूषयति तवेति तव मते आत्मनो ज्ञानभिन्नत्वात्सुखस्यैव त ८४
वमात्रत्वात्तत्समवेतत्वमात्रेण न सुखादिसिद्धिः सर्वस्य जडत्वादित्यर्थः ५४

ङ्गीन सुखादीनामात्मगुणत्वाभ्युपगमेन मास्यमासकत्वासंभव उक्तः इदानीं तेषामात्मगुणत्वमपि दुर्भणमित्याह सुखादेरिति सुखादेरात्मधर्म
त्वं न संभवति तेन तव मते आत्मनोऽविकारितो विकारित्वाभावाद्धि ध्रुवत्वांगीकारेण नित्यत्वाभ्युपगमात् न हि नित्यमनित्यगुणकमिति मांप्रति दृष्टांतः
कोपि विद्यतेऽतो नात्मनो गुणवत्त्वसिद्धिः द्रव्यग्राह्यग्राहकत्वकल्पनेति भावः किंच गुणगुणिनोरत्यंतभेदवादिनस्तव मते स्यैवात्मनोयं सुखा
दिरिति नियमोपि दुर्घट इत्याह भेदादिति अन्यस्यात्मांतरस्य मनसो वा कस्मात् सुखादयो गुणा न स्युर्विशेषतो भेदाविशेषादित्यन्वयार्थः अयमा
शयः सर्वात्मनो विभुत्वांगीकाराच्छरीरावच्छेदेनात्मनि सुखादयो जायंते तत्र तदा सर्वात्मनां सत्त्वात् भेदस्य च तत्र तानवगमात् स्यैवात्मनोयं सुखा
य५

सुखादेर्नात्मधर्मत्वमात्मनस्तेऽविकारतः भेदा
दन्यस्य कस्मान्न मनसो वाऽविशेषतः ५५

दिधर्मा नान्यस्येति नियंतुं न शक्यते न मनःसंयोगभेदो नियामको मनसोपि सर्वात्मसंबंधस्याविशेषात् नाप्यदृष्टभेदो नियामकस्तस्याप्या
प्यात्मधर्मत्वासिद्धेः दृष्टहेतुप्रयत्नादेरपि मनःसंयोगनिमित्तकत्वात्तस्य च सर्वात्मसु विशेषासिद्धेरदृष्टस्यादिनाश्रयविशेषसिद्धिरिति
यत्र कुत्रापि जायमानं सुखादि यस्य कस्यापि कस्मान्न स्यात् तत्र यामनसः क्रियावत्त्वान्मूर्तत्वात् सुखादिदेशाव्यभिचाराच्च तस्यैव कस्मान्न धर्माः
सुखादयो न सुविनिगमनाभावादिति ५५

यदपि वैशेषिकैर्ज्ञानस्य ज्ञानांतरवेद्यत्वमिष्यते तदप्ययुक्तमनवस्थाप्रसंगादित्याह स्यान्मालेति अयमर्थः येनात्ममनःसंयोगेन प्रथमं ज्ञानं
जायते तेन तदन्येन संयोगांतरेणापि द्वितीयं ज्ञानांतरं जायते किं वा तेनैव संयोगेन आद्ये दोषमाह स्यादिति ज्ञानं चेत् ज्ञेयतां व्रजेदपरिहार्या ज्ञा
८५ नमाला परंपरा स्यात् ज्ञानानवस्था स्यादित्यर्थः विषयावभाससमये यदि ज्ञानं नावभासेत तदा विषयः स्वयमेव भासते ज्ञानधीनु तथा वेति
विवेक्तुमशक्यत्वात् यदैव ज्ञानभानं ज्ञानांतरमेष्टव्यं तस्याप्यभाने पूर्वज्ञानस्य ज्ञानांतरभासत्वाप्तिर्हि स्तम्भाद्यानायज्ञानांतरमिति दुर्निवाराऽनव
स्था स्यादिति भावः तुशब्दस्त्वार्थः तेन च प्रथमज्ञानोत्पत्त्यनंतरं मनसि क्रिया ततो विभागस्ततः पूर्वसंयोगनाशस्ततः संयोगांतरं ततो ज्ञानांतरमि

स्यान्मालाऽपरिहार्या तु ज्ञानं चेत् ज्ञेयतां व्रजेत्
युगपद्वापि चोत्पत्तिरभ्युपेता न दृष्यते ८६

तिवदुक्तरीत्या वित्तेर्विनोत्पद्यमानमुत्तरज्ञानं पूर्वज्ञानावभासनं कथं कुर्यात् तस्य तदानीमभावादित्यादियुक्त्यंतरं समुच्चीयते अथ द्वितीयं क
ल्पमनूद्याति प्रसंगेन दूषयति युगपद्वेति अपि चानवस्थादोषपरिजिहीर्षया पूर्वोत्तरज्ञानयोरेकस्मादेव संयोगाद्युगपद्वोत्पत्तिरभ्युपेता चे राम
दित्यनुषज्यते तदाऽन्तोऽस्मादेव संयोगाद्युगपत् सर्वविषयरूपरसगंधशब्दस्पर्शज्ञानानामपि तदैवोत्पत्तिरिष्यते दृष्यतां तदा संस्कारोद्बोधस ८५
न्निपातसहकारित्वाभाव तददर्थसन्निधानमप्युत्पत्तिरिष्यतामतोन ज्ञानस्य ज्ञानांतरवेद्यत्वकल्पना युक्तिमतीति स्थितमित्यर्थः ८६

किंचात्मनश्चैतन्यस्वरूपलक्षणमिष्यते तटस्थलक्षणं वा आद्ये पृथिव्यादेर्गंधादिवत्सदातनत्वात्तस्य च स्वरूपानतिरेकादनित्यत्वानआत्मेत्यु
क्तौ दोषएव स्यात् द्वितीये तु स्वरूपलक्षणमन्यदनात्मसाधारणं वक्तव्यं तच्च चेतनातिरिक्तं न किमपि संभावितमस्यतो देहादिजडविलक्ष
णमात्मानमभ्युपगच्छतामसदा निर्विशेषचिद्रूपः कूटस्थएवात्माभ्युपेतव्योऽन्यथा विकारिणोऽनित्यत्वनियमाद्बंधमोक्षाद्युपेक आत्माभ
वतीति हुः संपादमित्येतत्सर्वमभिप्रेत्याहानवस्थांतरत्वाच्चेति नास्त्यवस्थांतरं यस्य सोऽनवस्थांतरस्तस्य भावोऽनवस्थांतरत्वं तस्मादिति विग्रहः आत्मनं

अनवस्थांतरत्वाच्च बंधो नात्मनि विद्यते नाशुद्धि
श्चाप्यसंगत्वादसंसर्गीहीति चक्षते ५७

इति शेषः तथा चात्मनः कूटस्थत्वात्तस्मिंश्चात्मनि बंधो विशेषगुणवत्वलक्षणः परमार्थतो न विद्यते न विद्यते च कारणान्न विद्यते निवृत्तिरूपो मोक्षोऽपि
न विद्यत इति योऽस्यंत तस्मान्नित्यशुद्ध एवात्मेत्यनुपमाणं वदन्नपर कल्पनानिराकरणं कृतमाह नाशुद्धिश्चापीति स्वगतधर्मकृतबंधा
भाववदन्यसंसर्गकृताशुद्धिरपि न चास्यासंगत्वादित्यर्थः ५७

इत्यमुनात्मनः पारमार्थिको बंध इत्याह सूक्ष्मेति सूक्ष्मत्वं मनोवागगम्यत्वमेकत्वमद्वितीयत्वमगोचरत्वं निर्विशेषत्वमेतेभ्यो हेतुभ्यो नि
८६ त्यशुद्ध एवात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेरित्यर्थः यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोप
लिप्यते इति भगवद्वचनेचात्रोदाहर्तव्यं अर्द्धश्लोकः एवमात्मनो नित्यशुद्धबुद्धमुक्तस्वभावत्वे साधयन्तो वेदान्तिन आत्मोपदेशशा
स्त्रानर्थक्यमित्याक्षिपंति पूर्ववादिनः एवं तर्हीति यदीत्यध्याहार्यं यद्येवं नित्यशुद्ध आत्मा तर्हि कथंचन केनापि रूपेण तावद्बंधाभावान्मोक्षो

सूक्ष्मकागोचरेप्यस्य न लिप्यत इति श्रुतेः एवं तर्हि न मोक्षोस्ति बंधाभावात्कथंचन ५८
शास्त्रानर्थक्यमेवं स्यान्न बुद्धेर्भ्रांतिरिष्यते बंधो मोक्षश्च तन्नाशः स यथोक्तो न चान्यथा ५९

पि नास्ति बंधपूर्वकत्वान्मोक्षस्य तदभावे ऽभावात्तथा च मोक्षोपायोपदेशशास्त्रानर्थक्यमेवं स्यादिति ॥ उत्तरमाह न बुद्धेरित्यादिना ५८
बुद्धेर्भ्रांतिर्बंध इष्यत इत्यन्वयः तन्नाशो भ्रांतिनाशो मोक्ष इति चेष्यते न परमार्थतः इत्यर्थः स बंधो यथा पूर्वमुक्तो ऽज्ञानकल्पनामूलं रम
संसारस्य नियामकं इति तथैव न चान्यथा तथा चाज्ञानकल्पितबंधभ्रमनिवृत्त्यर्थत्वादुपदेशशास्त्रस्य नैवैयर्थ्यप्रसंग इत्यर्थः ५९ ८६

अज्ञानमूलबुद्धिधर्माध्यासलक्षणो बंधश्चिदात्मनीत्युक्तमुपपादयति बोधात्मेति बोधस्वरूपस्यात्मनो यज्ज्योतिः प्रकाशश्चिदाभासस्तेन दीप्ता व्याप्ता
प्रकाशिता बुद्धिरात्मनि स्वस्यां बोधं चैतन्यं मन्यते अन्यो बोद्धा साक्षी नास्ति अहमेव बोद्धेति सा सा सा बुद्धिः प्रकाशते तदविवेकादहमेव बोद्धा क
र्तेत्यादिरात्मनि संसारो धीगता भ्रान्तिरेवेत्यर्थः ६० बुद्धेरेव बोधात्मत्वं यथाप्रतीति परमार्थं किं न स्यादिति नेत्याह बोधस्येति बुद्धेरागंतु
कत्वेन बोधव्यभिचारात् बोधस्य च विनापि बुद्धिं सुषुप्ते सद्भावादात्मस्वरूपत्वान्न तु बुद्धौ स उपचर्यते ऽध्यस्य व्यवह्रियते ऽविवेकादित्य

बोधात्मज्योतिषा दीप्ता बोधमात्मनि मन्यते बुद्धिर्नान्योऽस्ति बोद्धेति सेयं भ्रांति
र्हि धीगता ६० बोधस्यात्मस्वरूपत्वान्नित्यं तत्रोपचर्यते अविवेकोप्यना
द्योयं संसारो नान्य इष्यते ६१

र्थः नर्हि सो विवेकः सादिरनादिर्वेति वीक्षायामाहाविवेकोपीति यद्यविवेक एवानाद्यज्ञानकृतत्वादनादिस्तर्हि तस्यैव ब्रह्मा
त्मज्ञानान्निवृत्तिः स्यान्न संसारस्येति भ्रमं वारयति संसारो नान्य इष्यते कर्त्रादिधर्मकबुद्ध्यविवेक एव संसार इत्यर्थः ६१

पदि

बंधस्याज्ञानात्मकत्वे फलितमाह मोक्ष इति ज्ञानादज्ञाननिवृत्यात तत्कार्यबंधनिवृत्तिरेव मुक्तिर्नान्यथाहे यस्योपादेयस्य च मोक्षस्यानुपप
८७ त्ति तोनुपपत्तेरित्यर्थः अनुपपत्तिमेव दृढयन्नपक्षांतरं निराकरोति येषामिति येषां वादिनां स्वरूपादन्यवस्त्वंतरापत्तिरात्मनो मोक्ष इति मतं
नैरात्म्यनाश एव मोक्ष इतीष्टः स्यात्स्थितस्य नष्टस्य वान्यस्यान्यत्वासंभवाद्वस्त्वंतरापत्तिशब्देनैषा प्रवृत्तिर्विवक्ष्यतेति तथापि संयोगादि प्रयोगोनाइति
न्यायेन कृतकस्यानित्यत्वव्याप्तेश्चानित्यो मोक्षः स्यादित्यर्थः ६२ यथा वस्त्वंतरापत्तिर्मोक्ष इति पक्षेऽनुपपत्तिरनित्यत्वापत्तिश्च तथात्मनो

मोक्षस्तन्नाश एव स्यान्नान्यथानुपपत्तितः येषां वस्त्वंतरापत्तिर्मोक्षो नाशस्तु तैर्मतः ६२
अवस्थांतरमप्येवमविकारान्न युज्यते विकारेऽवयवित्वं स्यात्ततो नाशो घटादिवत् ६३

वस्थांतरापत्तिर्मोक्षपक्षेपि सदोषस्तुल्यत्वादित्याहावस्थांतरमप्येवमिति अविकारित्वादात्मनोऽवस्थांतरमपि न युज्यते यदि पुनर्वि राम
कारोऽभ्युपगम्यते तथा सति सावयवत्वमात्मनः स्यात्ततः सावयवत्वान्नाश एव घटादिवत् परिहार्यः स्यात् ततो भ्रांतिनिवृत्तिमात्रमे ८७
व मोक्षो नान्यथा संभवतीत्यर्थः ६३

वेदांतसिद्धांतादन्याबंधमोक्षादिकल्पना वादिभिरुत्प्रेक्षिताः श्रुतिस्मृतिन्यायबाधितत्वान्नादरणीया इत्युक्तमुपरि तदुपसंहरति तस्मादिति द्वा
भ्यां भ्रांतिरेव परिशेषादात्मनि बंधमोक्षप्रतिभास इति कल्पना श्रुत्याद्यविरुद्धा अतोन्या बंधमोक्षादिकल्पना आदिशब्दाद्द्वैतकल्पना व
नादर्तव्या कदाचनेति संबंधः अतोस्मात्सिद्धांतादन्याबंधमोक्षादिकल्पना हि यस्माद्भ्रांतिः प्रमाणाभासात्तस्मान्नादर्तव्येति वाच्यं केषां वा कल्पना
नादर्तव्या इत्यत आह सांख्येति मीमांसाहता विचारविरुद्धा विचारासहा वा कल्पना मीमांसाहतकल्पनेत्यर्थः ६४ अनादरे हेतुमाह शास्त्रेति

तस्माद्भ्रांतिरतोन्या हि बंधमोक्षादिकल्पनाः सांख्यकाणादबौद्धानां मीमांसाहतकल्पना ६४
शास्त्रयुक्तिविहीनत्वान्नादर्तव्याः कदाचन शक्यंते शतशो वक्तुं दोषास्तासां सहस्रशः ६५
अपि निंदोपपत्तेभ्यो यान्यतोऽन्यानि चेत्यतः त्यक्त्वातो ह्यन्यशास्त्रोक्तीर्मतिं कुर्याद्दृढां बुधः ६६

शास्त्रयुक्तिविरुद्धाश्चताः कल्पना इत्याह शक्यंत इति ६५ इतश्च सांख्यादिकल्पना नादर्तव्या इत्याह अपि निंदोपपत्तेरिति यान्यतो
न्यानि शास्त्राणि पृथिव्यां विविधानि वै शंकनीयानि विद्वद्भिर्बुद्धिमभीप्सुभिः या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निः
फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इत्यादिनिंदावचनान्नादर्तव्या इत्यर्थः अतोन्यशास्त्रोक्तीस्त्यक्त्वा दृढां मतिं बुधः कुर्यादित्यन्वयः ६६

कथं मतिं कुर्यात् कुत्र वेत्याकांक्षायामाह श्रद्धेति श्रद्धा आस्तिक्यबुद्धिः विश्वासो भक्तिस्तत्परता ते पुरस्कृत्यादरेणावलंब्येत्यर्थः स्तुतामममन्यत्र
६७ एवमुक्तं परपक्षनिराकरणं संक्षिप्य तत्प्रयोजनं कथयति इतीति इतीत्थं युक्तितः प्रस्तुत्वा निराकृत्याः द्वयवादकल्पना भेदवादक-
८८ ल्पनाः सांख्यादिकल्पनाः इति यावत् तथा निरात्मवादांश्च बौद्धवादांश्च युक्तितः प्रस्तुत्वा इत्यर्थः किमर्थं तदाह व्यपेतेति मुमुक्षवः परवादतः
परशास्त्रेभ्यो व्यपेतशंकाः तत्त्वमार्गे कृतशंकारहिताः संतो ज्ञानपथे वेदान्तोक्तज्ञानमार्गे स्थिराः सुदृढं स्थिता इति योजना ६८

श्रद्धाभक्ती पुरस्कृत्य हित्वा सर्वमनार्जवं वेदांतस्यैव तत्त्वार्थं व्यासस्यापि मतं तथा ६७
इति प्रस्तुत्याद्वयवादकल्पना निरात्मवादांश्च तथा हि युक्तितः व्यपेतशंकाः परवादतः
स्थिरा मुमुक्षवो ज्ञानपथे स्थिता इति ६८ स्वसाक्षिकं ज्ञानमतीव निर्मलं विकल्प-
नाभ्यो विपरीतमद्वयं अवाप्य सम्यग्यदि निष्ठितो भवेन्निरन्वयो निर्वृतिमेति शाश्वतीं ६९

वेदांतविहितब्रह्मात्मज्ञानस्यैव परमपुरुषार्थसाधनत्वमिति तत्स्वरूपकथनपूर्वकं मुमुक्षूणां तन्निष्ठत्वमावश्यकमिति दर्शयति राम
स्वसाक्षिकमिति अद्वयमखंडवस्तुमात्राकारमित्यर्थः निरन्वयो निरस्ताज्ञानतत्कार्यसंबंधः सन्नित्यर्थः शाश्वतीं निर्वृतिं ८८
नित्यानंदानुभवस्वरूपाविर्भावः ६९

यथोक्तज्ञानाधिकारिणां संक्षिप्तविशेषणसारं कथयेत्तत्वनिष्ठालक्षणमाह इदं रहस्यमिति यद्वाप्यशास्त्रंतीनिर्द्दिष्टमितितदिदं रहस्यमुपदे
शैकगम्यं परमं परमात्मतत्वप्रकाशत्वात्सर्वोत्तमं परायणं निरवधिकसर्वाश्रयं परमगतिरूपमिति यावत् एवंविधमात्मतत्वं समीक्ष्य
सम्यगालोच्य हृदि धृत्वेति यावत् व्यपेतदोषैरपगतेंद्रियवहिर्मुखैरभिमानवर्ज्जितैः पांडित्यादिनिमित्तचित्तदोषरहितैः शांतैर्दांतैरिति या
वत् एवंविधैरधिकारिभिरार्ज्जवे ऋजुभावे सर्वसमे ब्रह्मात्मतत्वे मतिर्विधा सदा कार्या विज्ञात्मतत्वमेव ऋजुः सर्वदा सर्वत्रैकरूपत्वात्

इदं रहस्यं परमं परायणं व्यपेतदोषैरभिमानवर्ज्जितैः । समीक्ष्य कार्या
मतिरार्ज्जवे सदा न तत्वदृक्तस्यान्यमतिर्हि कश्चन ॥ ७० ॥

स्वरूपमेवार्ज्जवं नाम तस्य निर्विशेषत्वादिति दृष्टव्यं तथाच ब्रह्मात्मभेदेनात्मज्ञाननिष्ठा तत्वनिष्ठेत्युक्तं भवति एतदेव व्यतिरेक
कथनेन विशदयति न तत्वदृगिति. यः कश्चन तस्यान्यमतिः प्रत्यगात्मनोऽन्यस्मिन्ब्रह्मणि मतिर्यस्य स तस्यान्यमतिः स न तत्वदृक् तत्व
दृष्टिर्न्न भवतीत्यर्थः तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते अथ यो न्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेदेति श्रुतेः ७०

८५ एवमतियत्नलभ्येन ज्ञानेन किं फलं साध्यते तदाह अनेकेति स्पष्टार्थः ७१ इदं ज्ञानमाचार्येण कस्मै दातव्यमित्यपेक्षायां विस्तृतविशेषणमधिकारि
णमाह प्रशांतेति प्रशांतचित्ताय शांतिगुणयुक्ताय वशितेंद्रियाय दांताय प्रहीणदोषायानेकजन्मानुष्ठितयज्ञादिपरितोषितेश्वरप्रसादहतस

अनेकजन्मांतरसंचितैर्नरो विमुच्यतेऽज्ञाननिमित्तपातकैः इदं विदित्वा परमं
हि पावनं न लिप्यते व्योमइवेह कर्म्मभिः ७१ प्रशांतचित्ताय वशितेंद्रियाय च प्र
हीणदोषाय यथोक्तकारिणे गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे ७२ त

मस्तकल्मषाय यथोक्तकारिणे शास्त्रोक्तस्वधर्मस्य यथाशास्त्रमनुष्ठात्रे गुणान्विताय विद्याविनयार्ज्जवादिगुणयुक्ताय सर्वदा दीर्घका राम
लं सततं च नैरंतर्येणानुगताय गुरुमनुसृताय एवंविधाय मुमुक्षवे मोक्षमात्रेनिष्ठावते एतदात्मज्ञानं गुरुणा देयं प्रतिपादयितव्य ८५
मित्यर्थः ७२

एवंविधः शिष्यो महावाक्येनावगमितमात्मतत्त्वं कथमवगच्छति किं वा फलं प्राप्नोतीत्यपेक्षायामाह परस्येति यथा परस्यान्यस्य देहे परस्यापरस्य
नाभिमानिताऽहं ममेत्यभिमानित्वं न भवति तद्वत्स्वदेहेपि परमार्थमीत्या देहातिरिक्तमात्मतत्त्वमीक्ष्यालोच्याभिमानरहितः सन्निति यावत्तच्च
कारान्नत्वतिवादकवेदांतवचांस्यालोच्येति गृह्यते एवंविध इदं ज्ञानं पूर्वोक्तं साक्षात्कारं संप्राप्याथ तदेव सर्वतो मुक्तो भवेन्निरस्ताज्ञानतत्का
र्यसंस्कारपरमानंदाद्वयब्रह्मात्मरूपो भवेदित्यर्थः ७२ किमिति गुणविशेषवद्भिष्यपरीक्षणं गुरोर्यस्मै कस्मैचिच्छिष्यायकस्माद्विद्याप्रदान
यते दीर्त्याह नहीति [illegible] स्वरूपमात्मतत्त्वं लभ्यते ऽनेनेति स्वरूपलाभस्तत्त्वज्ञानं तस्मादभ्यधिको लाभः कश्चन कोपीह देवमनुष्यादि
स्यैति

परस्य देहे न यथाभिमानिता परस्य तद्वत्परमार्थमीक्ष्य च इदं हि विज्ञानमतीव निर्मलं संप्राप्य मुक्तोथ भवेद्धि सर्वतः ७३
न हीह लाभोभ्यधिको ऽस्ति कश्चन स्वरूपलाभात्स इतो हि नान्यतः न देयमैंद्रादपि राज्यतोधिकं स्वरूपलाभं त्वपरीक्ष्य
यत्नतः इति ७४ इति पार्थिवप्रकरणं ॥ ॥

भवपरंपरायां नास्ति आत्मलाभात्परं विद्यत इति स्मृतेः स लाभः इत एव वेदांतवाक्याज्ज्ञान्यतो न्यस्माच्छास्त्रांतरान्न भवति हि यस्मात्तस्मा
द्यत्नतः शिष्यमपरीक्ष्य स्वरूपलाभं तु ज्ञानं न देयं ऐंद्राद्विराज्यतो राज्यादधिकमिति विशेषणेन प्रणाम्याय चांतेवासिने वान्यस्मै क
स्मैचन पद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्याद्देत [illegible] देवततो भूय इति श्रुतिप्रमाणायति ७४ इति पार्थिवप्र
करणं षोडशं विवृतं ॥ ॥

परपक्षनिराकरणमुखेनोक्तं मोक्षसाधनं ज्ञानं स्वप्रक्रियया पि व्यक्तीकर्तुं प्रकरणांतरमारभमाणो देवताभक्तेर्विद्यायाः अंतरंगत्वं द्योतयन्प्रकरण
१० प्रतिपाद्यार्थनमस्काररूपाज्ञेन संक्षिप्याह । आत्मा ज्ञेय इति आत्मा स्वरूपं ज्ञेयः स्वरूपतोऽवधार्यः किं घटादिवद्विषयत्वेन नेत्याह परो ह्यात्मेति हि
यस्मादात्मा सर्वज्ञो ज्ञेयात्परो ज्ञेयत्वधर्मरहितः तत्कुतस्तत्राह यस्मादन्यन्न विद्यत इति यस्मादात्मनः स्वरूपादन्यत्परमार्थतः पृथग्भूतं तद्
र्मीवान्न विद्यते तथा च रूपादिहीनतया चक्षुराद्यगोचरत्वात् स्वसमानजातीयप्रत्यक्षयोग्यत्वेनराभावाच्च व्याप्तिग्रहाभावे सत्यनुमानार्थापत्तिग्रा
ह्यत्वाभावात् सदृशवस्त्वंतराभावेनोपमानाग्राह्यत्वात् षष्ठीजातिगुणक्रियादिधर्मराहित्येन शब्दागोचरत्वात् तत्तत्स्वरूपत्वादेव नास्तीत्यभ्यु
पगंतुमशक्यत्वात् परिशेषाद्विषयभूतदेहेंद्रियांतःकरणप्रत्याख्यानेनावशिष्यत तत्साक्षितयाऽविषयत्वेन स्वयंप्रकाश आत्मा ज्ञेय इत्यर्थः ॥ १

आत्मा ज्ञेयः परो ह्यात्मा यस्मादन्यन्न विद्यते सर्वज्ञः सर्वदृक्शुद्धः तस्मै ज्ञेयात्मने नमः ॥ १

वं त्वंपदार्थं परिशोध्य तस्य तत्पदार्थात्मकत्वं वाक्यार्थं कथयितुं तत्पदार्थमाह सर्वज्ञ इति सामान्यतः सर्वं जानातीति सर्वज्ञः विशेषतः स
र्वं पश्यतीति सर्वदृक् सर्वज्ञत्वमुपलक्षणमुक्त्वा तस्य स्वरूपलक्षणमाह शुद्ध इति अनंत जडपरिच्छिन्न दुःखादिप्रपंचसंसर्गरहितः
सत्यज्ञानानंतानंदरूप इत्यर्थः वाक्यार्थं तत्त्वंपदार्थैक्यमाह तस्मा इति पूर्वोक्तप्रकारेण ज्ञेयश्चासावात्मा च ज्ञेयात्मा तस्मै ज्ञेयात्मने राम
तस्मै सर्वज्ञत्वाद्युपलक्षिताय सत्यादिस्वरूपाय नमः प्रह्वीभावोऽस्तु तन्मे देहादिविलयपर्यवेह नमः शब्दार्थः ॥ १ १०

देवतायां भक्तिवद्गुरुभक्तेरपि विद्याप्राप्त्यंतरंगत्वं यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति श्रुतिसिद्धं द्योतयन्
गुरुपरंपरां प्रणमति पदवाक्येति येर्गुरुभिर्वेदरहस्यं ब्रह्म प्रकाशितं तान्नित्यं प्रणतोस्म्यहमिति संबंधः पदानां वाक्यानां च शक्तितात्पर्यमर्यादया
परिमाणज्ञैः पदवाक्यप्रमाणज्ञैः यद्वा पदवाक्ये प्रसिद्धं प्रमाणमनुमानादि तज्ज्ञैरित्यर्थः दीपभूतैरयत्नेन सर्वार्थप्रकाशकैर्यैरिति संबंधः २
सामान्येनाचार्यपरंपरां नमस्कृत्य विशेषेण स्वगुरुं प्रणामपूर्वकमुद्देशपूर्वं प्रतिज्ञानीते यद्वागिति ब्रह्मविद्याया विनिश्चयो यस्मान्न्यायविशेषाद्व

पदवाक्यप्रमाणज्ञैर्दीपभूतैः प्रकाशितं ब्रह्मवेदरहस्यं यैस्तान्नित्यं प्रणतोस्म्यहं २ यद्वाक्सूर्यांशुसंपातप्रणष्टध्वांतकल्मषः॥
॥ प्रणम्य तान्गुरुन्वक्ष्ये ब्रह्मविद्याविनिश्चयं ३ आत्मलाभात्परो नान्यो लाभः कश्चन विद्यते यदर्था वेदवादाश्च स्मार्त्ता
श्चापि तु याः क्रियाः ४

तितं न्यायविशेषं वक्ष्य इत्यर्थः सुगममन्यत् ३ किमर्थं ब्रह्मविद्याविनिश्चयो वक्ष्यते तदाहात्मलाभादिति आत्मलाभस्य परमत्वे प्र
माणं सूचयति यदर्था इति वेदवादा वेदवचनानि स्मार्त्ताश्च वादाः स्मृतिवचनानि साक्षात् ज्ञानार्थाः वेदवादाः स्मृतिवादाश्च यदर्था
ः अपि तु याः क्रियाः कर्माणि वेदस्मृतिविहितानि ताश्च चित्तशुद्धिपरंपरया यदर्थास्तस्मादात्मलाभादिति संबंधः ४

९१ पुत्रादिलाभापेक्षया आत्मलाभस्य परत्वं प्रामाणिकमित्युक्तमुपपादयत्यात्मार्थोपीति योपि लाभः पुत्रधनादिविषयो लोके सुखायेष्टः सोप्या-
त्मार्थ आत्मसुखार्थ इति हि प्रसिद्धमिति योजना तर्हि पुत्रादिलाभेनैवात्मसुखसिद्धेः किमित्यात्मज्ञानमात्मलाभापेक्षयैव विशेषाभावा-
दित्यत आह विपर्यय इति सुखविपर्ययः दुःखं यापि सल्लाभस्यात्कदाचित्कस्यापि पुत्रादेरेव दुःखहेतुत्वदर्शनादित्यर्थः तस्माल्लाभान्त-
रापेक्षयात्मलाभः परमो लाभ इति तदर्थं सर्वपरित्यागेनात्मज्ञानेन संपादनीय इत्यभिप्रेत्याहात्मेति विपर्ययप्रसंगस्तत्र नास्तीत्याह नि-
त्यत्वादिति तथा च श्रुतिः तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा स योन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं

आत्मार्थोऽपि हि यो लाभः सुखायेष्टो विपर्ययः आत्मलाभः परः प्रोक्तो नित्यत्वाद्ब्रह्मवेदिभिः ५
स्वयंलब्धस्वभावत्वाल्लाभस्तस्य न चान्यतः अन्यापेक्षस्तु यो लाभः सोन्यदृष्टिसमुद्भवः ६

रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानं प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवतीति ५ आत्मसुखलाभ-
स्य नित्यत्वमुक्तं साधयति स्वयमिति तस्यात्मनो लाभो न चान्यतोऽन्यनिमित्तको न भवति कुतः स्वयंलब्धस्वभावत्वात्साधनसाध्यत्वाभावा-
न्नित्यत्वमित्यर्थः पुत्रादिलाभस्य साधनाधीनत्वेनानित्यत्वं साधयति अन्यापेक्ष इति अन्यदृष्टेः सकाशात्समुद्भवो यस्य स तथा अ- राम
न्याधीनस्य तदपगमेऽपगमादनित्यत्वमित्यर्थः ६ ॥ राम॥ ॥ ९१

कैयमन्यदृष्टिःकावातनुभृद्वस्यान्यपुत्रादिलाभस्यानित्यत्वेहानिरित्यतआहान्यदृष्टिस्त्विति अन्यस्मिन्ननात्मनिदृष्टिःप्रतीतिर्यस्याःसान्यदृष्टि
ःसाऽविद्याभवतीत्यर्थः ततःस्वात्माविद्याकृतभ्रांतिनिबंधनत्वात्पुत्रादिलाभप्रीतेस्तस्याश्चस्वप्नतुल्यत्वाच्चित्यात्मप्रियहानिःस्यादितिभावः
तथाचाविद्यानिवृत्तिमंतरेणात्मस्वरूपवित्स्मृतेरवलोभाभावात्सासंपाद्येत्याहतन्नाशइतिमोक्षोनित्यनिरतिशयपरमानंदाविर्भावोऽज्ञानहा
निलक्षणः तत्प्राप्त्युपायमाहज्ञानेनैवेति सोप्यज्ञाननाशलक्षणोमोक्षोज्ञानेनैवस्यात्तस्यैवाज्ञानविरोधित्वाच्चकर्मणानस्याज्ज्ञानविरोधित्वा
भावात्तस्मात्सर्वकर्मपरित्यागेनात्मज्ञानेसर्वथासंपादनीयमेवमुमुक्षुणेत्यर्थः ७ ननुविरोधाभावात्सकार्याविद्यानिवृत्तिरूपोमोक्षःक
र्मणामाभूत्तथापितेननित्यपुरुषार्थोभविष्यत्यतःकिंज्ञानेनेतिनेत्याहकर्मकार्यंत्त्विति तत्रहेतुगर्भंविशेषणमविद्येति मिथ्याप्रत्ययमूल

अन्यदृष्टिस्त्वविद्यास्यात्तन्नाशोमोक्षउच्यते ज्ञानेनैवतुसोपिस्याद्विरोधित्वान्नकर्म्मणा ७
कर्मकार्यंत्वनित्यंस्यादविद्याकामकारणं प्रमाणंवेदएवात्रज्ञानस्याधिगमेस्मृतः ८

रागप्रयुक्तकर्मसाध्यत्वादित्यर्थः कर्मसाध्यंफलमनित्यंज्ञानसाध्यंतुनित्यमित्यत्रकिंप्रमाणमितिचेद्वेदएवेत्याहप्रमाणमिति
तद्यथेहकर्मजितोलोकःक्षीयतएवमेवामुत्रपुण्यजितोलोकःक्षीयतेब्रह्मविदाप्नोतिपरं तरतिशोकमात्मविदित्यादिवेद
एवकर्मसाध्यमनित्यंज्ञानसाध्यंनित्यंमोक्षरूपमित्यत्रज्ञानस्यविवेकस्याधिगमेप्रमाणंविद्वद्भिःस्मृतइत्यर्थः ८

६२ किंचवेदस्यसर्वस्याध्ययनविध्युपयादितत्वादपुरुषार्थपर्यवसानायोगात्परमपुरुषार्थपर्यवसानायात्मैकत्वज्ञानपरत्वमेष
व्यंततोनकर्मकृतस्यमहात्तात्पर्यलभ्यतद्रूपमिद्धेत्याहज्ञानैकार्थेति।ज्ञानमेवैकोर्थः प्रयोजनंपरंप्रतिपाद्यंयस्यवेदस्यसतथातस्यभावस्तत्वंत
स्मात्वेदमेकवाक्यंविदुर्वाक्यप्रमाणकोविदाइतिशेषः किंतस्यज्ञेयमित्यपेक्षायामाहएकत्वमिति ततोज्ञानादात्मनएकत्वमेवज्ञेयमित्यन्वयः।हिश

ज्ञानैकार्थपरत्वात्तुवाक्यमेकंततोविदुः एकत्वं
ह्यात्मनोज्ञेयंवाक्यार्थप्रतिपत्तितः ६

प्रति
ब्दोवधारणार्थः ॥ ज्ञानप्रकारमाह वाक्यार्थप्रतिपत्तितइति सत्यंज्ञानमनंतमित्याद्यवांतरवाक्यार्थप्रतिपत्तिद्वारेणतत्वमस्यादिमहावाक्यै
रात्मनोब्रह्मैकत्वंज्ञेयमित्यर्थः आत्मनस्तत्वज्ञानस्यैवपरमपुरुषार्थ[illegible]नभावा[illegible]द्धेतुतायाः श्रुतत्वात्कर्मकांडमपितत्वज्ञानापेक्षितचित्त
शुद्धिहेतुकर्मविधानद्वारापारंपर्येणपरमपुरुषार्थसाधनभावंभजतइत्युक्तमेकार्थपर्यवसानेनैकवाक्यत्वंवेदस्येतिभावः ६ राम ६२

न त्वात्मनो ब्रह्मणश्चैकत्वतानमनुपपन्नं तयोरपर्यायशब्दवाच्यत्वेन भेदादित्याशंक्यामेवमन्योन्याश्रयापत्तिरित्याह वाच्यभेदादिति तच्छब्दोऽपर्यायश
शब्दभेदो वाच्यभेदात्कल्प्यस्तथा वाच्योपि तच्छ्रुतेरपर्यायशब्दभेदश्रवणाच्चित्रं कल्प्यस्तथा च सिद्धे वाच्यजीवब्रह्मभेदे तद्वाचकशब्दयोरपर्या
यत्वसिद्धिस्तत्सिद्धौ वितरसिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः स्वरूपतो भेदकल्पनायां प्रमाणाभावादिति भावः भेदस्याप्रामाणिकत्वादेकत्व
तानुपपन्नमित्युक्ते भेदस्यापि प्रमाणसिद्धत्वं पूर्ववादी शंकते त्वयं त्वितदिति त्रयं वा इदं नाम रूपं कर्मेति श्रुत्यात्तत आत्मनोतिरिक्तं रूपं नाम
च कर्म च प्रोक्तमतो नेकत्वमेव वेदार्थ इत्यर्थः सिद्धांती दूषयत्यसदेतदिति द्वियस्मादेतद्रूपमन्योन्येन कल्पितं अन्योन्यसापेक्षं सिद्धिकं
तस्मादसदित्यन्वयः अन्योन्याश्रयग्रस्ततया भेदस्य प्रमातुमशक्यतया प्रामाणिकत्वाभावाद्यथा कथंचित्लोकसिद्धो मिथ्याभेदः श्रुत्यानूद्यते
केवलं वैराग्याय तेनाद्वैतज्ञाने विरोधितेति भावः॥ अथवा कथमसदेस्य वेदस्य कार्यपरत्वे नपरत्वेनेकवाक्यत्वे नियंते प्रशंकाते ऽपुनरुक्त
शब्दभेदवशान्नतनत्वाद्भेदस्य प्रतीयमानत्वादिति चेत् सत्यं तेन घापि न तत्र तात्पर्यं युक्तं प्रमाणयुक्तिबाधितत्वाद्द्वैतस्येत्यभिप्रेत्याह
वाच्यभेदादिति वाच्यभेदे प्रामाणिके सति तद्विषयतात्पर्यवत्त्वं शब्दभेदादनेकवाक्यता सिद्ध्यति तथा तच्छब्दो वाच्यभेदोपि तच्छ्रुतेर्वाचकश

वाच्यभेदात्तु तच्छब्दः कल्प्यो वाच्योपि हि तच्छ्रुतेः॥ ७॥ ७॥ ॥

ब्दभेदश्रुतेः श्रवणात्कल्प्यप्रकारांतरेण वाच्यभेदासिद्धेः नहि शब्दाधीनोऽर्थतत्त्वनिश्चयः आरोपितविषयेपि शब्दभेददर्शनात् ना
पर्यायाधीनः शब्दनिश्चयः एकस्मिन्नपि पुरुषे पिता भ्राता मातुलो जामाता पितृव्य इत्युपाधिभेदो दृयुनरुक्तशब्दभेददर्शनान्नहि तत्प्रतिबो
ध्युपाधिभेदव्यतिरेकेण वस्तुभेदो विद्यते तथा चानाद्यविद्याकल्पितानेकोपाधिभेदावच्छिन्नानेककर्त्रादिकारकभेदानुवादेन तन्नाना
त्वे द्वितानंतःकरणशुद्धिसाधनकर्मविधिपरत्वात्कर्मकांडस्य तात्तत्त्वज्ञानवाक्यैकवाक्यत्वोपपत्तेः श्रुतिशयानंदो त्वतिकदुःखनिवृ
त्तिफलत्वस्य सर्वेषां स्वरसतोभिलाषगोचरस्यात्मतत्त्वतौनादस्मतोऽसंभवादविद्याविधावदवस्थोपाधिभेदेनाधिकारिभेदप्रयोगभेदयो

ष्ठोपपन्नेरेकपुरुषापेक्षित्वेनैकपरमपुरुषार्थैकसा
धनप्रकाशकत्वे नैकवाक्यता वेदस्य युक्तेति भावः॥ ॥

६३ एवं द्वैतस्याविद्याकल्पितत्वयुक्तिमभिधाय प्रमाणमभिधत्ते त्रयंत्विति यतोयमनिरूपिताकारभेदः प्रपंचस्तज्ञो हेतोरेतत्सर्वं दृश्यं रूपं नामच क-
र्मचेति त्रयं राशीकृत्य प्रस्तुत्य प्रोक्तमिति योजना त्रयं वा इदं नाम रूपं कर्मेत्यस्मिन्ब्राह्मणे हेतुनिःपूर्वकं शब्दविशेषाणां वाच्यत्वं रूपविशेषाणां
चक्षुर्मात्रत्वं कर्मविशेषाणां शरीरमात्रत्वमिति विशेषप्रविलापनेनैतत्त्रयस्यासाम्यत्वमभिधाय तदेतत्त्रयं सदेकमयमात्मात्मैकः सन्नेतत्त्रय-
मित्यैकात्म्यं सर्वस्य जगत उपसंहृतमन्नोनानात्वभेदोस्तीत्यर्थः उपसंहरत्यसदेतदिति उक्तमर्थमेतत् १० अन्योन्यावेक्षयावगम्यमानस्य

त्रयंत्वेतन्ननु प्रोक्तं रूपं नाम च कर्म च असदेतत्त्रयं तस्मादन्योन्येन
हि कल्पितं १० कृतोवर्तोयथाशब्दाच्छ्रुतोन्यत्र धियावहिः ११

मिथ्यात्वे दृष्टांतमाह कृत इति शब्दाच्छ्रुतोवर्तइंद्रादिरूपविशेषः सहस्राक्षवज्रबाहुत्वादिः धियाप्रत्यक्षान्यत्रवहिः कुड्यादौ विच-
रूपेणाकृतोयथाकल्पितो मिथ्येतियोजना नहि विद्वेदृश्यमेवरूपमिंद्रस्यवज्रस्यवाभवति तथाच मिथ्यार्थगोचरः शब्द इत्यर्थः ११ राम ६३

द

शब्दान्मिथ्यार्थकल्पनामुदाहृत्य मिथ्यार्थाच्छब्दकल्पनामुदाहरति दृष्टं चापीति मित्रियपञ्जदौ दृष्टं देवतारूपं तथा तद्धद्देवबुद्धेः स्वादर्शनसंस्कृता
पात्रीगत्य शब्दाय शब्दव्यपदेशाय कल्पत इति योजना दार्ष्टान्तिकमाह एवमिति एतत्सर्वं जगदेवं यथा दृष्टान्तमेव भ्रान्तबुद्ध्या शुक्तौ रजतमिवात्म
नि विविधं कल्पितं न वस्तु सदस्तीत्यर्थः ११ जगतो मिथ्यात्वे फलितमाह असदेतत्तत इति सर्वं कल्पितं चेच्छून्यवादापत्तिरित्याशंक्यान्न कार्यमित्याह सद्वि
दिति निरधिष्ठानकल्पनानुपपत्तेः सर्वकल्पनास्पदं सद्विन्मात्रं प्रत्यक्तत्त्वं न कल्पितं सर्वसाक्षित्वात्तस्य सर्वकल्पनायाः प्रागेव सिद्धत्वादित्यर्थः॥
वेदाचार्यादेरात्मतत्त्वप्रतिपत्तिहेतुत्वादकल्पितत्वमस्तीति कथं सद्विन्मात्रमकल्पितमित्युच्यते तत्राह वेदश्चापीति स एवाद्यः पूर्वसिद्धस्त्वात्मा वेदो

दृष्टं चापि यथा हि एवं बुद्धेः शब्दाय कल्पते एवमेतज्जगत्सर्वं भ्रान्तबुद्धिविकल्पितं ११
असदेतत्ततो युक्तं सद्विन्मात्रं न कल्पितं वेदश्चापि स एवाद्यो वेद्यं चान्यत्तु कल्पितं १२

विवेदनहेतुः श्रुत्याचार्यरूपेणामायया पृथ्यते ऽर्थप्रकाशनशक्तेरन्यत्र जडेऽसंभवात् न ह्यग्निगतप्रकाशनशक्तिव्यतिरेकेण दीपादेरप्र
काशनशक्तिरस्ति वेद्यं च तत्त्वं स एवाद्य इति संबंधः अन्यत्तु विशेषमात्रं कल्पितं तथा च कल्पितविशेषानुगतत्वेनात्मन एव बोधकत्वं सर्वकल्प
नापवादावधितया तस्यैव वेद्यत्वं चोपपद्यत इत्यर्थः १२

कथं स एवाद्यो वेदो वेद्यं चेत्याशंक्य स्वप्नदृष्टांतेन व्युत्पादयति येनेति स्वप्ने स्थित आत्मा येन स्वाप्नं विषयजातं वेत्ति स एव वेदः स्यात् न हि स्वप्ने विदात्म
६४ व्यतिरिक्तं भासकमस्ति आदित्यादिज्योतिषां तदा परमात्मत्वं ज्योतिःस्वरूपं तेषु प्रस्तुतत्र सर्वं वेद्यं तदपि मायया सृष्टमेव न हि स्वप्ने बाह्यं विषयजातम
स्ति तत्रानवकाशात्तत्र रथ्यादयस्तादृक्तेषु तथा च स एवात्मा स्वमायया प्राकृतोपाधिभेदावच्छिन्नः सदात्मना वेद्यस्तत्तु स्वतश्चिदात्मना वेदनरू

येन वेत्ति स वेदः स्यात्स्वप्ने सर्वं तु मायया येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते १४ येन
स्वप्नगतो वेत्ति सा वाक्घ्राणं तथैव च रसनं स्पर्शनं चैवं मनश्चान्यत्तथेन्द्रियम् १५

पश्यतीति वेद्यवेदितृभावो मायिक इत्यर्थः चक्षुरादीन्द्रियाण्यपि परमात्मस्वरूपगत आत्मा येनं यं पश्यति रूपमुपलभते तदेव चक्षुरिति योजना
स्वप्ने रूपाकारसंस्कृतमनोवच्छिन्नचित्त्रिविधाविद्यात्मकं रूपप्रकाशयन्पश्यतीत्युच्यते एवं श्रोत्रादावप्यूह्यं १४ येन स्वप्नगत इति येन स्वप्नग राम ६४
तो जिघ्रति तद्घ्राणमित्यादि यथायोगं योज्यम् १५

कथमेकरूपं चैतन्यं वेदवेद्यवेदकचक्षुरादिरूपेणाभिद्यते तत्राह कल्प्योपाधिभिरिति स्वप्नकल्प्योपाधिभेदादेकमेवेदं ज्ञानमनेकधा भिन्नमि
त्यत्र दृष्टान्तमाहाधिभेदादिति मणेः स्फटिकादेराधिभेदान्नीलपीताद्युपाधिभेदात् तथा ज्ञानमेकमनेकधा ज्ञायत इत्यर्थः १६ यथा स्वप्ने नि
र्भेदस्य ज्ञानस्य कल्पितोपाधिभेदादशेषव्यवहारास्पदत्वं दृष्टमेवमेव जागरितेप्यशेषव्यवहारास्पदत्वं तस्योपपन्नमिति दार्ष्टान्तिकमाह जायत
चेति कथं चिद्रूपस्य ज्ञानस्यास्य जाग्रति विकल्पितत्वं तदाह बुद्धिस्थमिति आत्मावल्वज्ञानकंचुकः प्रथमं बुद्धिं परिकल्पयतनस्त कंचुकः संसार

कल्प्योपाधिभिरेवैतच्चिद्रूपं ज्ञानमनेकधा आधिभेदाद्यथाभेदो मणेरेकस्य जायते १६
जायतश्च तथाभेदोत्ता[illegible]स्यास्य विकल्पितः बुद्धिस्थं व्याकरोत्यर्थं भ्रांत्यात्तं शोभ्यवक्रियः १७

दविवेकात् भ्रांत्या बुद्धिस्थमेवार्थं व्याकरोति स्वात्मगतयाकल्पयन् व्यवहरतीति ततश्च भ्रांति प्रयुक्तत्वख्यात्यकामोद्भूताक्रिया हानोपादा
नव्यवहाररूपा यस्य स तथा अविद्याप्रत्युपस्थापितान्तःकरणपरिणामावस्थामवभासयंस्तदविवेकादनेकरूपप्रपंचमात्मनि कल्पय
न्व्यवहरतीत्यर्थः १७

९५ स्वप्नदृष्टांतसिद्धमनूद्य दार्ष्टांतिकं निगमयत्यर्द्धेन स्वप्नेतद्वदिति यद्वत्स्वप्ने व्यवहारस्तद्वत्प्रबोधेपि व्यवहारः यथैव स्वप्नेऽन्तर्बहिर्भा तथैव च प्रबो-
धेप्यंतर्बहिर्भाव इति योजना ७ अंतर्बहिर्भावेन प्रथमानो व्यवहारः स्वप्नवत्कल्पितस्तदस्तु स्यात तैर्वद्दृष्टांतान्तरमाहालेख्येति यथा आलेख्या-
पेक्षयाऽध्ययनं श्लोकादेरध्ययनापेक्षया च पत्रादेषु नराले ख्यनं मिथ्यैव सर्वगता नो निरवयवानां वर्णानां लेखनासंभवादित्यर्थः ॥ एषा दर-
योजना आलेख्यं चाध्ययनं चालेख्याध्ययने तद्वद्भयं यथा न्योन्यधियोऽन्वय मन्तर्बहिर्भावेन परस्परापेक्षबुद्धिजन्यं बहिरेवाविशेषकारेणानु

स्वप्नेतद्वत्प्रबोधेपि बहिर्ष्वांतस्तथैव च ॥ आले-
ख्याध्ययनेवद्वत्तदन्योन्यधियोऽन्वव १८

भूतमपेक्ष्यांतर्बुद्धौ संस्काररूपेणावीपूते तत्रापेक्ष्य च बहिः शब्दव्यवहारो यातीत्यन्तत्र तयोर्वहेश्च द्वयोरन्योन्यापेक्षत्वेनालेख्याध्य- राम ९५
नयोरवस्तुत्वेपि यद्वत्तद्वदान्तर्बहिर्भावेन दृश्यमानः सर्वो व्यवहारो न वस्तु सन्निति १८

तद्धि निश्चयमर्थं व्याकुर्वन्भ्रान्त्यात्मशोऽस्य वक्ति यदस्तु तत्प्रपंचयति यदायमिति अयमात्मा पूर्वभ्रान्तिसंस्कारवशाद्यदा बुद्धिकं चुकाङ्क्षः सत्त्वविद्य
याभेदं कल्पयेत्तत्तदा तत्कामः शोभनत्वेनाध्यस्तविषयभेदेऽभिलाषवान्सन्यथाक्रतुर्यथाकामं हृत्तसंकल्पो भवति। क्रतुः संकल्प इदमहं सा
धयिष्यामीत्यध्यवसायरूपः ततश्च यत्कामस्तत्क्रतुर्भूत्वा यत्कामसाधनं कर्म कृत्वा तत्तैर्निर्निःपादितं तत्फलावच्छेदप्रपद्यते प्राप्नोति पुनस्तत्संस्कारस
विवोभेदं परिकल्प्य कामक्रतुपूर्वकं कर्मानुष्ठाय फलभागित्येवमस्यात्मनोऽविद्याहेतुफलात्मना परिकल्पितं संसारमनुभवतीत्यर्थः

यदायं कल्पयेद्भेदं तत्कामः सन्यथाक्रतुः यत्कामस्तत्क्रतुर्भूत्वा कृतं यत्तत्प्रपद्यते १९
अविद्याप्रभवं सर्वमसत्तस्मादिदं जगत् तद्भूता दृश्यते यस्मात्सुषुप्ते न च गृह्यते २०

तथा च श्रुतिरथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तथाक्रतुर्भवति यथाक्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरु
ते तदभिसम्पद्यत इति १९ उक्तं दृश्यमिथ्यात्वं सोपपत्तिकमुपसंहरति अविद्याप्रभवमिति तद्भूताः विद्यावता यस्माद्दृश्यन्ते तदभा
वे सुषुप्ते न च नैव गृह्यते तस्मात्सर्वमिदं जगदविद्याप्रभवं मिथ्याज्ञानविजृम्भितमसदपरमार्थमिति योजना २०

तर्हि जगद्धेतुरविद्या कीदृशी तन्निवर्त्तिका विद्या का केन वा विद्या विधीयत इत्याकांक्षायामाह विद्याविधेरिति एकत्वात्पद्धियोविद्याविधेर्ब्रह्मात्मैक
९६ त्वधीर्विध्यंतरूपेद्धीरविधेति स्वरूपोक्तिः श्रुतिप्रोक्ते इति ज्ञापकोक्तिः अथ यो ऽन्यां देवतामितिश्रुत्या भेददृष्टेरविद्यात्वे लोकानुभवसिद्धे भेदानु
वादरूपयोक्तं किंतु तद्ब्रह्मवेदेत्यादिपुरःसरं ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति प्रवृत्ता प्रमाणभूताऽप्रसिद्धार्थबोधि
नी श्रुतिरेकत्वज्ञानस्य विद्यात्वं ज्ञापयतीत्यस्माकमित्यर्थः यस्मादविद्यावद्विद्यालोकस्मात्तु भवति हि न भवतीति तस्मात्सर्वप्रयत्नेनाध्यारोपापवा
दप्रबंधनिर्माणेन शास्त्रेण विद्या विधीयते प्रतिपाद्यत इति मुमुक्षुः शास्त्रैकनिष्ठः तत्परो भवेदित्यर्थः २१ शास्त्रे चेत्सर्वप्रयत्नेन विद्यासुत्पाद्यते किमि

विद्याविधेः श्रुतिप्रोक्ते एकत्वात्पद्धियोर्हि नः तस्मात्सर्वप्रयत्नेन शास्त्रे विद्या विधीयते २१
सा चित्तैकाग्र्यादर्शवद्यस्मात्तु द्वैविद्या प्रकाशते यमैर्नित्यैश्च यज्ञैश्च तपोभिस्तस्य शोधनं २२

तितर्हि सर्वोपि शास्त्रेण प्रवर्तते प्रवर्तमानो वा कथं विद्यां न प्राप्नोतीत्यपेक्षायां चित्तशुद्ध्यभावादित्यभिप्रेत्याह चित्तेति तस्माच्चित्तशु राम
द्धिः कर्त्तव्येति शेषः तर्हि केन उपायेन चित्तशोधनमित्यत आह यमैरिति अहिंसाब्रह्मचर्यादयो यमास्तैर्नित्यैः शौचादिभिर्नियमैरित्य ९६
र्थः यज्ञैः स्वाश्रमविहितधर्मैरीश्वरसात्कृतैस्तपोभिश्चैतस्य चित्तस्य शोधनं कार्यमित्यर्थः २२

त्र्य: शास्त्रार्थनिरूपणादीनि तस्य स्वरूपं स्मयवर्णो केंग देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते। अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च
यत्॥ स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत्तपो मानसमुच्यते इति। एतान्यपि सात्विकान्य
नुष्ठितानि राजसतामसानि त्रसात्विकतपोलक्षणं श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते इति
। एतद्दुष्कृतं श्रममिति तपश्चिंतार्थं चित्तविशुद्ध्यर्थं मनआदीनां स्थिरतार्थं च उपग्रहः समाधानं नैश्चल्यं तत्रतत्रैकं स्थिरार्थं तत्रच्छद्म:। तेषु
ञ तेषु तेषु देहविशोषणे। शीतोष्णवर्षवातसहनेन कृशीकरणमित्यर्थः १३ एवमाराद्उपकारकं तपउक्त्वा अथ वरोद्देश सन्निपत्योपकारकं तपोवि

शीतादितपः कृपात्तिक्षितुमर्थमुत्तमं॥ मनआदिसमाधानेनतन्नं देहविशोषणं २२ मनस्त्वैंद्रियाणां च ह्यैकाग्र्यं परमं तपः॥
तज्ज्यायः सर्वधर्मेभ्यः सधर्मः परउच्यते २४ दृष्टं जागरितं विद्यात्स्मृतं स्वप्नं तद्विदुः॥ सुषुप्तं तदभावं च स्वमात्मानं परं पदं २५ ॥ ॥

शेषस्मृतिवचनपाठेनाहमनसश्चेति। ऐकाग्र्यमाश्रुत्युक्तेवस्तुनि मननद्वाराश्लिष्टीकरणं॥ एतत्प्रावश्यकर्त्तव्यत्वात्स्तुतिपक्रियते तज्ज्या
यइति २४ एवमुक्तैः साधनैः संस्कृतचित्त श्रवणादिपरः सन्नवस्थात्रयपात्रत्वात्मा स्थितां विविच्य वाक्यार्थं लक्षणान्वयेन जानीयादित्याह दृष्टमि
ति। दृष्टं दर्शनं बाह्येंद्रियैर्विषयोपलंभनं जागरितं विद्यात्। तद्यत्तु दृष्टं वासनामयं वाच्यमेव स्मृतं संस्कारवशाच्चिद्रूपदर्शनाभासं तत्स्वप्नं विद्यात्
तदभावं तयोर्दृष्टस्मृतयोरभावोपलक्षितं सुषुप्तं विद्यात् एवं दृश्यत्रयपृथक्कृतपरात्मसाक्षिणं स्वस्वरूपभूतमात्मानं परं पदं संपद्य
नादित्यहं तद्ब्रह्माहमस्मीति विद्यादित्यर्थः २५ ॥ ॥ ॥ ॥ राम

९४ :[illegible]

नन्ववस्थात्रयहेतावज्ञाने सति कथं तद्विविक्ततया प्रत्यगात्मनो ब्रह्मत्वमुपपद्यत इति तत्राह सुषुप्ताख्यमिति तम इति विशेषणेनाज्ञानस्य भावरू
९७ पत्वमुच्यते तेन तत्त्वबीजत्वमुपादानत्वमुपपद्यते तदज्ञानं स्वात्मनः सम्यग्बोधाग्निना प्रकर्षेण तानिर्दग्धं सद्दग्धं स्याद्यथा दग्धं बीजमभवं भवशून्यं कार्योत्पाद
कं न भवति तथा तत्त्वज्ञानाग्निदग्धमज्ञानं पुनरवस्थात्रयारोहकरं न भवतीति युज्यत एव प्रतीचो ब्रह्मत्वमिति भावः ॥ २६ ॥ अज्ञानस्यावस्थात्रयबीजत्वमुक्तमुप
पादयन्नदज्ञाननिवृत्त्यैव सर्वसंसारोपाधिनिवृत्तिर्न्यायलब्धा नरसाध्येति दर्शयति तदेवैकमिति तदेवैकं मायाख्यं बीजं त्रिधापि त्रैक्रमात्सुषुप्त्यादिक्र
मेणेत्यर्थः पुनरित्यत्र बीजाद्वृक्षवत् सुषुप्तिमारभ्य जागरितपर्यन्तं तदारभ्य सुषुप्तिपर्यन्तमहरहस्त्रिधा विक्रियत इत्यर्थः एतदुक्तं भवति विज्ञात्रा
श्रयविषयमेकमेवाज्ञानमनाद्यनिर्वचनीयमनेककार्यविक्षेपसमर्थमपि तच्चैतन्याभाससहितं स्वाश्रये आत्मन्यध्यात्माधिदेवतभेदेन प्राज्ञेश्वरोपा
धिविशिष्टसुषुप्तिप्रलयावस्थाकारं जायते तेन प्राज्ञेश्वरहिरण्यगर्भोपाधिसंघिन्नस्वप्नसृष्ट्यवस्थात्मकं भवति तथा पुनर्वि[illegible]श्वानविश्ववैश्वानरोपा
धिविवित्तजाग्रत्स्थित्यवस्थारूपमापद्यते तत्रापि देवतिर्यङ्मनुष्यस्थावरादिभेदेन नानाविधशरीरेन्द्रियान्तःकरणोपाध्याकारं सत् स्वप्रमक्तब्रह्मविदात्मन्यन्ते
न जीवभेदव्यवहारनिर्वाहकं भवति यथैकं वटादिबीजं मृद्वाश्रयं सत्तस्यामेव मृदि अंकुरकांडविटपशाखापत्रपुष्पफलादिभावमापद्य पुनर्बीजभा

सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः । स्वात्मबोधप्रदग्धं स्याद्बीजं दग्धं यथाऽभवम् ॥ २६ ॥
तदेवैकं त्रिधा ज्ञेयं मायाबीजं पुनः क्रमात् । मायाव्यात्माविकारोऽपि बहुधैको जलार्कवत् ॥ २७ ॥

वं चापद्यते तेन यथेदमपीति द्रष्टव्यं तदेव वृक्षाकारं वस्तु स्वमूलदाहे सति तत्रैव मृन्मात्रावमापद्य पुनर्न भवति यथा तथा संसारवृक्षमूलाज्ञानस्य त
त्त्वज्ञानाग्निना दाहे स्वाश्रयविदेकात्मनाविलीनत्वात् पुनर्न दर्शनयोग्यो भवति संसारस्त्वज्ञानदशायामेव तत्त्वज्ञाने यतितव्यमिति तदेवैकं त्रिधेत्युक्ते
तमोबीजस्य स्वांते अयं प्रवृत्तिशंका स्यात्तथा सति सांख्याभिप्रेतप्रधानापातः तद्व्युत्पन्नस्तमसोऽवच्छिन्नमाश्रयं दर्शयति मायावीति आत्मानि ह यचरितव्या
प्तिमान् स्वप्रकाशविदेकरसो मायावी मायादिशब्दवाच्याज्ञानाश्रय इत्यर्थः मायामाश्रयस्यवेदात्मा न हि तस्य मायाविक्षिप्ता नेतोपाधिभिरनेकधा विक्षिप्य राम
मानस्य कथं कूटस्थत्वमित्याशंकाह स्थानेन प्रत्याचष्टे अविकार इति एक एवात्मा स्वगतविकाररहितोऽपि बहुधा विभाव्यमानो भवति जलार्कवत्त यथैके ९७

उक्तमेवदृष्टांतदार्ष्टांतिकरूपं प्रपंचयति बीजं चेति प्राणइत्यव्याकृतावस्थोक्तिः स्वप्नादिभिरिति जाग्रदवस्थामूर्त्तावस्थावगृह्यते यथैकमवि
द्यामायाख्यं बीजमव्याकृताद्यवस्थाभेदे न भिन्नं तथा स्वप्नजाग्रच्छरीरेषु समष्टिव्यष्टिस्थूलसूक्ष्मशरीरेषु तत्तेषु तत्तद्वद्विदाभासोपि भिन्नो भव
ति तदा तदधिष्ठानभूतश्चिदात्मा चोपाधिगताभासाविविक्तात्तद्बुद्धिस्थो विभाव्यते तैजसहिरण्यगर्भविश्ववैश्वानरादिभेदेन प्रकाशत इत्यर्थ
ः २७ ननु परमात्मनो मायाकल्पितेषूपाधिषु बहुत्वे तर्हि तत्र व्यापारवत्त्वमपि स्यादिति कथं कूटस्थतेत्याशंक्य दृष्टांतेन निराकरोति मायाह

बीजं चैकं यथा भिन्नं प्राणस्वप्नादिभिस्तथा स्वप्नजाग्रच्छरीरेषु तद्वदात्मा तनुष्वत २८ मायाहस्तिनमारुह्य मायाव्येको यथा
व्रजेत् आगच्छंस्तद्वदेवात्मा प्राणस्वप्नादिभिःऽचलः २९ न हस्ती न तदारूढो मायाव्यन्योयमास्थितः न प्राणादि न तद्द्रष्टात त्
थात्मान्यः सदा दृशिः ३०

स्वमाया
स्तिनमिति यथैवैको मायावी निर्मितं हस्तिनमारुह्य व्रजेत् दिग्देशमागच्छेच्च भवति गमनागमने आचरन्निव वर्त्तमानोप्यचल एव त
द्वत्तथैवात्मा प्राणस्वप्नादिगतत्वेन विभाव्यमानोप्यचलः कूटस्थ एवेत्यर्थः २८ प्राणाद्युपाधिसंबंधमात्मनोंगीकृत्योक्तमिदानीं सो
पि नास्ति वस्तुत इत्याह न हस्तीति भिदागद्व्याख्यातं पद्यं २९

१८ वस्तुनआरोपाधिष्ठानसंबंधाभावेपिमायायोःसंबंधोऽपरिमर्षर्द्दृष्यत आह असंगेति असंगचस्तुर्यस्य सोऽसंगचस्तुस्तस्यालौकिकस्यपथ्यामीपाना
स्तिमायाविनोपितथावस्तुर्वेधाभावामायानास्तिवाथद्दूइत्यर्थः। अपिशब्दादवस्तुत्वनिश्चयादपिमायावीनथ्यामुहतीत्यर्थः। व्यतिरेकस्तु
कृत्स्नस्यमाहवद्दासस्यैवेतिसामायावद्दास्यैवभयहेतुहस्त्यादिरूपाभासनइत्यर्थः। ततस्तस्मादमायाव्येवमायोपलक्षितएवभवे
त्तुमात्रमापाधारइत्यर्थः अयमेतश्लोकोदार्ष्टांतिकेपियोज्यः असंगचस्तुयोमायानाहूतचिन्त्यभावस्यमापविनोपिमायाचिन्तेनविभ्र
म्यमानस्यापिमायानास्तियामोहहेतुर्हिमायासाहमस्मिपरंब्रह्मेतिप्रकाशमानस्यात्मनिविरोधादेवनभवतीत्यर्थः। वाशब्दोलोकप्रसि

असंगचस्तुयोनास्तिमायामायाविनोपिवा कृत्स्नस्यैवसामायाऽमायाव्येवजनोभवेत् ३१ साक्षाद्विवःसविज्ञेयःसाक्षा
त्त्वेनिवश्रुतेः। भिद्यतेहृदयग्रंथिर्नचेदित्यादितःश्रुतेः ३२

द्धमायायिद्दष्टोत्तार्थः। नथास्वज्ञानावस्थायाकदाचिदारणाद्याकारमायापरप्रपञ्चप्यज्ञानावस्थायामिवनव्यामुत्पत्तिकिंतुमुमुक्षवन्निर्वि
कारएवभवतीत्यर्थः। समानमन्यत् ३० तस्मात्साक्षात्त्वज्ञानात्मज्ञानादमायावीमायातत्कार्यसंबंधविमुक्तोभवतीत्ययमर्थः श्रुतिसिद्धः
अद्वैयोमुमुक्षुत्सोइत्याहसाक्षादिवइति। सर्वविकारसाक्षीकूटस्थआत्मासाक्षाद्देवोविज्ञानमानंदब्रह्मेसुक्तलद्दरागविज्ञेयः यस्साक्षाद एन०
परोक्षादूल्पआत्मासर्वांतरइतिब्रह्मात्मैकत्वश्रुतेरित्यर्थः। एवंविज्ञानेलाभमविज्ञानेहानिंचश्रुत्यादर्शयतिभिद्यतइति। नचेदिहावेदी १८
न्महतीविनष्टिरित्यादितइत्यादिशब्दादेकधैवानुद्रष्टव्यमस्मात्सममुमाप्रोनियद्दूइमानेवपरप्रतीन्यादिश्रुत्योगृह्यन्ते ३१ ८म०

साक्षादात्मविज्ञानमुक्तमाक्षिपति अशब्दादित्वत इति बाह्यांतःकरणाग्राह्यत्वादात्मनः कथं साक्षाद्विज्ञानं स्यादित्यर्थः ३२ परिहरति अदृश्योपीति
यथा स्वरूपेणादृश्योपि राहुश्चंद्रे चंद्रमंडले उपरक्तो दृश्यते यथा वांभसि जले चंद्रादेर्बिंबं दृश्यते तथैव चक्षुराद्यगोचरोपि परमात्मा सर्वगोपि
सर्वत्र वर्त्तमानोपि तत्त्वमस्यादिमहावाक्योत्थबुद्धावेव प्रतिबिंबितः सन् गृह्यते तत्र प्रतिबिंबिततया स्वतः स्फुरणमेव ग्रहणं न विषयीभाव इत्यर्थे
ः शास्त्रैकगम्यस्यापि प्रत्यक्षत्वे राहुर्दृष्टांतः सर्वसन्निहिततयाभासमानस्य सर्वत्र यथावदस्फुरतोप्युपाधिविशेषे यथावत्स्फुरणे प्रतिबिंबदृष्टांत

अशब्दादित्वतो नास्य ग्रहणं चेदिंद्रियैर्भवेत् सुखादिभ्यस्तथान्यत्वाद्बुद्ध्या वापि कथं भवेत् ३३
अदृश्योपि यथा राहुश्चंद्रे बिंबं यथांभसि सर्वगोपि तथैवात्मा बुद्धावेव स गृह्यते ३४ भा
नोर्बिंबं यथा चौष्ण्यं जले दृष्टं न चांभसः बुद्धौ बोधो न तद्धर्मस्तथैव स्याद्विधर्म्मतः ३५

इति विवेकः ३३ बुद्धौ बोधात्मा गृह्यते चेद्बुद्धिधर्म्मो बोध इति शंकां दृष्टांतेन प्रत्याचष्टे भानोरिति यथा जले दृष्टं बिंबमौष्ण्यं च भानोरे
व न चांभसो जलस्य धर्मस्तस्य शैत्यस्वाभाव्यात्तथैव बुद्धौ स्फुरन् बोधो न बुद्धिधर्मः स्यात् कुतो विधर्मतो विपरीतधर्मतो बुद्धेर्जाड्यधर्म्मत्व
निश्चयादित्यर्थः ३४

३३ नकेवलं शास्त्रीयबुद्धावेव विद्वांस्तु परमात्मा स्फुरति किं तु लौकिकीष्वपि विषयाकारबुद्धिवृत्तिष्वात्मा सततोऽनुपरोक्षः साक्षितया स्फुरतीत्याह चक्षु
रिति चक्षुरिति वस्तुष्ठीरिकारूपाकारा या धियो वृत्तिः सा यां पश्यन्नवभासयन्नात्माऽलुप्तदृगकुंठितज्ञानशक्तिर्दृष्टेर्द्रष्टा भवेत् एवमुत्तरत्रापि
योज्यं॥ ३६॥ केवलामिति चक्षुरादिद्वारा बहिरप्रवृत्तामंतरेव विषयाकारामित्यर्थः अजो विकाररहितः इत्यर्थः अलुप्तचिद्रूपत्वादित्यर्थः
१ अलुप्तशक्तित्वे श्रुतिमुदाहरति तथा शास्त्रमिति एतदित्यस्मिन्नर्थे श्रुतिः शास्त्रं तसेः सार्वविभक्तिकस्तसियोगीकारात् सप्तम्यर्थे यत्तस्मिरितिके
चिरन हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति श्रुतेरित्यर्थः दृष्टेर्द्रष्टेत्यादौ च न दृष्टेर्द्रष्टारं पश्येरिति श्रुतेः श्रोतारमगु

चक्षुर्युक्तां धियो वृत्तिर्यत्तां पश्यन्नलुप्तदृक् दृष्टेर्द्रष्टा भवेदात्मा श्रुतेः श्रोता तथा भवेत् ३६ केवलां मनसो वृ
त्तिं पश्यन्मंता मतेरजः विज्ञाताऽलुप्तशक्तित्वात्तथा शास्त्रं न हीयते ३७ ध्यायतीत्यविकारित्वात्तथा लेलायतीत्यपि
अत्रस्तेनेति शुद्धत्वं तथा नवागतश्रुतेः ३८

यात्न मतेर्मंतारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वांतर इति श्रुतिरुदाहार्या ३६ द्रष्टृत्वादिव्यपदेशाद्विकारित्वा राम
शुद्धत्वप्रसक्तिमाशंक्याह ध्यायतीति श्रुताविवशब्दात्तथा न चलनयोराभासत्वमुच्यते अतोविकारित्वं सिद्धमित्यर्थः अत्रस्तेनो स्ते ३३
नो भवति भ्रूणहा भ्रूणहेति अनन्वागतं पुण्येनानन्वागतं पापेनेति च श्रुतेः शुद्धत्वं सिद्धमित्यर्थः ३७

ननु सुषुप्ते ज्ञानाभावात् ज्ञातृत्वप्रयोक्तृत्वाभावादात्मनः कथमविकारित्वमित्यत आह शक्त्यलोपादिति सुषुप्तेप्यात्मनः एवशक्त्यलोपादिति योजना
त यद्वैतन्न पश्यति पश्यन्वै तन्न पश्यतीत्यादिश्रुतेरित्यर्थः तथा बोधे बोधदशायां ज्ञातृत्वप्रमोरिति यावत् ज्ञो ज्ञानस्वरूप एवात्मा निरवयवत्वेनाविकार
तो विकारानुपपत्तेरित्यर्थः अत्र स्यात् येऽपि निर्विशेषचिद्रूपस्तदात्मा कथं तर्हि नाज्ञासिषमिति सुषुप्तिपरामर्शो बोधावस्थायां चकमेऽज्ञानामीत्यनु

शक्त्यलोपात्सुषुप्तेत्तस्तथा बोधेऽविकारतः ज्ञेयस्यै
वविशिष्टस्तु यत्र त्वेति श्रुतेर्मतं ३९

भवत्वित्याशंक्य विषयोपरमेप्युपरमोपाधिनिबंधनं तदुभयं न स्वरूपनिबंधनं तथैव श्रुत्योक्तत्वादित्याह ज्ञेयस्येति यत्र वा अन्यदिव स्यात्तत्र
अन्योन्यत्पश्येदित्यादिका यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिका चोदाहरणं ३९

एवं नित्यचैतन्यस्वरूपत्वात्प्रत्यक्षपरोक्षो निर्विकारश्चात्मेत्युक्तं प्रपंचयति श्लोकत्रयेण व्यवधानाद्धीति अनात्मनो घटादेर्विषयस्य ग्राहिकाया लोकदृष्टेस्
१०० अहंकारचक्षुरादिदेहदेशतः कालतो वा व्यवधानादसन्निकर्षात्पारोक्ष्यं हि प्रसिद्धमित्यर्थः न तथात्मनो दृष्टिव्यवधानमस्ति दृष्टेरात्मस्वरूपत्वादात्मन एव
व ब्रह्मत्वात्तद्ब्रह्म स्वत एव सदापरोक्षं स्मृतं ब्रह्मविद्भिरिति योजना ४० स्वरूपप्रकाशस्यानन्यापेक्षत्वे दृष्टान्तेन स्फुटयति नहीति ४१ एवमपरोक्ष
त्वं विशदीकृत्याविकारत्वे विशदीकुर्वन्नात्मनो निर्विशेषत्वमाह विषयित्वमिति न हीष्यते श्रुतिविरोधादिति शेषः अन्यस्यासत्वाज्जडत्वाद्वेति हेतुर

व्यवधानाद्धि पारोक्ष्यं लोकदृष्टेरनात्मनः दृष्टेरात्मस्वरूपत्वात्प्रत्यक्षं ब्रह्म तत्स्मृतं ४० नहि दीपान्तरापेक्षा यद्वद्दीपप्रकाशने
बोधस्यात्मस्वरूपत्वान्न बोधोऽन्यस्तथेष्यते ४१ विषयित्वमविकारित्वं नानात्वं वा न हीष्यते नहेयो नाप्युपादेय आत्मनोऽन्येन
वा ततः ४२ सबाह्याभ्यन्तरोऽजीर्णो जन्ममृत्युजरातिगः अहमात्मेति यो वेत्ति कुतो न्वेव बिभेति सः ४३

नुसंधेयः वाशब्दात्त्वेनापीत्यर्थः ४२ नन्वेवमपि कूटस्थात्मनो निर्विकारत्वे नरकपातादिभयदर्शनादित्याशंक्याह सबाह्याभ्यन्तर इति राम
सम्यक्पदार्थशोधनपूर्वकं य आत्मतत्त्वं जानाति स कुतो न्वेव बिभेति भयहेतोर्द्वैतीयस्य बाधितत्वादित्यर्थः ४३ १००

तथापि यावज्जीवादिश्रुतिविहितत्वात्कर्मणां तदकरणे प्रत्यवायभयं विदुषोप्यस्तीति तत्परिहाराया ऽनुष्ठानं स्यादिति चेन्नेत्याह प्रागेवेति अस्थूलादिशा
स्त्रेभ्यो वर्णित्वादेः कर्माधिकारहेतोरपोहनात्तत्त्वमेवेति वाक्येन ब्रह्मस्वरूपत्वनिश्चयादेतद्विधेरेतदात्मतत्त्वविधानात्प्रतिपादनात्प्रागेव पूर्वमेव तद्यावज्जी
वादिशास्त्रविहितकर्म नोद्दिष्टमिति योजना अनधिकारिणोऽकरणे प्रत्यवायासंभवान्नानुष्ठानप्राप्तिरिति भावः ४४ आत्मनोऽध्यासं विनान वर्णित्वाद्यस्तीत्यत्र

प्रागेवैतद्विधेः कर्म्म वर्णित्वादेरपोहनात् तदस्थूलादिशास्त्रेभ्यस्तत्त्वमेवेति निश्चयात् ४४
पूर्वदेहपरित्यागे जात्यादीनां प्रहाणतः देहस्यैव तु जात्यादिस्तस्याप्येवं ह्यनात्मता ४५

युक्तिमाह पूर्वेति देहपरित्यागे तदनुरक्तजातेरपि परित्यागादागमापायित्वेन न जात्यादेरात्मधर्मत्वं किंतु देहस्यैव जात्यादिर्धर्मः नहि देह एवा
त्मास्त्वित्यत आह तस्यापीति एवमागमापायित्वादेव देहस्याप्यनात्मतेत्यर्थः देहस्य जात्यादेश्च वर्णित्वादिनाप्रकारेण कर्माधिकारहेतोरभा
वादात्मनो न स्वभावतः कर्मकर्तृत्वमुपपद्यत इति भावः ४५

शरीरादिष्वात्मात्मीयाभिमानस्य प्रसिद्धत्वेन हेयत्वायोगमाशंक्याह ममाहमिति यत आत्मन्यागमापायाभ्यामनात्मत्वं देहादेर्निश्चितमतो हेतोः शरीरादिष्व
१०९ नात्मसु ममाहं चेत्यभिमानोऽविद्यामिथ्याप्रत्ययः सात्मज्ञानेनात्मतत्त्वब्रह्मानुसंधानेन हेया स्याद्धाध्यास्याद्देहात्मदृष्टेरासुरत्वेन निंदा श्रुते श्चैत्याहसुरा
णामिति असुराणां ह्येषोपनिषदिति श्रुतेरित्यर्थः ४५ तत्त्वज्ञानादूर्ध्वं न कर्म नवा तत्प्रयोजनं केनाप्यात्मनोऽस्तीत्याह दृष्टान्तेन साधयति दशाहेति परिव्रा
ज्ये सति सपिंडताभिमानाभावात् संन्यासिनो यथाऽशौचोदेरननुष्ठेयता तथा ब्रह्मात्मज्ञानस्य संप्राप्तौ सत्यां ज्ञात्याद्यभिमानाभावाद्विहिताः कर्मानुष्ठाना
भाव इत्यर्थः ४६ यस्मादेवमात्मनो ब्रह्मात्मत्वाऽज्ञानमूलो देहाद्यध्यासनिबंधनः संसारस्तस्मात्तत्त्वज्ञानान्निष्कामादिप्रयुक्तो धर्माधर्मद्वारा संसरति ब्रह्मात्म

ममाहं चेत्यतोऽविद्या शरीरादिष्वनात्मसु आत्मज्ञानेन हेया स्यादसुराणामिति श्रुतेः ४६ दशाहाशौ
चकार्याणां परिव्राजे निवर्त्तनं यथा ज्ञानस्य संप्राप्तौ तद्वज्जात्यादिकर्मणां ४७ यत्कामस्तत्क्रतुर्भूत्वा
कृतं तत्प्रपद्यते यदा स्वात्मदृशः कामाः प्रमुच्यंतेऽमृतस्तदा ४८

ज्ञानेन च सति कामादेरभावान्मुक्तो भवेदित्याह यत्काम इति स्वे स्वरूपे ब्रह्मरूपे वात्मदृष्टिर्यस्य स स्वात्मदृक् तस्य स्वात्मदृश इति विग्रहः यदा सर्वे प्रमुच्यं राम
ते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतो भवतीति श्रुतेर्हृद्याः कामा हृदयाध्यासबाधनेन बाधिताः संतो यदा प्रकर्षेण मुच्यंते तदा प्रवृत्तिबीजाभा १०९
वात्स्वात्मसंस्थ आत्माऽमृतो मुक्तः संसारबंधनो भवतीत्यर्थः ॥४८॥ ॥

एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति नित्यशुद्धो निरंजन इत्यादिश्रुतेरात्मनो नित्यत्वप्रत्यवगमात्तस्य साध्यसाधनविलक्षणत्वेन स्वतः क्रियासंस्पर्श त्वाभावादध्यासमूलत्वं क्रियातत्कारकयोगस्येति निश्चित्यात्मतत्वाववोधने नैव क्रियादित्याश्रमि त्याहात्मरूपेति विधिर्विधानं तत्स्वरूपावधारणं ४५ यद्यपि विज्ञातात्मतत्वस्य क्रियाहेत्वभावात्तदभावस्तथापि विज्ञातात्मनो मुमुक्षोर्मोक्षाय क्रियानुष्ठानं स्यादित्याशंक्य मोक्षस्य क्रियाफलविलक्षणत्वान्न तत्रापि क्रियासं

आत्मरूपविधिः कार्यं क्रियादिभ्यो निवर्तनं । न साध्यं साधनं चात्मा नित्यतृप्तः श्रुतेर्मतः ४९
उत्पाद्याप्यविकार्याणां संस्कार्यं च क्रियाफलं । नातोऽन्यत्कर्मणः कार्यं त्यजेत्तस्मात्ससाधनं ५०

भवतीत्याह उत्पाद्येति ससाधनं जायापत्यवित्तशिखायज्ञोपवीतादिसाधनसहितं कर्मविधिलक्षणं त्यजेन्मुमुक्षुरिति शेषः कृतकस्यानित्यत्वान्मोक्षस्य च नित्यात्मस्वरूपावस्थानरूपत्वान्न मुमुक्षोरपि कर्मणा कृत्यमस्तीति भावः ५१

किंससाधनकर्मत्यागमात्रेण मुक्तिसिद्धिः किं वान्यत्किमपि कृत्यमस्तीत्यपेक्षायामात्मतत्त्वज्ञानाय गुरूपसत्तिः कर्त्तव्येत्याह तापान्तेति यद्वा यस्मात्सर्वक
र्मनिबंधनाप्रीतिरनित्यादुःखांतात्वार्थप्रयुक्ताचतस्मात्तन्निमित्तां प्रीतिमनात्मविषयामात्मन्येवोपसंहृत्य नित्यपुरुषार्थार्थी गुरुं संश्रयेतेति मुमुक्षुं शिक्षयति ता
१०२ पान्तत्वादिति या बहिरात्मनोन्यत्र जायापुत्रादौ प्रीतिस्तां प्रीतिमात्मन्युपसंहृत्यात्मसात्कृत्वेत्यर्थः ५१ उपगन्तव्यं गुरुं विशिनष्टि शान्तमिति शान्तमद्व
घविन्नं प्राज्ञं मेधाविनं यथापरित्यक्तबंधसजातीयेन पुनर्बंधो न भवति तथा मुक्तं निष्क्रियं चवनमित्यर्थः निष्क्रियमैहिकामुष्मिकार्थप्रवृत्तिरहितं ब्रह्म

तापान्तत्वादनित्यत्वादात्मार्थत्वाच्च या बहिः संहृत्यात्मनि तां प्रीतिं सत्यार्थी गुरुमाश्रयेत् ५१
शान्तं प्राज्ञं तथा मुक्तं निःक्रियं ब्रह्मणि स्थितं श्रुतेराचार्यवान्वेद तद्दृष्टीति स्मृतेस्तथा ५२

णि स्थितं स्वस्वरूपानंदानुभवेन सर्वत्रोदासीनमित्यर्थः गुरोराश्रयणीयत्वे प्रमाणमाह श्रुतेरिति आचार्यवान्पुरुषो वेदेति श्रुतेः तद्वि राम
द्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः इति स्मृतेश्चेत्यर्थः ५२ १०२

उक्तप्रकरणानुसारेणोक्तविशेषणगुरूपगमने फलं निरतिशयं दर्शयति स गुरुरिति युक्तं समाहितं शिष्यगुणाः प्रशांतचित्ताय शमितेंद्रियायेत्युक्तागु
णास्तैरन्वितमानित्वादयश्च भगवद्गीतोक्तास्तैरन्वितमित्यर्थः । ब्रह्मविद्यैव प्लवो ब्रह्मविद्याप्लवस्तेनेत्यर्थः स्वांतमंतःकरणं तदुपाधिश्च तेनोपाधीयमानो जीवो ल
क्ष्यते तस्य ध्वांतमात्मस्वभावावरणात्मविक्षेपलक्षणमनाद्यनिर्वाच्याज्ञानं तदेव महानुदधिरपर्यंतत्वात्तमित्यर्थः ५३ कथमुक्तलक्षणो गुरु
रुक्तविशेषणं शिष्यं सम्यक्कृतज्ञानेन सद्यः संसारसागरं तारयेदित्यपेक्षायां प्रथमं पदार्थविवेकं कारयित्वा वाक्यार्थज्ञानोपदेशेनेत्यभिप्रेत्य संक्षेपतः

स गुरुस्तारयेद्युक्तं शिष्यं शिष्यगुणान्वितं ब्रह्मविद्याप्लवेनाशु स्वांतध्वांतमहोदधिं ५३
दृष्टिः स्पृष्टिः श्रुतिर्घ्रातिर्मतिर्विज्ञातिरेकव शक्तयोऽन्याश्च भिद्यंते चिद्रूपत्वेप्युपाधिभिः ५४

६

पदार्थविवेकमाह दृष्टिः स्पृष्टिरिति । अन्याश्च रसयतिवक्तिगत्यादयाश्च शक्तय इत्यर्थः । एता दृष्ट्यादिशक्तयोप्यखंडचिद्रूपा एव तथापि नेत्रादींद्रिय
द्वारकबुद्धिवृत्तिभेदोपाधिभिर्भिद्यंते न वस्तुतो भेदोस्तीति तेन तदुपाधिलक्षणपरित्यागेन सर्ववृत्तिसाक्षितयाऽनुगतप्रकाशैकस्वभाव एवात्मा त्वंपदार्थ इति प्रथ
मं ग्राहयेदित्यर्थः ५५

कथमुपाधिभिरेवविद्वृत्तिभेदाः स्वरूपत एव भेदो यथानुभवमस्त्विति चेन्नैवमात्मनो विकारित्वापत्तेः कल्पनागौरवाच्चेत्यभिप्रेत्य दृष्टांतेनाखंडरूपतां
१०३ साधयत्यपायेति यथा रविरपायोद्भूतिहीनाभिर्विनाशजन्मशून्याभिः स्वरश्मिभिः सर्वं ब्रह्मांडं दीपयन्प्रकाशयन्नेकएवाविकृतो वर्त्तते तथात्माप्यपा
योत्पत्तिहीनाभिरेवस्वरूपभूतविद्वृत्तिभिस्तत्तद्बुद्धिवृत्त्युपाधिभेदाभिन्नाभिः सर्वं विषयजातं विशेषतो जानाति सर्वदा सर्वदृक्सामान्येनापि सर्वं पश्य
सर्वगः त्यास्ति यतः सर्वदृष्ट्याधिष्ठानत्वेन सर्वाव्यभिचारी तस्माच्छुद्धो निर्विकार इति योजना ५४ यद्येवमुक्तलक्षण आत्मा कथं तस्य संसारोपलब्धिर्नापरिछे

अपायोद्भूतिहीनाभिर्नित्यं दीप्यन्रविर्यथा सर्वगः सर्वदृक्शुद्धः सर्वं जानाति सर्वदा ५५
अन्यदृष्टिः शरीरस्थस्तावन्मात्रो ह्यविद्यया जलेंद्वाद्युपमाभिस्तु तद्धर्मा च विभाव्यते ५६

देप्रतिभासश्चेत्यत आहान्यदृष्टिरिति अविद्यया शरीरस्थः स्थूलसूक्ष्मशरीरयोरेवोपलभ्यमानत्वात्तत्रवर्त्तमानस्तावन्मात्रः शरीरं यावत्ता
वन्मात्रोहमिति मन्यमानोऽन्यदृष्टिर्देहवाद्येभ्यो व्यावृत्तात्मदृष्टिस्तद्गतधर्मैरात्मनो धर्मवत्त्वदृष्टिरपिस्त्यपरिच्छिन्नः संसारीवचावभासत इ
त त्यर्थः एतदेव दृष्टांतेन स्पष्टयति जलेंद्वादीति यथा चंद्रादिर्जले प्रतिबिंबितो जलोपाधिभेदाभेदवानिव ~~[illegible]~~ जलकं राम
पादिना कंपादिमानिव चाविवेकादेव विभाव्यते तथैव ताभिरुपमाभिस्तद्धर्मेत्याद्युक्तार्थः ५६ १०३

जलकंपादिना

तदेवमुपाधिपरामर्शमंतरेणात्मनि भेदसंसारादेरनुपपत्तेःमादुपाधीनां चात्मनो वहिः स्वातंत्र्येणासत्तायां प्रमाणाभावादविद्यामयत्वे सति नित्यशुद्धः परिपू
र्ण एव चिदात्मेत्यवांतरवाक्यैरवधारित आत्मैव सत्यज्ञानादिलक्षणं ब्रह्मेति महावाक्येनाचार्यादवगतात्मतत्वो मुमुक्षुरखंडाद्वयात्मकस्यैव सर्वदृश्य
त्वात्तद्व्यपोहेन तत्साक्षितयातदधिष्ठानतयाचाव्यभिचारी चिदेकरसं ब्रह्मात्मेति स्वानुभवमापादयन्नुच्यत इत्यभिप्रेत्यानुसंधानप्रकारमाह दृष्ट्वेति वा
ह्यं जाग्रदिति पंचीकृतपंचमहाभूततत्कार्यात्मकं समष्टिव्यष्टिरूपं सर्वं विषयजातं दृष्ट्वा दृष्टदृश्ययोरन्वयव्यतिरेकाभ्यां कार्यकारणान्वयव्यतिरेकाभ्यां चालो
तत च्याथ निमील्य तद्रूपं सर्वं दृश्यमात्रत्वेन कार्यं सर्वं कारणभूततन्मात्रत्वेन विलाप्येत्यर्थः अथानेनरंस्मृत्वा जाग्रद्दृष्टवासनाकार्यस्वप्नदर्शनं स्मृतिस्तां
कृत्वा विश्वं वैश्वानरसहितं स्थूलोपाधिं तद्वासनामये लिंगे सूक्ष्मभूतसहिते प्रविलाप्य वासनामयं स्वप्नमात्रमेवेति दित्यनुसंधेयमित्यर्थः तदपि लिंगशरीरं

दृष्ट्वा वाह्यं निमील्याथ स्मृत्वा तत्सुविहाय च अ
थोन्मील्यात्मनो दृष्टिं ब्रह्म प्राप्नोत्यनध्वगः ५७

वासनामयं प्रविहाय च वासनासहितस्य मनःप्राणेंद्रियसंघातस्यापि तत्कारणपंचतन्मात्रात्मनतिरेकात्तावन्मात्रेण प्रविलाप्य तेषां चोत्पत्ति
क्रमवैपरीत्येन तत्कारणाभासाऽज्ञानमात्रत्वेन प्रविलाप्यावस्थानं तदज्ञानं तत्कृत्वेत्यर्थः अथानंतरं सुषुप्तौ वीजात्मकमज्ञानमात्रं प्र
बुद्ध्वेति तं तदपि सदसत्वभिन्नाभिन्नादिप्रकारनिरूपणासहत्वाद्विबोधपरिकल्पितंधकारवद्वस्तुकिंचिदिति विवेकेन वाधित्वात्मनः सर्वाव
स्था साक्षितया तु स्मृतसच्चिदानंदमात्रस्वरूपदृष्टिं ज्ञानप्रकाशस्वरूपामुन्मील्य निरुपाधिकां कृत्वा स्थितो ब्रह्म प्राप्नोति सत्यज्ञानादिलक्षणं
ब्रह्मैव भवतीति यावत् अनध्वगोऽर्चिरादिकमध्वानं न प्राप्नोति ब्रह्मणः आत्मत्वात्गत्यापत्ताव्रह्मप्राप्तिरित्यर्थः ५८

अनध्वगोब्रह्मप्राप्नोतीत्युक्तमेवविशदयन्निरुपचरितैवास्यमुक्तिर्नोपासकस्येवापेक्षिकीतिद्योतयतिप्राणादीतिद्भ्यो सुषुप्त्यादीत्यर्थः स्वात्मस्थोना
१०४ विरादिमार्गस्थः यतोनिर्गुणःस्वात्मनिप्रविलापितसकलगुणइत्यर्थः शुद्धोनिरुपाधिकोतःस्वतःस्वभावतएवमुक्तइत्यर्थः ५७ अजोहमिति
एवंविधोहंब्रह्मास्मीतियोबुद्धोऽज्ञाननिद्रायानिर्गतःसनजायतेपुनःशरीरंनगृह्णातीत्यर्थः ५८ प्रबुद्धस्यपुनर्जन्माभावेहेतुमाहपूर्वोक्तमिति

प्राणाद्येवंविकंहित्वातीर्णोऽज्ञानमहोदधिं स्वात्मस्थोनिर्गुणःशुद्धोबुद्धोमुक्तःस्वतोहिसः ५८
अजोहंचामरोऽमृत्सुरजरोऽमयएवच सर्वज्ञःसर्वदृक्शुद्धइतिबुद्धोनजायते ५९ पूर्वोक्तं
यत्तमोवीजेतन्नास्तीतिविनिश्चयः तदभावेकुतोजन्मब्रह्मैकत्वंविजानतः ६०

सुषुप्ताख्यंतमोऽज्ञानमित्यादिनायत्पूर्वोक्तमज्ञानंतत्कालत्रयेपिनास्तीतिविनिश्चयःकस्मिन्नपिकालेसतोज्ञानमात्रान्निरोधानासंभवात् राम
स्पष्टज्ञानोदयमात्रएवतिरोधानाच्छुक्तिरजतवदित्यर्थः तदभावइतिकारणाभावात्कार्याभावइत्यर्थः ५९ १०४

अहंब्रह्मास्मीत्यात्मानं साक्षात्पश्यतोपि पूर्ववद्व्यवहारदर्शनात्तत्तद्धर्माधर्मनिबंधनं पुनः शरीरग्रहणं स्यादित्याशंक्य बाधितानुवृत्तिमात्रत्वात्तान्निव्य
वहारस्य न तन्निबंधनं पुनः शरीरग्रहणादिसंसार इति दृष्टांतपूर्वकमाह क्षीरादिति यथा सर्पिर्नवनीतं क्षीरादुपायेनोद्धृत्य तस्मिन्नेव निःसारी
कृते क्षीरे क्षिप्तं न पूर्ववद्विविक्तं भवति तथाऽसत्याद्बुद्ध्यादेः संघातात्स्वयमात्मा विविक्तो ज्ञानमात्ररूपेणोद्धृतो ब्रह्माहमस्मीति वाक्यादवगतब्रह्मभावः पूर्व
वत्पुनर्देही देहद्वयसंघाताभिमानवांस्तस्मिन्विद्यमानोपि न भवेदित्यर्थः साहंकारस्य हि कर्मबंधहेतुत्वं निरहंकारस्य न यथा चोक्तं भगवता यस्य ना
हंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लोकान्न हंति न निबध्यत इति ६० यदार्थपरिशोधनपूर्वकं वाक्यादहंब्रह्मास्मीति प्रतिबुद्धस्य

क्षीरात्सर्पिर्यथोद्धृत्य क्षिप्तं तस्मिन्न पूर्ववत् बुद्ध्यादेर्ज्ञस्तथाऽसत्यान्न देही पूर्ववद्भवेत् ६१
सत्यं ज्ञानमनंतं च रसादेः पंचकात्परम् स्याम दृश्यादिशास्त्रोक्तमहं ब्रह्मेति निर्भयः ६२

पुनः संसारभयशंका नास्तीत्युक्तेर्थे आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति श्रुतिमर्थतः पठति सत्यं ज्ञानमिति रसादेरन्नमयप्राण
मयमनोमयविज्ञानमयानंदमयाख्यकोशपंचकात्परं तदाधारभूतं ब्रह्म पुच्छं प्रतिष्ठेति निर्दिष्टं यत्तदेवाहदृश्येऽनात्म्येऽनिरुक्तेऽनिलय
नेऽभयं प्रतिष्ठां विंदत इति शास्त्रोक्तं ब्रह्माहं स्याम् अस्मीति यः स निर्भयो भवतीति योजना ६१

१०५

भयंकराणामपि भयंकरत्वोक्त्यात्मभूतस्य कुतो भयशंकावकाश इति ब्रह्मज्ञस्य पुनः संसाराभावमुक्तं द्रढयति यस्मादिति यदि वाग्निर्नो पावकादय इति पाठ
स्तदा इन्द्रः सूर्यः आदिपदग्राह्यौ इन्द्रमृत्यू गृह्येते तथा च श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचम इति वाङ्म
नःपावकादय इति पाठे ऽध्यात्मं वागादयोऽधिदेवमग्न्यादयश्च यस्माद्भीताः प्रवर्त्तन्त इत्यर्थः तथा च श्रुतिः केनेषितं पतति प्रेषितं मनः केन प्राणः प्र
थमः प्रैति युक्तः केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति
पंचमः इति च ६२ ननु विदुषोपि हरिहरहिरण्यगर्भादीनां नमस्कार्यत्वात्तदतिक्रमे भयसंभवात्कार्यशेषो विद्यत इति चेन्नेत्याह नामादि

यस्माद्भीताः प्रवर्त्तन्ते वाङ्मनःपावकादयः तदात्मानंदतत्त्वज्ञो न बिभेति कुतश्चन ६३ ज्ञात्वा
नामादिभ्यः परे भूम्नि स्वाराज्ये चेत्स्थितो द्वये प्रणमेत्कं तदात्मज्ञो न कार्यं कर्मणा तदा ६४

भ्य इति नाम वाङ्मन आदि प्राणान्तेभ्य उत्तरोत्तरं भूयस्त्वेन श्रुतिभ्यः परे परस्मिन् भूम्नि सर्वव्यवहारातीते अमृते स्वस्वरूपे द्वये त्वेव महिम्नि स्वराज्ये चि
दहमस्मि भूमा ब्रह्मेति व्यवस्थितश्चात्मज्ञो विद्वांस्तदा तस्यान्यं प्रति गुणभावाभावात्कं प्रणमेत् अन्येषामात्मभूतत्वात् ततः परिपक्वज्ञानस्य राम १०५
कृतकृत्यत्वान्न कर्मणा किमपि कार्यमस्तीत्यर्थः ६५

भूम्नीनामाक्षिप्य: परत्वेपिकथमद्वयत्वमित्याशंक्यनामादेरवस्थात्रयरूपस्याध्यस्तत्वेन मिथ्यात्वात्तन्मात्रैणास्तुरीयस्य भूम्नोऽद्वयत्वमितिवक्तुमवस्था
त्रयमत्रवदतिविराडिति अध्यात्माधिदैवतयोरभेदाभिप्रायेणविराडुक्त्वा नरइत्युक्तं विश्ववैश्वानरइत्यर्थः वाह्योवहिः प्रज्ञइत्यर्थः अंतः स्मरन्निति
स्वप्नेवासनामयविषयदर्शी प्रजापतिर्हिरण्यगर्भस्तैजसइतियोज्यं अव्याकृतमायोपाधीश्वराख्यंतत्वंप्राज्ञउच्यतइत्यर्थः ६५ एतदवस्थात्रया
त्मकंजगदध्यस्तत्वाद्धिरणोवस्तुभूतस्याहंब्रह्मेतिसम्यग्ज्ञानान्मुक्तोभवतीत्याहवाचेति त्वं स्त्रीसत्यःपरमात्मासोहमेवेत्येवंसत्यसंधोऽ

विराड्वैश्वानरोवाह्यःस्मरन्नंतःप्रजापतिः प्रविलीनेतुसर्वस्मिन्प्राज्ञोऽव्याकृतमुच्यते ६५
वाचारंभणमात्रत्वात्सुषुप्त्यादित्रिकंत्वसत् सत्योऽहमद्वयोहमितिपवेसत्यसंधोविमुच्यते ६६
भाह्यत्वाद्धयाभानोनाहोएत्रेतथैवच ज्ञानाज्ञानेनमेस्यातांचिद्रूपत्वाविशेषतः ६७

नायासेनमुच्यतइत्यर्थः ६६ आत्मतत्वाज्ञानाध्यस्तःसंसारस्तज्ज्ञानान्निवर्त्ततइत्युक्तेज्ञानाज्ञानयोरात्मधर्मत्वंस्यादित्याशंक्यदृष्टांतेन
प्रत्याहअरूपत्वादितिज्ञानाज्ञानयोरपिस्वाश्रयत्वात्कल्पितत्वेसतिनात्मधर्मत्वमितिभावः ६७

१०६

आत्मनो निर्विशेषत्वादेः शास्त्रप्रामाण्यादेव सिद्धेर्नात्र युक्तिकल्पनयामनः खेदनीयमित्यभिप्रेत्याह शास्त्रस्येति ६७ किं तद्ब्रह्मपरं शास्त्रं किंवा
सर्वदाहं पञ्च... ब्रह्मात्मज्ञाननिष्ठस्य फलं चिन्मयेत्यादौ यस्तु सर्वाणि भूतानीत्यादि मंत्रार्थमुदाहरति अहमेवेति ६८ आत्मनोऽद्वितीयब्रह्म
पत्वे शास्त्रसमर्थितः ... ह्यनिर्विशेषब्रह्मरूपत्वमुदाहरति नवाह्यमिति तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरिति श्रुतेरि

शास्त्रस्यानतिशंक्यत्वाद्ब्रह्मैवास्म्यहं सदा ब्रह्मणो मे न हेयं स्याद्ग्राह्यं वेति च संस्मरेत् ६८ अहमेव च भूतेषु सर्वेष्वेको नभोय
था मयि सर्वाणि भूतानि पश्यन्नेवं न जायते ६९ नवाह्यमध्यतो वांतर्विद्यतेऽन्यत्स्वतः क्वचित् अवाह्यांतः श्रुतेः किं चित्तत
स्माच्छुद्धः स्वयंप्रभः ७० नेति नेत्यादिशास्त्रेभ्यः प्रपंचोपशमोऽद्वयः अविज्ञातादिशास्त्राच्च नैव दृश्यो ह्यतोऽन्यथा ७१

त्यर्थः सर्वानुभूरित्यस्यार्थः स्वयंप्रभइति ७० सामान्येन सर्वप्रपंचसंस्पर्शरहितत्वे श्रुतिमुदाहरति नेतीति प्रपंचनिषेधद्वारेणैवात्म
विशेषोऽन्यपुनर्विषयतया सप्रपंच तयावेसत्रान्यदेवतद्विदितादथो अविदितादधियस्यामतंतस्यमतमविज्ञातंविज्ञानतामित्यादिशास्त्रमु
दाहरति अविज्ञातादीति ७१

राम
१०६

तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विदुरिति श्रुतिरेवमद्वयादित्वज्ञानामात्मानं जानतो देवाः फलप्राप्तिं विघ्नन्तीति चेन्नैवं देवानामप्यात्मभूतत्वाद्विदुषो
विघ्नश्रुतेरविद्वद्विषयत्वादित्यभिप्रेत्याह सर्वस्येति तस्य ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुतेरित्यर्थः ७२ एवं ब्रह्मात्मज्ञानवतो
देवैरप्युपास्यत्वसिद्धेर्न तस्य देवपशुत्वशंकापीत्यतो न कुतश्चिद्भयमस्तीत्यत्र श्रुतिमर्थतः पठति जीवं श्चेदिति यदैतमनुपश्यत्यात्मानं देव
मंजसा ईशानं भूतभव्यस्य न ततो विजुगुप्सते सर्वे स्मै देवा बलिमावहंति तमेवं विद्वानमृत इह भवतीति च श्रुतिभ्य इत्यर्थः ७३ यदुक्तं स तस्य

सर्वस्यात्माहमेवेति विद्वान्चेद्विदितं परं स आत्मा सर्वभूतानामात्मा ह्येषामिति श्रुतेः ७२
जीवं श्चेत्परमात्मानं स्वात्मानं देवमंजसा वेद्योपास्यः स देवानां पशुत्वाद्विनिवर्तते ७३
अहमेव सदात्मज्ञः शून्यस्त्वन्यैर्यथांबरं इत्येवं सततं संघत्वाद्सङ्गोऽतो न बध्यते ७४

घो विमुच्यत इति तत्सूच्यत्यहमेवेति स दात्मा चासौ तस्त्वेति सदात्मज्ञः तत्स त्वं स आत्मेति श्रुतिरिहोदाहरणं अहमेव भूत्वा इति वाचारं
भणश्रुत्यर्थो दर्शितः यथा वरमिति दृश्यसंसर्गशून्यत्वादुद्दृश्यत्वदृष्टो नो हिः असङ्गो नासक्तान्तभिसंन्धिरहितेतितस्करः इव न वध्यते वं
यनार्थहीनो भवति सद्यथा तत्र न दह्येत एतदात्म्यमिदं सर्वमित्यादिश्रुतिरिहोदाहार्या ७५

एवंविधत्तानामाबाध्येभिरेपश्रुभूताः शोभ्याभवंतीतिदर्शयन्नथयेन्यथातो विडरन्यराजानस्तेहाप्यलोकाभवंतीतिश्रुत्यर्थमाहरूपणादिति येषां
ब्रह्मातोन्यथैवोक्तेपरितेनामात्मभूतनया विदुस्तेहिरूपणाःशोभ्याभवंतीति योजना अभेददर्शीतुनरूपणादित्याहस्वराडिति एवंविजानन्नात्मरति
१०७ रात्मक्रीड आत्ममिथुन आत्मानंदः सस्वराड्भवतीतिश्रुतिरिहोदाहरणं तस्य सर्वेषुलोकेषु कामचारोभवतीतिश्रुत्यर्थमंत्रभागोदाहरणेन द्योत
यतितस्येति असन्नित्यर्थ असन्नितिछांदसं यस्त्वेवंब्राह्मणोविद्यात्तस्य देवा असन्वशे इति मंत्रोऽस्यायमर्थः यस्त्वेवं ब्राह्मणोब्रह्मनिष्ठ
वेवेदाहमेतंपुरुषंमहांतमित्युक्तप्रकारेण ब्रह्मात्मानंविद्यात्तस्यविदुषोदेवावशगाभवंतीति ७४ यस्माद्यथोक्तात्मज्ञानादेवकृतकृत्यता

रूपणात्तेऽन्यथैवातोविदुर्ब्रह्मपरंहिये स्वाराज्येनफलंतेषांतस्यदेवा असन्वशे ७५
हित्वाजात्यादिसंबंधान्वाचोन्याः सहकर्मभिः अभिन्नेवंसदात्मानंसर्वंशुद्धंप्रपद्यथ ७६

तस्मान्मुमुक्षुभिस्तदर्थंयत्नवद्भिर्भवितव्यमितितात्पर्यं हित्वेत्याह हित्वेतियस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनः सहप्राणैश्चसर्वैस्तमेवैकंजा
नथात्मानमन्यावाचोविमुंचथामृतस्यैषसेतुः अभिन्नेवंभ्रामयथआत्मानंमितिचवाक्यद्वयमत्रोदाहरणं अन्यावाचोऽनात्मविषया राम १०७
ःप्रवृत्तिपराः सर्वंसर्वंसर्वाधारभूतंशुद्धंविविक्तंनिर्विशेषमित्यर्थः ७६

तमेवप्रतिपत्तव्यमात्मानंस्तुत्यंतरेणाविशिनष्टि सेतुमिति सर्वव्यवस्थानांवर्णाश्रमादिमर्यादानांसेतुंविधारकं अथ अयमात्मा स सेतुर्विधृतिरे
षांलोकानामसंभेदायनैनंसेतुमहोरात्रेतरतःसकृद्विभातोह्येवैषब्रह्मलोकइतिश्रुतिरेवोदाहरणं ७६ एनं किल द्वारमात्मानंप्रपद्यतेरित्यपेक्षया

सेतुंसर्वव्यवस्थानामहोरात्रादिवर्जितं तिर्यगूर्ध्वमधःसर्वंसकृज्ज्योतिरनामयं ७७
धर्माधर्मविनिर्मुक्तंभूतभव्यात्कृताकृतात स्वमात्मानंपरंविद्याद्विमुक्तंसर्वबंधनैः ७८

कृता
मन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात अन्यत्रभूताच्चभव्याच्चयत्तत्पश्यसितद्वदेतिश्रुत्यर्थमाह धर्माधर्मेतिकृतांकृतंकार्यकारणा
दित्यर्थः ७९

ननु कथं सर्वबंधनैर्मुक्त आत्मा तस्य कर्तृत्वादि श्रवणादित्याशंक्याकर्तृत्वादेरपि सहैव श्रवणाद्विरुद्धोभयस्वभावस्यैकस्मिन्नयोगात्तत्स्वभा
१०८ वश्राप्तं कर्तृत्वादिकं मायामयं प्रमाणाविषयमकर्तृत्वादिकमात्मस्वभावइति विशेषमभिप्रेत्य विरुद्धधर्मवादिनीः श्रुतीरुदाहरति अकुर्वन्निति अनेज
दिकं मनसोजवीय इति मंत्रभागार्थः कुर्वन्सर्वकृदित्युक्तः शुद्धमपापविद्धमित्यस्यार्थः शुद्ध इति तद्धावतोन्याननत्येति तिष्ठदित्यस्यार्थमाह तिष्ठन्निति

अकुर्वन्सर्वकृच्छुद्धस्तिष्ठन्नत्येति धावतः मायया
सर्वशक्तित्वादजः सन्नवबुध्यते ७१

तिधावतो वेगवतोन्यानन्यान्मनः प्राणादीनत्येति अतीत्य गच्छतियत्र मनः प्राणादि गच्छति तत्र सर्वत्रात्मचैतन्यस्यापि व्यक्तिनियमादात्मातिष्ठन्न
पि गच्छतीव भासतइत्यर्थः अजायमानो बहुधा विजायतइति मंत्रार्थमाह अजः सन्नवबुध्यतइति सर्वत्र हेतुर्माययासर्वशक्तित्वादिति नहि मायायाम् राम
यामसंभावनीयमस्तीति भावः ८५ १०८

अक्रियस्यापिक्रियावत्त्वोपचारमुक्तं दृष्टान्तेन प्रपंचयति राजवदिति ८० यस्मादेवमात्मा स्वतो नित्यशुद्धत्वादिस्वभावः शास्त्रन्यायाभ्यामवगतस्तस्मान्नै
तथैव ज्ञानी यात्रान्यथेत्युपसंहरति निर्गुणमिति नैतेषु लोकेषु यो न ह कर्त्ता दोषावहं यतः प्रतिपाद्यवस्तु नेदं बोधयित्वा स्वस्य स्वरूपकाराय कारुणिक आचा

राजवत्साक्षिमात्रत्वात्सान्निध्यमात्रकोऽपि यथा ग्रामपत्तनगदात्माहं निःक्रियोऽकारकोऽद्व
यः ८० निर्गुणं निःक्रियं नित्यं निर्द्वंद्वं यन्निरामयं शुद्धं बुद्धं तथा मुक्तं तद्ब्रह्मास्मीति धारयेत् ८१

र्यः क्वचिद्यास्त्रतः क्वचित्फलकथनेन क्वचिद्विद्वदनुभवाभिनयेन पुनः पुनः प्रतिपादयन्निभूयो विपर्ययं कर्त्तव्यमिति न्यायादिति ८१

न्तं प्रकरणार्थं प्रतिपत्तिसौकर्यार्थं संक्षिप्य कथयति बंधं मोक्षमिति बंधं मोक्षं च सर्वं यथावद्विज्ञाय भवभयरहितः स्यादित्यन्वयः बंधः प्रमातृत्वकर्तृ
त्वादिप्रतिभासलक्षणः मोक्षो ब्रह्मस्वरूपावस्थानं सर्वमिति निःशेषं पूर्वोक्तप्रकारमित्यर्थः इदमुभयं बंधं मोक्षं च यतो हेतोर् ज्ञानात्मानात्मानुभवतः
१०९ ते अविविक्तादेहिनां बंधः तथा एकमनुवृत्तं कारणं द्वयं व्यावृत्तकार्यं च ज्ञेयं ज्ञेयं विषयभूतं तत्सर्वं हेयं बाध्यं विज्ञायेत्यन्वयः ज्ञेयाभ्यतीतं दृश्यात्पृथ
क् एव स्थितं परमं निरतिशयं विशुद्धं एकं ब्रह्मपदं वेदान्तैरधिगतं तत्त्वं परमार्थं तत् यथावद्विज्ञाय अमृतत्वेनोपादाय किं तत्त्वं श्रुतिमुनिगदितं श्रु
तिवाक्येन मुनिना गुरुणोपदिष्टमित्यर्थः एवमात्मानात्मतत्त्वं ज्ञात्वाऽनात्मनो हेयात्मतत्त्वनिष्ठः शोकमोहावतीतः स्यात् तत्र को मोहः कः शोक

बंधं मोक्षं च सर्वं यत इदमुभयं हेयमेकं द्वयं च ज्ञेयं ज्ञेयाभ्यतीतं परममधिगतं तत्त्वमेकं विशुद्धं विज्ञायैत
द्यथावच्छ्रुतिमुनिगदितं शोकमोहावतीतः सर्वज्ञः सर्वकृत्स्याद्भवभयरहितो ब्राह्मणोऽवाप्तकृत्यः ६१

एकत्वमनुपश्यत इति श्रुतेः सर्वं हि ब्रह्म तज्ज्ञानं न सर्वज्ञः स्यात् सर्वं स्वात्मन्येकं करोतीति सर्वकृत् स्यात् तथा च मुक्तविषया श्रुतिः अहं विश्वं भु
वनमभ्यभवामिति देवर्षिगानार्थं अभ्यभवमभिभूतवान् आत्मसात्कृतवानस्मीति श्रुत्यर्थः भवभयरहितः न बिभेति कुतश्चनेति श्रुतेः ब्राह्मणो
मुख्यो यात्माब्राह्मणशब्दाभिधेयः अमौनं च मौनं च निर्विद्याथ ब्राह्मण इति अथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मण राम
इति श्रुतेः अवाप्तकृत्यः प्राप्तसर्वक्रियाफल इत्यर्थः सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुतेरित्यर्थः ६१ १०९

एवमात्मानं जानतः कृतकृत्यत्वमुक्तं प्रकटयति न स्वयमिति स्वयमात्मा स्वस्य न हेयगः स्वकृत्यकोटौ पतितो न चाप्युपादेयः एकस्मिन् कर्मकर्तृत्वासंभवात्स्वरू
पस्य क्षितौ नाशे वा स्वविषयहानोपादानयोरसंभवाच्च तथान्यस्य च न स्वस्य हेयगो ऽद्वैते ऽन्यस्यैवाभावात् नाप्युपादेयो ऽत एव तथान्यस्यापि स्वयमुपादे
यो हेयगो वा न भवत्यात्मान्तराभावाद् अनात्मनश्च बाधितत्वाद् अचैतन्याच्चेति योजना इत्येवंया निश्चासा सम्यङ्मतिः सम्यग्ज्ञानं स्मृता ब्रह्मविद्भि
रित्यर्थः ८२ कूटस्थचैतन्यैकरसे पूर्णे वस्तुनि हानाद्यसंभवान्निरायासं परं ब्रह्मैवास्मीत्येवंविधा या धियः सम्यङ्मतित्वे हेतुमाहात्मप्रत्ययि

न स्वयं स्वस्य नान्यस्य नान्यस्यात्मा च हेयगः उपादेयो न चाप्येवमिति सम्यङ्मतिः स्मृता ८३
आत्मप्रत्ययिका ह्येषा सर्ववेदान्तगोचरा ज्ञात्वैतां हि विमुच्यन्ते सर्वसंसारबन्धनैः ८४

केति आत्मानं ब्रह्मत्वेन प्रत्याययतीत्यात्मप्रत्ययिका हि यस्मादेषा मतिः स्वानुभवसिद्धेति वा सर्ववेदान्तगोचरेति प्रमाणान्तरत्वमस्या
दर्शयति एतां मतिं ज्ञात्वा लब्ध्वा सर्वसंसारबन्धनैर्विमुच्यन्ते कृतकृत्या भवन्तीत्यर्थः तथा च भगवद्वचनं इति गुह्यतमं शास्त्रमिदमुक्तं म
यानघ एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेति ८४

११० प्रकरणोक्तं ज्ञानमिदानीं प्रशंसन्नस्योपादेयत्वं द्रढयति रहस्यमिति रहस्यमुपदेशव्यतिरेकेण विज्ञेयं आचार्यवान्पुरुषो वेद सर्वे वेदा यत्पद
मामनंतीति च श्रुतेः देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्म इति श्रुते देवानां चापि रहस्यमित्यर्थः परं सर्वोत्तमं पवित्रं पा
वनं क्षीयंते चास्य कर्माणि एवं विदि पापं कर्म न श्लिष्यत इत्यादिश्रुतेः हितस्मात्परमं परमार्थरूपेण निरतिशयानंदप्रकाशमिति यावत्

रहस्यं सर्ववेदानां देवानां चापि यत्परं पवित्रं परमं ह्येतत्तदेनत्संप्रकाशितं ८५
नैतद्देयमशांताय रहस्यं ज्ञानमुत्तमं विरक्ताय प्रदातव्यं शिष्यायानुगताय च ८६

यदेवंरूपं सम्यग्ज्ञानं तदेनत्सम्यक्प्रकाशितं प्रकटीकृतमस्मिन्प्रकरणे इत्यर्थः ८४ एतस्य गोपनीयत्वं सूचयति नैतदि राम
ति यद्यस्माद्दुर्विज्ञेयत्वेन दुर्बोधत्वात्तद्धारणासमर्थानधिकारिणं विशिष्टं त्वनधिकारिभ्यो विविच्यति नैतद्देयमिति ८६ ११०

यस्माद्देवं लब्ध्वा ज्ञानदः आचार्यः कृतकृत्यो न प्रत्तोमादिना ज्ञानं प्रयच्छति तस्मात् सुदुस्तरमानित्यादि शिष्यगुरोः प्रयुक्तः स्यात् यथाचार्यः कृप
याविद्यां दद्यादित्येतमर्थमाह ददतस्त्विति न विद्यते यस्मादिति योज्यं तस्माच्छिष्यगुरोः सदा प्रयुक्तो ज्ञानमिच्छन् संपादयेत्तरेत् संसारमिति
शेषः ८६ आदावित्योपसंहारे देवताचार्यनमस्कारैतन्मन्त्रे विघ्नोपप्रत्येतरं गत्वव्यापनायकार्यं विविति दर्शयति श्लोकद्वयेन ज्ञानमि

ददतस्त्वात्मनो ज्ञानं नित्यं कृपयोः स्यो न विद्यते ज्ञानमिच्छन् तरेत्तस्मात् प्रयुक्तः शिष्यगुरोः सदा ८७ ज्ञानं ज्ञेयं तत
था ज्ञाता यस्मादन्यत्र विद्यते सर्वज्ञः सर्वशक्तिर्यस्तस्मै ज्ञानात्मने नमः ८८ विद्ययात्तारिताः स्मो येर्जन्मसमुत्तुम
होदधिं सर्वतेभ्यो नमस्तेभ्यो गुरुभ्यो ज्ञानसंकुलम् ८९ इति सम्यक्मतिप्रकरणं सप्तदशं १७

त्यादिना ज्ञानात्मने विज्ञसदानंदरूपायेत्यर्थः ८९ विद्ययेतित्र ज्ञानसंकुलमिति छेदः सम्यग्मतिप्रकरणं सप्तदशं विवृतं॥

१११

पूर्वस्मिन्प्रकरणे ब्रह्मात्मविषयमपरोक्षज्ञानं मोक्षसाधनं वेदांतेभ्यो भवतीत्युक्तं तदयुक्तं वेदांतानामपि स्वर्गकामादिवाक्यवत्परोक्षज्ञानजन
कत्वात्ततोऽपरोक्षज्ञानाय प्रसंख्यानमेष्टव्यमिति केचित्प्रतिपेदिरे तन्मतनिराकरणेन पूर्वोक्तं सर्वं स्वसिद्धांतं श्रौतमुपपत्तितः स्फुटमुपपाद
यितुं प्रकरणांतरमारभमाणो देवतानमस्कारव्याजेनांतःकरणवृत्तिभावाभावसाक्षिणं कूटस्थं चिदेकतानमेवात्मानं नित्यापरोक्षं वेदां
ताः ब्रह्मेति प्रतिपादयंतीत्यपरोक्षं ब्रह्म समर्थयंतीति सूचयन् प्रकरणप्रतिपाद्यं दर्शयति येनेति वृत्तयो धीपरिणामाः अलातचक्रमि

येनात्मना विलीयंते उद्भवंति च वृत्तयः नित्यावगतये तस्मै नमो धीप्रत्ययात्मने ॥१॥

वाऽत्मना येन चैतन्यज्योतिःस्वरूपेण विलीयंते सुषुप्तौ अवस्थांतरे उद्भवंति च विदात्मव्याप्ता इत्यर्थः धीप्रत्ययाः साभासबु राम
द्धिवृत्तयस्तेषामात्मने तदध्यासाधिष्ठानायेत्यर्थः नित्यश्चासाववगतिश्चेति विग्रहः ॥१॥ १११

इदानीं श्लोकेनार्थमुमुक्षूणां विश्वासार्थं स्वाचार्यगुणोपवर्णनपूर्वकं संप्रदायशुद्धिं कथयति प्रणम्येति संभृतैरभेद्यतयाघटितैः श्रुतेर्वचोभिर्वेदांतवा
क्यरूपनिस्त्रिंशैररातीन्भेदतत्त्वारणपवादिनो उद्धृतरत्नापहारिणः शत्रून्प्रमथ्य सम्मूलमुन्मूल्य यो विशालधीरप्रतिहतदीर्घबुद्धिर्वेदांतया मंजू
षागतं निधिं निधीयतेऽस्मिन्सर्वमिति निधिर्ब्रह्म एवं ब्रह्मात्मतत्त्वं ररक्षतस्मै यतींद्राय गुरोर्गरीयसे परमगुरवे नमस्करोति योजना १ एवं नमस्कारव्या
जेन प्रकरणार्थं स्वसंप्रदायशुद्धिं चोक्त्वा तत्त्वमस्यादिवाक्यादेवापरोक्षज्ञानमात्मनीति प्रकरणस्थितं ह्रूतं तावदाह नित्यमुक्त इति सदेवा

प्रणम्य वन्द्योपमयुक्तिसंभृतैः श्रुतेररातीन्नशतश्रीवचोऽसिभिः ररक्ष वेदार्थनिधिं विशालधीर्नमो यतींद्राय
गुरोर्गरीयसे २ नित्यमुक्तः सदेवास्मीत्येवं चेन्न भवेन्मतिः किमर्थं श्रावयत्येवं मातृवच्छ्रुतिरादृता ३

मदृ हमेव सदास्मि नित्यमुक्तश्चेत्येवं चेत् दृष्टपरोक्षा मतिर्वेदांतवाक्यान्न भवेत्तर्ह्येवं सिद्धवन्निर्देशेन तत्त्वमसीति श्रुतिः किमर्थं कस्माद्
दृता आदरवती पुनः पुनर्मातेव पुत्रहितैषिणी श्रावयेदित्यर्थः ३

नित्यापरोक्षस्वभावात्मस्वरूपत्वाद्ब्रह्मणो वाक्यादेवापरोक्षज्ञानमारोपितानर्थनिवृत्तिफलमुत्पद्यत इत्याह सिद्धादेवेति अहमित्यत्राहंशब्दलक्ष्या
११२ दपरोक्षतया स्वतःसिद्धादात्मनः सकाशाद्युष्मदर्थः पराग्वर्ग्यो हि अहंकारादिस्त्वमित्यादिशासनैर्गुरूणा सहितैः शोधितार्थैरितियावद्विविच्यते भ्रम
गृहीतपारोक्ष्यसद्वयत्वाकारविलापनेनात्मतत्त्वं प्रतिपाद्यत इत्यर्थः तत्र दृष्टान्तार्थः स्पष्टः ४ ननु दृष्टान्तदार्ष्टान्ताभ्यां स्वरूपप्रतिपत्तिः शाब्दीति यद्वा नित्या
परोक्षात्मैव ब्रह्मतत्त्वगमकस्याऽनर्थनिवृत्तिहेतुरित्येतत्क्रमेण दृष्टान्ताभ्यां साधयति शाब्देति तथा ब्रह्मण एवात्मत्वेनास्तितानेन जीवेनात्मनानुप्र

सिद्धादेवाहमित्यस्माद्युष्मद्धर्मो निषिध्यते रज्ज्वामिवाहिधीर्युक्त्या तत्त्वमित्यादिशासनैः ४
शाब्दप्रामाण्यतो ज्ञेया धर्मादेरस्तिता यथा विषापोहो यथा ध्यानात्तद्वृत्तिः स्यात्त्वात्मनस्तथा ५

विश्वपतत्त्वमसीति शाब्दप्रामाण्यतो ज्ञेयेति दार्ष्टान्तिकं योज्यं ध्यानाद्गरुडादिमन्त्रबीजस्मरणाद्विषापोहः सद्यो विषनिवृत्तिस्तथाप्यात्मनो स्म
ऽविद्याद्यनर्थरूपस्य वाक्यादात्मतत्त्वावगममात्रेणासद्य एव वृत्तिर्बाधरूपा निवृत्तिः स्यादित्यर्थः ५ ११२

ननुवाक्योत्थाहंब्रह्मास्मीतिप्रत्ययवदहंकरोमीत्यपिप्रत्ययोनुभवसिद्धस्तत्रकोहेतुरयमेवापरेणाबाध्यतइत्यत्रेतिशंकतेसद्ब्रह्माहमितितत्र
नियामकंहेतुंवदन्नुत्तरमाह नयोरितियुक्ततरत्वमितितस्यायमर्थः यथापूर्वप्रवृत्तयागविनियोजकप्रकरणापेक्षयाप्रवृत्तत्वाल्लिंगादयोःप्राबल्यएवंवाध्य
तेयथावापूर्वमेवप्रकृतेर्विकृतावतिदेशप्राप्तानामंगानांविकृतिगतविशेषोपदेशेनपाश्चात्येनबाधइतियुक्तत्वेप्यनियमोबाध्यबाधकयोःएवंपरी
भावस्यनतथास्यन्यायस्येतियुक्ततरत्वमुक्तमिति ६ अत्रकःप्रमाणजःप्रत्ययःकोवाऽज्ञानजइतिविवेकार्थंविविच्यतद्दर्शयतिसदस्मीतीति

सत्ब्रह्माहंकरोमीतिप्रत्ययावात्मसाक्षिकौतयोरज्ञानजस्यैवत्यागोयुक्ततरोमतः ६
सदस्मीतिप्रमाणोत्थाधीरन्यात्तत्रिभोद्भवा प्रत्यक्षादिनिभावाविबाध्यतेदिग्भ्रमादिवत् ७

सदस्मीतिधीस्तत्त्वमसीतिनिर्दिष्टवाक्यप्रमाणोत्थाअन्याकर्त्ताहमित्यादिधीस्तत्रिभोद्भवाप्रमाणाभाससमुद्भूताविवेकदोषाद्भवे
दित्यादित्यर्थः बाधस्त्वज्ञानस्यापिप्रत्यक्षाभासबाधनंदृष्टान्तेनबुद्धिमारोहयतिप्रत्यक्षादीति॥ ॥

नत्वब्रह्मास्मीतिबुद्धिवत्कर्तृत्वादिबुद्धेरपिसत्त्वंवदधर्मेचरसहिकर्त्री मोक्ते स्यादुर्मनीषिणाइत्यादिवचनाच्छास्त्रसिद्धत्वेन तुल्यमितिकथंतस्याः वा
११३ ध्यत्वमित्याशंक्याह कुतोहमोक्तेतीति शास्त्रानभिज्ञानांतदभिज्ञसंगतिहीनानामविकर्त्रीभोक्ताहमस्मीतिधियः सिद्धत्वात्कुर्वित्याद्विशास्त्रंलो
कसिद्धार्थानुवादि नानधिगतार्थबोधकमित्यर्थः सदस्मीतिधीस्तुश्रुतेरनन्यसिद्धार्थायाः सकाशाज्जातेत्यर्थः तस्मादेतयैवनिर
वकाशयासदस्मीतिश्रुतिजातयाधियैवान्यासावकाशानुवादवाक्यजन्यावाध्यतेवाधितएवेतिवाच्यम् ८ तदेवंवाक्यादेवापरोक्षज्ञानमात्म

कुतोहमोक्तेतिपश्चात्त्वंलोकबुद्ध्यनुवादिनम् सदस्मीतिश्रुतेर्जातावाध्यतेऽन्यैनतयैवधीः ८
सदेवत्वमसीत्युक्तेनात्मनोमुक्ततोध्रुवम् प्रपद्यतेप्रसंख्यानमतोयुक्त्यानुचिंतयेत् ९
सकृदुक्तेनगृह्णातिवाक्यार्थज्ञोपियोभवेत् अपेक्षेतेतएवान्यद्वचोवाचामद्धूर्यहितम् १०

विषयमुत्पद्यतेनत्वनिरपेक्षमेवानर्थनिवृत्तिहेतुरितिस्वमतमुपन्यस्यस्वपूर्व्यमतमुद्भावयति सदेवेतिप्रसंख्यानंशब्दावृत्ति
युक्त्यासहाभ्यसेदित्यर्थः ९ उक्तमेवसाधयति सकृदितियोपिवाक्यार्थज्ञोएकार्थसकृदुक्तंनगृह्णातिनजानातिनसम्यक्बुध्य राम
तिपद्यतेयतोऽतएवान्यत्सहकारिभूतमपेक्षेतेयदपेक्षतेतदाहयंवाक्यानुचिंतनंयुक्त्यालोचनंचपूर्वश्लोकेवयमवोचामेत्यर्थः १० ११३

नतु तत्त्वमस्यादिवाक्येषु विधिर्नोपलभ्यामहे ब्रह्मात्मभावस्य च स्वत एव सिद्धेर्मुमुक्षोर्नियोगोपि न घटत इत्यत आह नियोग इति वाक्यमात्राद्देका
त्म्यस्याप्रतिपन्नत्वात्साक्षात्कृतत्वाभावात्तावन्नियोगोऽविरुद्धो भवेद्यावत्संवेद्यता ब्रह्मात्मैकात्म्यताऽदृढादृढवान प्रतीयत इति योजना स नियोगः
कर्मणामग्निहोत्रादीनां यथा भवेद्वाक्यादवगतानामपि फलप्राप्तये इति दृष्टान्तार्थः ॥ किंच विधिमन्तरेणा चेद्ब्रह्मात्मैक्यं वाक्यात्स्वयमेव प्रतिप
द्येत तदा यमनियमादिकमनुष्ठीयमानं मिथ्या स्यादुपकार्याभावादित्याह चेष्टितमिति चेष्टितमनुष्ठितं यमादि स्वच्छन्दः स्वेच्छावान नियुक्त इति

नियोगोऽप्रतिपन्नत्वात्कर्म्मणां स यथा भवेत् अविरुद्धो भवेत्तावद्यावत्संवेद्यतेऽदृढा ॥ चेष्टितं च तथा मिथ्या स्वच्छन्दः प्रतिपद्य
ते प्रसंख्यानमतः कार्यं यावदात्मानुभूयते ॥ १२ सदस्मीति च विज्ञानमक्षजैर्बाध्यते ध्रुवं शाब्दोत्थं दृढसंस्कारैर्दोषैश्चाक्षिप्यते बहि १३

यावत् प्रतिपद्यत इत्यध्याहारः आत्मा तु भूयते साक्षात्क्रियत इत्यर्थः १२ इतोपि प्रसंख्यानं विधित्वेनानुष्ठेयमित्याह सदस्मीति सद
स्मीति शब्दोत्थं विज्ञानमक्षजैः प्रत्यक्षप्रभवैः कर्त्ताभोक्तेत्येवमाद्याकारैर्बाध्यते ध्रुवं निश्चितमेतत् अक्षजस्य प्राबल्ये हेतुगर्भं वि
शेषणं दृढसंस्कारैरिति किंचानेन मुमुक्षुर्दोषैः रागादिभिश्च बहिराक्षिप्यते बहिर्मुखः क्रियतेऽतः प्रसंख्यानं दोषनिवृत्तये च कार्यमि
त्यर्थः १३

११४ नकेवलं चिरनिरूढवासनाघटितत्वेन प्रत्यक्षस्यैवाल्पमपि तु विशेषविषयत्वाच्चेत्याह अतेति अतः शब्दोऽनुमानं लिंगत्वानं विप्रतिपन्नाभ्यां योरपि तत्रसं
भाव्यमानत्वाद् अत एव संभवतानुप्रत्यक्षस्य तदभावादुक्तं बाधकत्वमित्यर्थः १४ यदि वाक्यार्थज्ञानमात्रात्कृतकृत्यता कस्यचिद्दृश्येत तदा प्रसंख्यानक
ल्पनमनर्थकं स्यान्न तु तथा कश्चिद्दृश्यते अतः प्रसंख्यानमावश्यकमित्याह वाक्यार्थेति तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे तेह्यस्य विदितज्ञा
नित्वादेव वाक्यार्थज्ञानमात्राद्वामदेवादिः कृतकृत्यो दृश्यत इति चेत्तत्राह यद्वेति दृश्यते निर्दुःखः खरखन्नरः श्लोकगतेनान्वयः १५ वाक्यार्थप्र

अतोऽनुमानजन्मानैषा मान्यविपर्ययो यतः प्रत्ययावर्तजोऽवश्यं विशेषार्थो निवारयेत् १४
वाक्यार्थप्रत्ययी कश्चिन्निर्दुःखो नोपलभ्यते यदि वा दृश्यते कश्चिद्वाक्यार्थश्रुतिमात्रतः १५
निर्दुःखोऽतीतदेहेषु कृतभावोऽनुमीयते चर्या नो शास्त्रसंवेद्या स्यादनिष्टं तथा सति १६

वणमात्रात्कश्चिद्यदि निर्दुःखो दृश्यते श्रुतिपुराणादौ सोऽतीतदेहेषु कृतभावोऽनुष्ठितप्रसंख्यानोऽनुमीयते निर्दुःखत्वलिंगेनेत्यर्थः किंच स
कृच्छ्रितात्तवाक्यार्थस्य विध्यनभ्युपगमेनास्माकं चर्यापरमहंसाश्रयाचारोऽशास्त्रसंवेद्या स्यात् शास्त्रविहितानस्यान्नयासस्यानिष्टं स्याद रम
त्याश्रमचर्यापरित्यागेप्याहूध्यति ततो न भवेदित्यनिष्टप्रसंग इत्यर्थः १६ ११४

कस्तर्हि प्रसंख्यानविधिपक्षे सिद्धवस्तूपदेशस्यार्थः स्यादित्यत आह सदसीति त्वं सद्ब्रह्मासीति वर्त्तमानापदेशेन फलमिदं साधनविधानार्थमुच्य
ते यतो यस्मात्सर्वत्र फलमुक्त्वा साधने विधेयमतो ब्रह्मास्मीत्येककामं प्रसंचक्षीतेति सार्थको विधिर्भवेदित्यर्थः प्रसंख्यानमेव किमिति विधीयते ज्योतिष्टो
मादि कस्माद्ब्रह्मभावाय न विधीयत इत्यत आह न तदन्यदिति प्रसंख्यानादन्यदिह वेदान्तेषु प्रसिद्धार्थसिद्धार्थाभिव्यंजनसमर्थं साधनं यत्तन्नेष्यते
ज्योतिष्टोमादेर्व्यंजकत्वसामर्थ्याभावादित्यर्थः १७ पूर्वपद्यमुपसंहरति तस्मादिति किं कुर्वन् साधनतत्साध्यविरुद्धं त्यजन् साधनं प्रसंख्यानं
तत्साध्यं तत्फलमात्मैकत्वसाक्षात्कारः न हि रुद्धं कर्म निषिद्धं शमनं शमः आदिपदाद्दमोपरत्यादिग्रहः शमादियुक्तः सन्नित्यर्थः १८ सिद्धांत

सदसीति फलं चोक्त्वा विधेयं साधनं यतः न तदन्यत्प्रसंख्यानात्प्रसिद्धार्थमिहेष्यते १७ तस्मादनुभवायैव प्रसंचक्षीत यत्नतः त्य
जन् साधनतत्साध्यविरुद्धं शमनादिमान् १८ नैजदेवं रहस्यानां नेति नेत्यवसानतः क्रियासाध्यं पुरा प्राप्तं न मोक्षो नित्यसिद्धतः १९

उपक्रमते नैजदेवमिति किं वेदान्तेषु प्रसंख्यानं साक्षाद्विधीयते किं वा वर्त्तमानापदेशेन फलवचनानुपपत्त्या कल्प्यत इति तन्नेत्याह
रहस्यानामिति उपनिषद्वाक्यानामित्यर्थः नेति नेति इत्यपि निषेधद्वारा तदवधिमात्रे ब्रह्मात्मस्वरूपे पर्यवसानदर्शनाद्वेदान्तानां न विधि
र्थतेत्यर्थः द्वितीयं प्रत्याह क्रियासाध्यमिति यत्क्रियासाध्यं फलं तत्सुरापूर्वकाण्डे प्राप्यं नोपनिषत्सु अत्र श्रूयमाणो मोक्षो न क्रिया
साध्यः कुतो नित्यसिद्धतोऽसाध्यत्वादित्यर्थः १९

तत्वमस्यादिवाक्यमपरोक्षाद्धितीयब्रह्मात्मज्ञानद्वारा तदत्तानेतद् ध्यस्तं चदुःखित्वादिसंसारं निवर्त्तयतीति वक्तुमज्ञानाध्यस्तदुःखादीत्यत्रदृष्टांतमा
११५ हयुचेति अदुःखित्वरादिदुःखरहितइत्यर्थः दार्ष्टांतिकमाहाहंकर्त्तेति नित्यादुःखे सदादुःखादिसंसाररहिते स्वस्वरूपे आत्मनिनिरुपाधिकेऽहंक
र्त्तृत्साभासांतःकरणाविविक्तोदुःखादिकर्मकोऽविवेकलक्षणयाऽविद्ययातथाध्यस्तइत्यर्थः अहंकर्त्तेतिपाठे स्वआत्मनीत्यत्रदुःखादिरितिशेषः २०

यत्रदुःखं यथाध्यस्तं पित्राद्दुःखेस्वआत्मनि अहंकर्त्तेतिथाध्यस्तो नित्यादुःखेस्वआत्मनि २०
सोध्यासो नेति नेतीति प्राग्वत्प्रतिषिध्यते भूयोध्यासविधिःकश्चित्कुतश्चिन्नोपपद्यते २१

आत्मनो ब्रह्मस्वभावाज्ञानेनाध्यस्तः संसारस्तत्स्वभावज्ञानमात्रान्निर्तितितत्वमसीतिच शास्त्रोक्तान्निवर्त्तनेतदात्मनःसर्वक्रियाधिकार राम
निवृत्तेःसुषुप्ताविवपुनरध्यासवीजाभावान्न तत्कृत्यस्यनप्रसंख्यानविध्यवसरइतिफलितमाहसोध्यासइति प्राग्वदितिवतिप्रतिप्रयोग ११५
हूस्तद्दृष्टान्ताप्राप्तभावादारोपितत्वं दृढयति २१

ननु विषये ब्रह्मात्मनि विषयधर्माणां दुःखित्वादीनां कथमध्यासः संभाव्यते यतः पुरोवस्थिते विषये भ्रान्ते शुक्तिकादौ रजताद्यध्यासो दृष्ट इत्याशंक्य व्यभि
चारान्नैवं नियम इत्याह आत्मनीति यथा देहव्यतिरिक्तात्मवादिनामात्मनीह पुरस्थिते देहजरामरणाद्यध्यासस्तत्प्रतिषेधश्च यथा चेद्दुया विषयेपि ममता
ध्यासनिषेधाववुध्येते क्रियेते तथैव च प्रत्यगात्मनि ब्रह्मण्यप्यविषये संसाराध्यासतन्निषेधौ स्यातामित्यर्थः आत्मनीह तथाध्यास इति पाठे दृष्टान्तदार्ष्टान्ति

आत्मनीह यथाध्यासः प्रतिषेधस्तथैव च मलाध्या
सन्निषेधौ खेक्रियेते च यथाऽबुधैः ॥ २२ ॥

कपरतयोत्तरार्द्धं पूर्वार्द्धोऽस्पष्टार्थो अधिष्ठानस्वरूपमात्रस्फुरणमध्यासेपेक्ष्यते न विषयत्वेन स्फुरणं तदिह स्वप्रकाशे आत्मनि स्वतः सिद्ध
मिति नानुपपत्तिरिति भावः ॥ २२ ॥

११६ प्राप्तवत्प्रतिषिध्यतइत्युक्तंप्रपंचयति प्राप्तस्येतदिति प्रमाणासिद्धस्येत्संसारः प्रतिषिध्येत न हि संसारबंधनिवृत्तिरूपस्य मोक्षस्यागंतुकत्वाद्ध्रुवं निश्चितं मोक्षोऽ
नित्योभवेत्परमार्थतस्त्वात्मगतस्यबंधस्य परमार्थतएवनिवृत्तेस्तत्स्याज्ञैनोवस्त्वंतरापत्त्याविकारित्वादनित्यत्वमावश्यकं तथाऽनादिभावरूपस्यबं
धस्यपरमार्थत्वेतन्निवृत्तिरिवासंभाविनी सादित्वाभ्युपगमेतुतस्यात्मनैवकृतत्वान्निवृत्तस्यजातीयस्यपुनस्तस्मिन्नुद्भवस्तुत्पत्तुर्यपत्तेरनित्योमोक्षः
प्रसज्येतेवेतिबंधस्याविद्यत्वमवश्यमेष्टव्यं तस्यचज्ञानादेवनिवृत्तेर्निरर्थकंप्रसंख्यानमित्यभिप्रेत्योपसंहरति अतइति यथाज्ञोनरिदेन

प्राप्तस्यप्रतिषिध्येतमोक्षोऽनित्योभवेद्ध्रुवं अतोऽप्राप्त
निषेधोऽयंदिव्यग्निचयनादिवत् २३

दिव्यग्निरितिव्यवहृतिः पृथिव्यामिवाग्निचयनमंतरिक्षादावारोप्याप्राप्तमेवप्रतिषिध्यते तथासंसारबंधरहितएवात्मनितदारोपनिषेधा राम
वितिदृष्टांतेनाह दिव्यग्नीति आदिपदादाकाशमालिन्यंतलोकिकंगृह्यते २३ ११६

आत्मनिर्बंधसंबंधबोधकप्रमाणाभावादपि न तत्र बंधस्य सत्ताप्राप्तिरस्तीत्याह संभाव्य इति अयमर्थः आत्मनिर्बंधसंबंधबोधकं प्रमाणं शब्दः प्रमाणांतरं वा सर्वथापि नोपपद्यत इत्याह शब्दः प्रत्ययो वेति प्रत्ययः प्रमाणांतरं तन्मात्रं शब्दो वा प्रत्ययो वा लोके गोचरे विषये संभाव्यः संभावनायोग्यो न चान्यथा विषयत्वायोग्योऽपि तथा च षष्ठी जातिगुणक्रियादिशब्दप्रवृत्तिनिमित्तरहितत्वादात्मनो न शब्दगोचरत्वं संभाव्यते येनायमात्मा संसारीति बोधः शब्दादुत्पद्येतेति तथा रूपादिहीनत्वाच्च बाह्येंद्रियवर्गस्तस्मिन्नक्रमते ऽत एव न तत्स्वरूपसंबद्धतया लिंगविशेषाग्रहणादनुमानादिप्रतीतिरपि तस्मिन्न संभवतीत्यर्थः

संभाव्यो गोचरे शब्दः प्रत्ययो वा न चान्यथा न संभाव्योऽतदात्मत्वादहं कर्तेत्येव च २७

भवतोऽवयवाद्यभावात् तदुपमानं भावरूपत्वादेव नानुपलब्धिरपीति प्रतीतिमात्रं परिशिष्यत इति न प्रमाणसिद्धो बंधसंबंध इति यतो न संभाव्यावात्मन्यपि शब्दप्रत्ययाविति किंच शब्दप्रत्यययोः प्रमाणत्वाभिमतयोस्तथैव चाहं कर्तेति प्रमाणत्वाभिमतस्य च तदात्मत्वाद्युक्तात्मत्वाच्च तत्तद्गोचरत्वमनुपपद्यते न ह्यागंतुकयोः शब्दप्रत्यययोरहं कर्तेत्येवं विदात्मनः एष एव स्वरूपमस्तीत्यात्मनि तु निजक्रियानुपपत्तिरित्यर्थः ॥२७॥

तस्मादध्यस्तनिषेध एव वक्तव्य इति सिद्धमित्याहाहंकर्त्रेति चैतन्ये चित्स्वरूप आत्मनि यदहं कर्त्रा साभासेन तः करणाविवेकेन कर्तृत्वादि न्यस्तमारोपितं त

११७ त्सर्वं नेति नेतीति निषिध्यते साहंकर्त्रा अहंकर्त्रा सहेत्यर्थः २५ अध्यस्तनिषेध एव चेद्बाध्येत क्रियते कथं तर्ह्यात्मनः स्वरूपोपलब्धिरित्यत आहोपलब्धि

रिति उपलब्ध्यादिस्वरूपत्वे प्रमाणाभावादिति तत्र च साक्षादित्यादिनोक्तः ... श्रुतीनां प्रमाणत्वात्स्वप्रकाश एवात्मा सदा स्वतः सिद्ध इत्यर्थ

: २६ नन्वात्मात्मीयमिति च द्वयमहं मम प्रत्ययगोचरत्वेन प्रसिद्धं तथा सति कथमात्मा स्वतः सिद्ध इत्याशंक्याविद्यावशात्तथा प्रसिद्धिरित्याह सन्नि

अहंकर्त्रात्मनि न्यस्तं चैतन्ये कर्तृतादि यत् नेति नेतीति तत्सर्वं साहंकर्त्रा निषिध्यते २५ उप

लब्धिः स्वयंज्योतिर्दृशिः प्रत्यक्सदक्रियः साक्षात्सर्वान्तरः साक्षी चेता नित्योऽगुणोऽद्वयः सन्नि २६

धौ सर्वदा तस्य स्यात्तदाभोऽभिमानकृत् आत्मात्मीयद्वयं चातः स्यादहंममगोचरः २७

धाविति अभिमानकृदहंकारस्तस्य चिदात्मनः सर्वदा सन्निधौ सति तदाभश्चैतन्यप्रकाशयुक्तः यात तदाकारः स्यादतो हेतोरात्मात्मी राम

यद्वयं च स्यादहं ममेति व्यवहारगोचर इत्यर्थः तथा च साभासेन तः करणतद्धर्माविवेकादात्माहमिति ममेति च भासमानोऽपि स्वतः सिद्ध एव ११७

स्वभावत इति भावः २७

एवमहंप्रत्ययादेरन्यविषयत्वोपपादनेनसंभाव्योगोचरेशब्दः इतिश्लोकोक्तं प्रत्ययागोचरत्वमात्मनः प्रतिपादितमिदानींशब्दस्यापि विषयांतरंदर्शयंस्त दगोचरत्वमुपपादयतिजातीति तस्मिन्नहंकृत्यहंकारेसाभासेहिनिश्चितंजातिकर्मादिशब्दप्रवृत्तिनिमित्तवत्वाच्छब्दाः प्रवर्त्तंतेतदभावात्प्रवृत्तिनिमित्तजा त्याद्यभावात्स्वस्वरूपभूतेआत्मनिनिरुपाधिकेकश्चिदपिशब्दोनप्रवर्त्ततेतंविषयीकुर्वन्नित्यर्थः अतआत्मास्वतःसिद्धइतिभावः २८ स्वतःसिद्धस्वरू पआत्मनिप्रवृत्तिनिमित्तजात्याद्यभावात्कश्चिदपिशब्दोनप्रवर्त्ततेचेत्कथंतस्यवेदांतवेद्यतयोपनिषदत्वमुद्घुष्यतइत्यतआहाभासइति पत्राहं

जातिकर्मादिमत्वाद्धितस्मिन्शब्दास्त्वहंकृति नकश्चिद्वर्त्ततेशब्दस्तदभावात्वआत्मनि २८
आभासोपहतत्वेनशब्दाः प्रत्यग्दृशिस्थिताः तन्निर्दिशेयुर्नैवात्मानमभिदध्युःकथंचन २९

काराद्यावाभासश्चैतन्यप्रतिबिंबोदयस्तत्रैवाभासाविविक्तेंतःकरणादेर्वाचकत्वेनस्थिताआत्मादिशब्दाः प्रत्यग्दृशिप्रत्यक्तयाभासमानेदृशिमात्मा नंसुद्धेतन्निर्दिशेयुर्लक्षणयाज्ञापयेयुर्नतुतंसाक्षादभिदध्युः कथंचनविशेषणादिप्रकारेणापीत्यर्थः अतोनोपनिषदत्वप्रसिद्धिविरोधइति भावः २९

कथं नामिदं स्युरित्यत्र हेतुमाह नहीत्यर्द्धेन ३० न तु लक्षणयापि यत्र शब्दस्य तात्पर्यं स एव शब्दार्थस्तथा चात्मादिशब्दानामहंकारातिरिक्ते प्रत्यगात्मनि
११८ चेद्वृत्तिः कथं तर्हि लोका अहंकारादावात्मशब्दं प्रयुंजत इत्यपेक्षायामुपचारादिति सदृष्टांतमाह आत्माभास इति श्लोकेन अहंकृदहंकारो वस्तुतोऽना
त्माप्यात्माभासः आत्मवदवभासमानत्वात्प्रत्यालेव नो भासते यथा तथात्मादिशब्दैरपि यथाप्रतिभासमुच्यते वस्तुगत्या तु शब्दप्रत्यययोः शुद्ध एवात्मनि पर्या
वसानं यथाग्न्यर्थः शब्दो दहनार्थस्तथाप्युल्मुकं दहत्यपि दहतीत्युल्मुकादौ प्रयुज्यमाना अंजसा साक्षादुल्मुकादौ न च पर्यवस्यंति तेषां दाहाद्याश्रयत्वा

न ह्यज्ञात्यादिमान्कश्चिदर्थः शब्दैर्निरूप्यते ३० आत्माभासो यथाऽहंकृदात्मशब्दै
स्तथोच्यते उल्मुकादौ यथाग्न्यर्थः परार्थत्वान्न चांजसा ३१

नुपपन्नेव हत्यादिशब्दानां परार्थत्वान्नदभिव्यक्ताग्न्यर्थत्वाद्वाऽग्नावेव पर्यवस्यंति तथाहंकारस्यात्माभिव्यंजकत्वात्तस्मिन्जडे परिच्छिन्ने राम
पराधीनप्रकाशे आत्मादिशब्दाश्चित्सदानंदानंतादिपर्या अनुपपद्यमाना विचार्यमाणाः शुद्ध एव पर्यवस्यंतीति सर्वमुपपन्नमित्यर्थः ३१ ११८

य

आभासोऽत्रेति श्लोके सिद्धोऽतिनाभासोऽङ्गीकृतः सत्त्वभेदविपर्यासविशिष्टतयाभासमानः परमार्थोऽपरमार्थो वेति वादिविप्रतिपत्त्या संशयेन परमार्थ इति
त्वसिद्धं तं वक्तुं दृष्टान्तमाह मुखादन्य इति यथा मुखाभासो मुखप्रतिबिंब आदर्शानुकारत आदर्शभावाभावयोरनुकारादादर्शान्वयव्यतिरेकानुविधायि
त्वादिति यावत् मुखाद्ग्रीवाच्छादनागमायायितया लक्षितादन्यो न पुनः स्वरूपेतोति यो स्यं तम्भासति बिंबचेष्टया विनापि प्रतिबिंबं चेष्टते इत्यर्थः आभासा

मुखादन्यो मुखाभासो यथादर्शानुकारतः आभासान्मुखमप्येवमादर्शानुवर्तनात् २२

न्मुखमप्येवमन्यदेव कुत आदर्शानुवर्तनादादर्शानिरपेक्षत्वसत्तास्फुरणायोगादित्यर्थः तथा च ग्रीवास्थस्यैव मुखस्यादर्शे प्रतिबिंबितस्यादर्श
स्थतां वैशिष्ट्येन भासमानत्वमेवाभासत्वं तच्च न सत्यं मुखविमुक्तादर्शेति यद्धि रिक्त मात्रावात्तस्मिन्न दर्शनात् नाप्यसदपरोक्षप्रतिभासात्तस्मा
दनिर्वचनीय एवाभासस्तस्माद्ग्रीवास्थं मुखमिति भावः॥ ॥ रामरामराम॥ ॥

११९ ब

दार्ष्टांतिकमाहाहंकृतीति अहंकृत्यहंकारे आत्मनिर्भासश्चित्तनावत्स्वावभासो मुखाभासवन्मुखान्मुखप्रतिबिंबवच्छुद्धादात्मनो भिन्न इष्यते आत्मा शुद्धश्चाभा-
सादूर्ध्वः कृतो ज्ञातः प्रतिबिंबान्मुखवदित्यर्थः मुखस्य मुखाभासस्यादर्शस्य चाभासाश्रयस्य प्रतीतितो भेदेपि वस्तुतो भेदाभाववदात्मात्माभासतदाश्रयांतःकरणा-
दीनां प्रतिभासतो भेदेपि वस्तुतो नात्मातिरिक्तं किंचिदस्तीति न परमार्थो भेदस्तमभिप्रेत्याह विविक्तौ तौ न तथैव चेति। तावात्मात्माभासौ न तथैव मुखमुखाभास-
वि वस्तुतोऽपि विविक्तौ परमार्थभेदरहिताविंत्यर्थः। चकारादाभासाश्रयांतःकरणं च न तद्विविक्तमिति योज्यं ३२ एवं चिन्मात्रतत्त्वानाद्यविद्यायोगात्कार्यं चा-
हंकाराद्यप्रतिबिंबीतं तदेव विदात्मस्वरूपमुपाधिरूपतावैशिष्ट्याध्यासवशात्संसारीति स्वमतमुक्त्वा तदृढीकरणाय एकदेशिमतं दूषयितुमुपन्यस्यति संसारी-
ति यस्त्वहंकृत्याभासोऽस्माभिः पृथगुक्तः स एव संसारी त्वेकेमन्यंत इत्यर्थः नन्वाभासस्यावस्तुत्वात्कथं तस्य बंधमोक्षभागितया संसारित्वमित्याशंक्याभासशब्दे

२४

अहंकृत्यात्मनिर्भासो मुखाभासवदिष्यते सुखवच्छितिरात्मान्यो विविक्तौ तौ न तथैव च ३३
संसारी च स्वरूपेण आभासोऽप्यहंकृति वस्तुछायास्मृतेरन्यत्र माधुर्यादि चकारतः ३४

नविच्छायायाः अभिप्रेतत्वात्तस्याश्चावस्तुत्वान्नानुपपत्तिरित्यभिप्रेत्याह वस्तुछायेति छायावस्तु परमार्थानाक्रमे त्कामेतऽछायांगुर्वादिति
स्मृतेरितियोजना तथा च याज्ञवल्क्यः देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियः नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनादिकमिति नक्रेव
लेस्मृतिवचनादेव छायायां वस्तुत्वावगमोऽस्मत्पक्षे चकारेण माधुर्यादि छायायामासीनस्य सुखे माधुर्यं पल्लवैः शैत्यापल्लवे चेत्यर्थः ३५ राम ११९

पुनरेकदेशिमतत्रयमाह ऐक्यैकदेश इति। अस्य चित्सदानन्दस्य परमात्मन एकदेशः संसारी ममैवांशो जीवलोके जीवभूतः सनातन इति स्मृ-
तेरित्येके। अग्निविस्फुलिङ्गदृष्टान्तेन सर्वगतस्यात्मनो व्युच्चरणं जीतिश्रुतेः परमात्मनो विकारः संसारीत्यपरे। परे तु तदाभासाश्रय चिदाभा-
सविशिष्टोऽहंकार एव संसारी तन्मनो दृश्यं दिशं प्रतिलेवेति श्रुतेरित्याहुरित्यर्थः भाट्टादिमतमाह अहंकर्तैवेति। एतेनेन परमात्मांशादिरू-
प इत्यर्थः ३४ बौद्धमतमाह अहंकारादीति। संतानो विरलोऽस्य तया विच्छिन्नानि क्षणिकज्ञानान्येवात्मा संसारी न ततः पृथग्व्ययेको

द्वैकदेशो विकारो वा तदाभासाश्रयः परे। अहंकर्तैव संसारी स्वतंत्र इति केचन ३५ अहंकारादिसंतानः
संसारी नान्य ईश्वरः पृथक्। इत्येवं सौगता आहुस्तत्र न्यायो विचार्यताम्। संसारिणां कथा चोक्ता संप्रत्यं तत्त्वधुनोच्यते ३६

विज्ञानोत्पत्तिविनाशवद्भास्तीत्येवं सौगता आहुरित्यर्थः एवमुक्तेषु पक्षेषु वस्तुविषयत्वाद्विरोधाच्च विकल्पसमुच्चययोरसंभ-
वादन्यतमस्यैवकस्यचिद्रूपस्य चमथवास्मदुक्तस्य ब्रह्मणो वा विधया अहंकारादिगताभासाविवेकात् संसारीत्येतस्येति निर्धारणे
न्यायो विचार्यतामित्याह तत्रेति ३५ प्रासङ्गिकीं संसारिचिन्तां हित्वा प्रकृतमाभासनिरूपणं प्रतिजानीते संसारिणामिति॥ ॥

प्रकृतमाभासमेवन्निरूपयन्नादौ मुखाभासदृष्टान्तं विना परमार्थमुक्तं विशदयति मुखाभास इति योयमादर्शे मुखाभासो दृश्यते स किं मुखादर्शयो
रन्यतरस्य यस्य कस्यचिद्धर्म्मः किं वा मुखस्यैव धर्म्मः अथवा द्वयोरपि धर्म्मो वस्त्वंतरं वा किंचिदिति विकल्प्याद्यं निराकरोति धर्म्मो नान्यतरस्य स इति
१२० एतदेव स्पष्टयति द्वयोरिति द्वयोर्म्मध्ये एकस्यान्यतरस्य चेदाभासो धर्म्मः स्यात्तदा विमुक्तेन्यतरे सति दर्पणाविमुक्ते मुखे न हृतरूपादिवद्दर्श त

मुखाभासो य आदर्शे धर्म्मो नान्यतरस्य सः द्वयोरेकस्य चेद्धर्म्मो विमुक्तेन्यतरे भवेत ३७
मुखे न व्यपदेशात्स मुखस्यैवेति चेन्मतं नादर्शानुविधानाच्च मुखे सत्यविभावतः ३८

नगोचरो भवेत् मुखविमुक्ते वादर्पणे दृश्यो भवेन्न चैवमस्त्यतो नान्यतरस्य धर्म्म इत्यर्थः ३६ कल्पांतरमुद्भावयति मुखेनेति दूषयति नेति य राम
द्यपि मुखाभास इति मुखेन व्यपदिश्यते तथापि न मुखधर्म्म आभासः आदर्शानुविधानान्मुखैकधर्म्मत्वे तदयोगात् किं च सत्यपि मुखे दर्पणा १२०
विमुक्ते ऽविभावतो ऽदर्शनादित्यर्थः ३७

त्यतीयं कल्पमनूद्य प्रत्याह द्वयोरेवेति चेदिति द्वयोरप्यदर्शनाद्देवेति संबंधः नहि मुखादर्शयोर्विमुक्तयोराभासो दृश्यते नापि संयुक्तयोरयं धर्मो यथा कथं
चन संयुक्तयोरपि तद्दर्शनप्रसंगाच्च तथा दृश्यते तस्माच्च द्वयोर्धर्म इत्यर्थः तर्हि वस्तु परमार्थवस्त्वंतरमेवाभास इति चतुर्थपक्षं दूषयति नशंकनेऽदृश्यस्येति
सतो विद्यमानस्यैव सर्वैः करणैरदृश्यस्य राहोश्चंद्रसूर्ययोर्यदा कदाचिद्दृष्टिर्दर्शनं यथा तथा तथा मुखाभासस्यापि वस्तुभूतस्य सतो मुखसन्मुखदर्पं त
र्पणोपाधौ दर्शनं स्यादित्यर्थः ३८ वैषम्यमाह प्रागेवेति राहोरिति चेद्राहुपरागात्प्रागेव स्यादिति शास्त्रप्रमाणतः पुराणादिशास्त्रप्रमाणतो राहोः सिं
हिकेयस्य वस्तुत्वे सिद्धे तन्निष्ठितेनेह तथा निष्ठोपकप्रमाणमस्तीति शेषः नहि मुखदर्पणयोः संबंधात्पूर्वं मुखं दर्पणातिरिक्तवस्तुतामुखाभास त

द्वयोरेवेति चेत्तन्न द्वयोरेवाप्यदर्शनात् अदृश्यस्य सतो दृष्टिः स्याद्राहोश्चंद्रसूर्ययोः ३९
राहोः प्रागेव वस्तुत्वे सिद्धे शास्त्रप्रमाणतः छायापदेऽस्त्ववस्तुत्वं तस्य स्यात्सर्वयुक्तितः ४०

स्यैकेनचित्प्रमाणेनाप्यसंभावितेत्यर्थः राहोर्वस्तुत्वमंगीकृत्य पदार्थोत्तिकानन्तुगुणान्वस्तुक्तमिदानीं तस्यापि नास्तिवस्तुत्वमित्याभासस्य
वस्तुत्वेनायं दृष्टांत इत्याह छायापदे त्विति स्यात् भूम्यादिच्छायाराहुरिति केषांचिन्मते तस्मिन्छायापदे तु तस्य राहोरवस्तुत्वं स्यात्तस्मुखा
भासोपन्यासदृष्टांतो पूर्वोक्तयुक्तितो युक्तिसंचारादित्यर्थः ३९

वस्तुछायास्मृतेरित्यत्रयच्छायायावस्तुत्वेस्थितिःप्रमाणमित्युक्तंतत्राहछायाक्रांतेरिति नचित्स्वच्छायायाप्रतिशेषः नतुछायायाश्चेन्नप्रतिषिद्धपर
मपिवचनेनतस्याःवस्तुत्वमपिवोधयिष्यतीतिचेत् तत्रवक्तव्यंसाक्षाद्देवोतार्थावित्तिनाघटत्याहनहीति एकस्यवाक्यस्योभयार्थत्वेवाक्यभेदप्रसं
१२१ गादित्यर्थः नहितृतीयोनिषेधस्यप्राप्तिमात्रसापेक्षत्वान्निषेधविषयादेर्वस्तुत्वाभावेनिषेधानुपपत्तिरित्यत्रनियामकाभावादितिदूषणं ४०
यदप्युक्तंमाधुर्यादिकार्यदर्शनादर्थक्रियाकारित्वेनछायायावस्तुत्वमितितदप्यन्यथासिद्धमित्याहमाधुर्यादिति छायायासुपविष्टस्यपन्था

छायाक्रांतेनिषेधोयंनतद्वस्तुत्वसाधकः नह्यर्थांतरनिषेधसद्भावसमर्थितरंवदेत् ४१
माधुर्यादिचयत्कार्यंसुशाड्व्याघसेवनात् छायायानत्वदृष्टत्वादपामेवत्वदर्शनात् ४२

धुर्यादिकार्यंहृष्ट्यनेनतद्दुशाड्व्याघसेवनान्निमित्तान्तच्छायायाहेतुभूतायास्तन्माधुर्यादिकार्यंकुतोऽदृष्टत्वान्नातप्यमानशिलाकूटछा राम
यायांमाधुर्यादेरदर्शनादपामेवचदर्शनाद्यंधर्मस्तासावाव्यभिचारादन्नं छायायामुपविष्टस्यनिवृत्तातपसंसर्गस्यस्वाभाविकास्पेदकमा १२१
धुर्यमिवन्तोच्छायामधुरेतिविभ्रमइत्यर्थः॥ ॥

तदेवंयथामुखंतदाभासस्तदाश्रयश्चेयंयेतेत्रयोव्यवहारदृष्ट्याविभक्ताअवभासंतेनपरमार्थदृष्ट्यातथात्मातदाभासस्तदाश्रयश्चेत्यर्थत्रयंमि
थोविलक्षणंगम्यतेव्यवहारदृष्ट्येतिदार्ष्टांतिकमाहात्माभासाश्रयाश्चैवमिति। आत्मात्वंपदलक्ष्यश्चिदात्मातस्यानाद्यविद्यातत्कार्य
प्रतिबिंबितत्तयातदुपाधिस्थत्ववैशिष्ट्यंजीवत्वमाभासोऽविद्यातत्कार्योपाधिराश्रयइतिपदार्थः शास्त्रयुक्तिभ्यामितिस्वंस्वरूपंशक्ति

आत्माभासाश्रयाश्चैवंमुखाभासाश्रयायथा गम्यंतेशास्त्रयुक्तिभ्यामाभासासत्त्वमेवच ५३

पोवभूवइंद्रोमायाभिःपुरुरूपईयतेअनीशयाशोचतिमुह्यमानइत्यादिश्रुतेरेकोवशीसर्वभूतांतरात्मैकंरूपंबहुधायःकरोतीत्या।
स्प दिस्मृतेश्च। तथाबुद्ध्यादेर्विषयांतस्यागमापायिनोदृश्यान्नित्यसिद्धसाक्ष्यात्मान्यथासव्यतिरेकेणस्फुरणासत्तयोरनुपपत्तेरित्यादि
युक्तेश्चप्रत्यगात्मनस्त्वेकस्यैवसत्त्वमाभासादेरसत्त्वंपरमार्थसत्त्वाभावश्चगम्यतेनिश्चीयतइत्यर्थः ५३

१२२ नन्वेवं सति त्वन्मते संसारमोक्षयोराश्रयाभावादनुपपत्तिरेव न ह्यात्मतदाभासतदाश्रयाणामन्यतमस्य मिलितानां वा संसाराद्याश्रयत्वं व
दत इति शंकाते न दृशेरिति। संसारो नाम ज्ञातृत्वकर्तृत्वभोक्तृत्वादिलक्षणो विकाररूप उपचयस्तदात्यंतिकापचयश्च मोक्षस्तथा च ताभ्यां
क्रमेण संबध्यमानो विकारी स्यात् न त्वत्र दृशेश्चैतन्यैकरसस्य संसारिता भवेदिति संबंधः। तत्र हेतुरविकारित्वादिति कूटस्थत्वादित्यर्थः। तथा

न दृशेरविकारित्वादाभासस्याप्यवस्तुतः नाचितेश्चाहंकर्तुः कस्य संसारिता भवेत् ५५

भासस्यापि न संसारिता भवेदिति पूर्वेण नकारमात्रेणान्वयः तत्र हेतुरवस्तुत इति। पूर्वोक्तयुक्त्या तस्यावस्तुत्वनिश्चयादवस्तुनः संसर्गजन
कोऽप्यतिशयासंभव इत्यर्थः अहंकर्तुरहंकारस्याभासाश्रयत्वेनाभिमतस्याचितित्वाज्जडत्वान्न संसारिता भवेन्न हि ज्ञातृत्वसुखदुःखादिभो राम
क्तृत्वस्वरूपस्य संसारस्य जडाश्रयत्वसंभवो। तस्मात्त्वन्मते कस्य संसारिता भवेत् मोक्षो वेति च योजनं कस्यापीति वदतोनुभवविरोधस्तथापि १२२
प्रायः ५५

सिद्धांतीयघेवमनिरूपिताश्रयौसंसारमोक्षौतर्हिमाभूतांपरमार्थेविस्यपीतिपरिहरत्यविद्येति यतएवमतःसंसारोऽविद्यामात्रएवभ्रांतिमात्रए
वमस्वमवस्तुअविवेकतआत्मस्वरूपाविवेकात्संसारआत्मनीवात्मधर्मद्वाबाभासतइतियोजना अवस्तुभूतस्यात्मन्यपरोक्षत्वमाहसक्तिवति
भासेविभिन्नमाहकूटस्थेनेति तत्राध्यस्तत्वान्नतस्तत्रयासत्तावानित्यर्थः नित्यमित्यन्याधीनात्मवत्तस्तत्राध्यस्तत्वात्संसर्पति ४५ आत्मसत्त्वास व
त्वानात्मधर्मत्वभासतेसंसारइत्येतदृष्टांतेनस्पष्टयतिरज्जुसर्पइतिस्पष्टार्थः ४६ मतांतरमाश्रित्यकल्पनालाघवेनशंकते आत्माभासाश्र

अविद्यामात्रएवातःसंसारीह्यविवेकतः कूटस्थेनात्मनानित्यमात्मवानात्मनीवसः ४५ रज्जुसर्पोयथारज्ज्वासात्मकः
प्राग्विवेकतः अवस्तुसन्नपिह्येषकूटस्थेनात्मनातथा ४६ आत्माभासाश्रयस्त्वात्माप्रत्ययैःस्वैर्विकारवान्॥ सुखी
दुःखीचसंसारीनित्यएवेतिकेचन ४७

यइति। चकारएवकारार्थः आत्मैवात्माभासाश्रयः आत्माभासत्वाभिमानस्यजीवत्वस्याश्रयोऽतः सएवस्वैःस्वधर्मभूतैःप्रत्ययैर्विकारवान्सुखीदु
खीचेत्येवंसंसारीभवतितथापिनित्यएवतरंगादिभिर्विक्रियमाणस्यापिसमुद्रस्यस्थैर्यदर्शनादतः आभासतदाश्रयात्मनोर्भेदकल्पना
तदविवेककल्पनाचद्वयोरात्मनिसंसारकल्पनाचगुर्वीआत्मैवसंसारीतिकल्पनालघीयसीतिकेचनमन्यंतइत्यर्थः ४७ रामग
रगारामहरामराहगीपायकहफासायसहहममहमयकमाफय्प्पनहयसहरामरामगमरगाहरामसहाजारगाहसारामगरा

उक्तं पुरस्तादस्माभिः संभाव्यो गोचरे शब्दः इत्यत्रात्मनि संसारित्वग्राहकं प्रमाणं नास्तीति तत्र विप्रतिपत्तिर्यत्तद्विषये त्वभिधेत्यो छेद्या मात्र मूलत्वे वै घाकल्प
नानप्रमाणमूलत्वेति परिहरति आत्माभासापरिज्ञानादिति आत्मा परमार्थः कूटस्थनित्यः आभासस्तच्छायारूपोऽन्यत्र संक्रांतो मिथ्याभूतस्तयोरात्मा
१२३ भासयोर्याथात्म्येनापरिज्ञानान्मोहिताः संतो हे कर्त्तारं साभासोऽतः करणमेवात्मेति तेमन्यंते यतो निरागमाः आगमरहस्यपरिचयशून्या इत्यर्थः
निष्कलं निःक्रियं शांतं निरवद्यं निरंजनं साक्षी चेता केवलो निर्गुणश्च कृत्स्नः प्रज्ञानघन एवात्मायं पुरुषः स्वयंज्योतिरित्यादिनित्यशुद्धत्वादि

आत्माभासापरिज्ञानाद्याथात्म्येन विमोहिताः अहं कर्त्तारमात्मेति मन्यंते ते निरागमाः ४८

परश्रुतिसंदर्भे तथाऽनीशया शोचति मुह्यमानः अविद्यायामंतरे वर्तमानाः अन्यत्तेन हि प्रत्यूढा इत्यादिश्रुतिसंदर्भे चात्मन आविद्यकं सं राम
सारित्वानुवादपरत्वेन पर्यवसितत्वात् स्वोत्प्रेक्षया यत्किंचिद्वदंतीत्यभिप्रायः ४८ १२३

मोक्षोप्येषां दुर्लभ इत्याह संसार इति तेषां मते संसारी वस्तु सन् परमार्थसन् भवेत्तथा च नासतो विद्यते भावो नाभावो विद्यते सतः इति नियमस्य तेरवि
नाशी संसार इति तेषां मते मोक्षासिद्धिरित्यर्थः यदि मोक्षप्राप्तिभयात् संसारस्यावस्तुत्वं तेपि मन्येरंस्तर्हि अस्मदुक्तप्रकार एव स इत्यन्तु जानाति आत्मा
भासाश्रयाज्ञानादिति आत्मादिचयागांतत्वाज्ञानादविवेकतो भेदाग्रहात्संसरतीति योजना ४९ परपक्षे मोक्षस्य सहेति दोषमुक्त्वा स्वपक्षे त्वाभासा
भ्युपगमे लाभविशेषमाह चैतन्येति बुद्धेरंतःकरणस्य चैतन्याभासता आत्मनश्चैतन्यस्वरूपता च चेत्स्यादेवं तदा वेदस्तमात्मानं ज्ञानशब्दैर्ज्ञानि
सत्यानंतानंदात्मादिशब्दैः शास्ति प्रतिपादयतीति युज्यते घटत इत्यक्षरार्थः अयं भावः प्रकाशस्वभावं वस्तु यत्र प्रतिबिंबते तत्र प्रकाशाभासोदय

संसारी वस्तु संस्तेषां कर्तृभोक्तृत्वलक्षणः आत्माभासाश्रयाज्ञानात्संसरत्यविवेकतः ४९
चैतन्याभासता बुद्धेरात्मनस्तत्स्वरूपता स्याच्चेत्तं ज्ञानशब्दैश्च वेदः शास्तीति युज्यते ५०

हेतुर्भवति यथा जले प्रतिबिंबितः सविता तथा बुद्धौ प्रतिबिंबितं चैतन्यं तत्र चित्प्रकाशोदयहेतुर्भवति ततः साभासायां बुद्धौ गृही
तसंबंधैर्ज्ञानादिशब्दैर्वेद आत्मानं लक्षणया बोधयतीति संगच्छते ऽन्यथा निर्धर्मक आत्मनि शब्दाप्रवृत्त्यनुपपत्तेर्वेदांतवैयर्थ्यतातस्य
न सिद्ध्येन्मानांतरं च तत्र न क्रमत इति असिद्धिरेवात्मनः स्यादित्याभासाभ्युपगमः श्रुतिस्मृतिन्यायसिद्धिः कर्तव्य इति ५०

येषप्येवमाभासाभ्युपगमेवेदप्रहतीरात्मन्युपपद्येतेतथाप्यस्मिन्ज्ञानात्यादिशद्वानप्रवर्त्तेरन्निति व्यवहारासिद्धिःप्रसङ्गेनेतिशंकते
ननुज्ञानशद्बोभ्युत्पाद्यमानआत्मनिमुख्योवृत्तिर्निर्भजन एवञ्चतःकथंसाभासबुद्धिवाचकःसन्नुस्त्वात्मनिचेत्तदायावृत्तिर्व्यनइतिकु
त्य नइतिवाशंकतेप्रकृतीनिप्रकृत्यर्थःक्रियाप्रत्ययार्थःकर्तृत्वंतदुभौस्वरूपतोभिन्नावेकस्मिन्नाश्रयेस्थितौकरोतिनिगद्यतीत्यादौलो
के दृष्टौ यथा तथालोकप्रसिद्धित एव जानातिकरोतीत्यादिव्याख्यातैकाश्रयत्वं युक्तमित्यर्थः ५१ यथैकाश्रयत्वमनयोर्दृष्टं तथापि

प्रकृतिप्रत्ययार्थौ यौ भिन्नावेकाश्रयौ यथा करोति गद्यतीत्यादौ दृष्टौ लोकप्रसिद्धितः ५१
नानयोर्धीश्रयत्वं चलोके दृष्टं स्मृतो न था ॥ जानात्यर्थेषु कोहेतुर्ध्याश्रयत्वेनिगद्यतां ५२

धाश्रयत्वमपिक्वचित्किंनस्यादित्यतआह नानयोरिति ॥ अनयोःप्रकृतिप्रत्ययार्थयोर्धीश्रयत्वंमलोकप्रयोगेषुदृष्टंतथास्मृतौ व्या॰ राम॰
व्याकरणरूपायामपिन दृष्टमतोजानात्यर्थेषु ध्याश्रयत्वे आत्माप्रत्ययार्थाश्रयःबुद्धिःप्रकृत्यर्थाश्रयइति ध्याश्रयत्वाभ्युपग २४
मेकोहेतुःसनिगद्यतामित्यर्थः ५२

प्रकृतिप्रत्ययोरैकाश्रयत्वमात्रमस्मन्मतेनसंगच्छतइत्युच्यते किंवापरमार्थतस्तयोरैकाश्रयत्वंतच्चनाघटइत्याह सिद्धांती आत्माभा
सइतितुशब्दःशंकानिषेधार्थः आत्माभासोबुद्धिगतश्चिदाभासः प्रत्ययवाच्यः चितिबुद्धेः क्रियाह्न त्रिरूपाधात्वर्थः प्रकृत्यर्थः तथाचा
त्माभासोबुद्धिश्चेत्युभयेचाविवेकेनपरमार्थात्माविवेकेनमृषैवजानातीत्युच्यते तथाचात्माभासव्याप्तक्रियावत्बुद्धेरेकाध्यासादात्मा
जानातीत्येकाश्रयत्वावभासः प्रकृतिप्रत्यययोरिहापिनानुपपन्नइत्यर्थः ५२ किंतेपक्षमाहनतुबुद्धेरिति सम्यक्विचार्यमाणेकि

आत्माभासस्तुतिङ्वाच्योधात्वर्थश्चधियःक्रिया॥
उभयंचाविवेकेनजानातीत्युच्यतेमृषा ५२ नबुद्धेरव
बोधोस्तिनात्मनोविद्यतेक्रिया अतोनान्यतरस्यापिजानातीतिचयुज्यते ५३

यावत्याबुद्धेरवबोधश्चित्प्रकाशोनास्तिनाप्यात्मनोवबोधस्वभावस्यक्रियाविद्यतेऽतोनान्यतरस्यापिजानात्यवगच्छतीतिनिर्देशो
युज्यतेनतथाचप्रतीतिमात्रशरणैरारोपितनदैक्यविषयत्वंजानात्यादेराश्रयणीयमितितत्लोकव्यवहारविरोधः स्मृतिविरोधो
वाभवतीत्यर्थः ५४

१२५ यथा जानातीति इति कर्तृव्युत्पत्त्या तु आत्मनोरिक्तैकस्मिन् ज्ञानत्वपर्यायानुपपत्तिर्नोपिमिलितयोस्तु उपपत्तिः परमोर्थ्यतोऽज्ञउ पौरैक्यापोगा
त्वात्अन्यतरः सन्निमित्तान्यतरस्मिन्नु भयथा श्रूयते निद्धटतेऽध्यासत्यागेरिके रास्यसन्निधेरनिरूपणात् आत्मप्रतिपन्निमिति भावव्युत्पत्त्यापि ज्ञानशब्द
प्रयोगस्त्रात्मनि न घटते इत्याह नात्मन इति भावशब्देन धात्वर्थसामान्यवचनेन ज्ञातृप्रतिज्ञीनमिति व्युत्पत्त्यापि ज्ञानशब्दप्रयोगस्त्रात्मनि न
युज्यते अन्तरस्तु के हेतुं व्यनक्ति नहीति क्रियामात्रत्वे पारतंत्र्ये णात्मनोऽनित्यत्वप्रसंगस्तद्वानिष्टं नित्यश्चात्मेति श्रुतिरागमना दित्यर्थः
५५ यथा जानातीति इति कर्तृव्युत्पत्त्या ज्ञप्तिर्ज्ञानमिति भावव्युत्पत्त्या चात्मनि ज्ञानशब्दानुपपत्तिस्तथा ज्ञायतेऽनेनेति करणव्यु
त्पत्त्या ज्ञायतइति ज्ञानमिति कर्मव्युत्पत्त्या चात्मनि ज्ञानशब्दप्रवृत्तिर्न युज्यत इत्याह नन्विद्धीति बुध्यतेऽनयेति बुद्धिरिति व्युत्पत्त्या बु
द्धिशब्दवाच्यत्वं बुद्धेरन्तःकरणस्य स्यात् आत्मनस्तु इति योजना तत्र हेतुः करणमिति करणव्युत्पत्तिपक्षे बुद्धिशब्दवाच्यस्यात्मनः करणत्वा

नाप्नुतोभावशब्देन ज्ञप्तिरित्यपि युज्यते नह्यात्माविक्रियामाप्नोति नित्य आत्मेति शासनात् ५५
ननु इद्धि वाच्यत्वं करणानह्य कर्तृकं नाधिष्ठाय नद्यत्पेवं कर्मशब्देनिरुच्यते ५६

पत्तेः कर्तृत्वेन रणाभावात् कर्तृकं करणस्यानहि करणमकर्तृकं क्वचिद्दृष्टमित्यर्थः तथा ज्ञायतेऽनेन ज्ञानमिति कर्मशब्देर्व्यात्मा न निरुच्य
ते नस पृथग्व्यंते स्वस्यत्वेव घटानुपपत्तेरिति तत्रस्याभावात् स्वतन कर्मव्युत्पत्तिरयोग्येत्यर्थः ज्ञायते ऽस्मिन्निति ज्ञानमिति व्युत्पत्तिरमतो नेति चेत्र राम०
त्वकर्तृत्वे याधारत्वेमात्रं ज्ञानशब्देन होत्यनेन तत्त्वे सति ज्ञेयाधारत्वं वा नाधिष्ठेयबरा धाधारभूतत्वादेर विव्युत्पत्तिर्योगात् ज्ञानश १२७
ब्दाभिधेयत्वप्रसंगात् न हि नीयः आत्मनोऽतोऽनात्वस्य निराकृतत्वादेवं पक्षेऽपि सिद्ध लइत्याचार्यैरूपेक्षितम् इति द्रष्टव्यं ५६

एवंमुख्ययावृत्त्याज्ञानादिशब्दवाच्यत्वमात्मनोनोपपद्यतइतिप्रतिपादितेतवाप्येतत्तुल्यमित्याशंक्योषापन्यायपरिहरति नयेषामिति येषांमतेएकएवा
त्मासदानिर्दुःखादिलक्षणोभ्युपगमस्तेषामात्मनःसदाशब्दवाच्यत्वंज्ञेयत्वंचनस्यात्परमार्थतइतियोजना यद्वात्मनिमुख्यशब्दप्रवृत्त्यभावमुक्त्वे
व्यतिरेकमुखेनोपपादयतिनयेषामितियेषांमतेएकएवयथानिर्दिष्टआत्मानभवतितेषांशब्दवाच्यत्वंज्ञेयत्वंचात्मनःसदास्यादस्त्वितियोजना
तत्रकर्त्रादिमुत्पत्तिःसंभवात्नत्वविकात्मवादेश्रौतेतत्संभवइत्यर्थः ५८ तर्हिस्तुशब्दार्थमुख्यत्वायसविकारएवात्मेतिशंकतेयदेति अहंक

नयेषामेकएवात्मानिर्दुःखोऽविक्रियःसदा तेषांस्याच्छब्दवाच्यत्वंज्ञेयत्वंचात्मनःसदा ५७
यदाहंकर्तुरात्मत्वंतदाशब्दार्थमुख्यता नाशनायादिमत्त्वात्तुश्रौतेतस्यात्मनेष्यते ५८

र्तृत्वाद्यभिमन्यमानाकारस्यात्मत्वमेवनास्तीतिपरिहरतिनेति योऽशनायापिपासेशोकंमोहंजरांमृत्युमत्येत्येतंवैतमात्मानंविदित्वेतिश्रुतावात्मनोऽ
शनायाद्यतीतत्वस्वाभाव्यावगमादशनायादिधर्मवत्त्वादहंकर्तुस्तस्यात्मतानेष्यतइतियोजना अतोज्ञानादिशब्दाआत्मनिनसाक्षात्प्रवर्तंतइत्या
भासद्वारतास्मदुक्तातेषांसिद्धेतिभावः ५८

१२६ नन्वेवमुक्तरीत्यापदिज्ञानात्पादेरात्मन्यपन्यत्रवमुख्येनानसंभवेत्राहिह्य त्वंजरेणाप्यात्मनिप्रहत्रिरनुपपन्नानहिकाप्यमुख्यंकचिदुपचर्यत
इति संभवतीतिशंकते हंतेत्यर्हीति ५९ मास्तुमुख्योभावाहोरोपितथापिकिमितिगतिर्वोध्येति वेनतत्राह शास्त्राणामिति। नकेवललौकिकशास्त्राणामे
वज्ञानात्पादीनामप्रमाणता किंतु वेदस्यापीत्यपिशब्दयोजना। लोकप्रसिद्धमुपन्यस्य येष्वाढ्ये देवोधकत्वस्येत्यभिप्रायः सावेदस्याप्रमाण
तानेष्टाचकाराद्वेदस्यैवात्मनिप्रमाणत्वेष्टेतिसमुच्चीयते। अतोवेदप्रामाण्यांगीकारलोभादेवगतिर्व्याख्येयमर्थः। ननुहि प्रसिद्धेवगतिः कि

हंतनहिनिमुख्योर्थेनापिगौणः कथंचन जानातीत्यादिशास्त्रस्य गतिर्व्याख्यातथापितु ५९
शास्त्राणामयथार्थत्वेवेदस्याप्यप्रमाणता सा चनेष्टाततोग्राह्यागतिरस्य प्रसिद्धितः ६०
प्रसिद्धिर्मूढलोकस्ययदिस्याद्यात्मता लोकायतिकसिद्धांतः सचानिष्टः प्रसज्यते ६१

मीहवक्तव्यमितिसिद्धांतिनः शंकांगृह्णातीतिनतोग्राह्येति। प्रसिद्धितइतिचादितिशिष्यः ६० तत्रवक्तव्यंप्राकृतजनप्रसिद्धागतिरश्री
यतेयावातान्याद्यभियुक्तप्रसिद्धावात्तत्राद्यमनूद्यदूषयतिप्रसिद्धिर्मूढलोकस्येति। प्राकृतप्रसिद्धभ्युपगमेदेहात्मप्रसिद्धेरप्यमुख्या राम० १२६
मात्रिरात्मवादाद्यापत्तिरनिष्टाप्रसज्येतेत्यर्थः ६१

द्वितीयमनूद्यप्रत्याहाभिव्युक्तेति पूर्ववदिति बुद्धेरात्मनो वा ज्ञातत्वेऽहुर्निरूपमिति प्रागुक्तदोषप्रसंग इत्यर्थः यद्येवं तर्ह्यात्मनो गतिशून्यमेव ज्ञातत्वे
वेदो वदिष्यतीति तत्राह गम्येति प्रमाणमिति हेतुगर्भं विदविशेषणं ६२ विदात्मन्येवोपाधिकोऽज्ञानात्यादिशब्दप्रयोगः संभवतीत्यभिप्रेत्याभि
व्यक्ती दृष्टान्तमाह आदर्शेति आदर्शे दृश्यमानं यन्मुखं तेन सामान्यं समानत्वमेकत्वं मुखस्यादर्शाद्बहिः स्थितिघृतो मानवैरिष्टं हि प्रसिद्धमित्यर्थः आ
दर्शमुखव्यक्तेस्तरोत्यादावनुपपत्तिः सहकृतत्वात् मदीयं मुखमिति प्रत्यभिज्ञया बिंबप्रतिबिंबभावेनोपाधितो भेदावभासे विमुखे वैकल्पमानैरिष्यते ए

अभिव्यक्तप्रसिद्धिः स्यात्पूर्ववद्दुर्विवेकता गतिशून्येन वेद्धीऽ यंप्र माणं संवदन्तुत ६१ आदर्शमुखसामान्यं मुखस्येष्टं हि मानवैः
मुखस्य प्रतिबिंबो हि मुखाकारेण दृश्यते ६३ यत्र यस्यावभासस्तु तयोरेवाविवेकतः जानातीति क्रियां सर्वो लोको वह्निस्व
भावतः ६४

वेत्युक्तं भवति वक्त्रमेवैकत्वं स्फुटयति मुखस्येति ६३ यथाकल्पितमुखस्य परमार्थमुखस्य चान्योन्याविवेकान्मलिनं मे मुखमित्य
वक्त्रमित्यादिव्यपदेश उपाधिनिबंधनस्तथात्मन्यपि ज्ञातत्वादिव्यपदेश उपाधिनिबंधन इत्युपपन्नमिति दार्ष्टान्तिकमाह यत्रेति अव
भास आभासः प्रतिबिंबभाव इति यावत् ६५

पद्याभ्यामुक्तमर्थं स्पष्टयति बुद्धेरिति बुद्ध्यात्मनोस्तादात्म्याध्यासे सत्यन्योन्यधर्मसंकरादात्माजानात्यहं जानामीति च व्यपदेशो भवतीति
१२८ समुदायार्थः ६५ ननु बुद्ध्यादिभिरात्मनि ज्ञानमुत्पाद्यते ततः कथमिदमुच्यते आत्मचैतन्यं बुद्धावध्यस्तमिति तत्राह स्वरूपं चेति ज्ञानमा-

बुद्धेः कर्तृत्वमध्यस्य जानातीति निगद्यते तथा चैतन्यमध्यस्य ज्ञातृत्वं बुद्धेरिहोच्यते ६५
स्वरूपं चात्मनो ज्ञानं नित्यं ज्योतिः श्रुतेर्यतः नबुद्ध्या क्रियते तस्मान्नात्मनान्येन वा सदा ६६

त्मनः स्वरूपं तदेव ज्योतिषां ज्योतिरात्मैवास्य ज्योतिरित्यायं पुरुषः स्वयंज्योतिः साक्षी चेत्यादिश्रुतेः अतश्च नित्यमेव यतस्तस्मान्न बुद्ध्या ज्ञा-
नं क्रियते आत्मना वा अन्येन वा चक्षुरादिना ज्ञानं सदा कदापि न क्रियत इत्यर्थः ६६ एम १२७

तुआत्मनोरन्योन्यधर्माध्यासेनैवव्यवहारइत्युक्तेर्थेदृष्टांतमाह देहइति ॥ रूपादिमत्त्वेनत्वात् घटादिवदहंप्रत्ययायोग्येपिदेहेचेतनामध्यस्यपथाहंम
नुष्यःस्थूलइत्यादिप्रत्ययोदृश्यतेतथावुद्धेर्जडत्वेनज्ञातृत्वायोग्यत्वेपिचिदाभासव्याप्त्याज्ञातृत्वमारोप्यजानामीतिलौकिकावदंतिव्यवह
रंति ॥ दार्ष्टांतिकमाहतथात्मनइति ॥ विकाररहितस्याप्यात्मनोविकारिचित्ताविवेकाद्विकारित्वादिव्यपदेशसिद्धिरित्यर्थः ॥ यद्वास्थूलेदे

देहेहंप्रत्ययोयद्वज्जानातीतिच लौकिकाः ॥ वदंति
ज्ञानकर्तृत्वंतद्वद्बुद्धेस्तथात्मनः ॥ ६१ ॥

हेयद्वदहंप्रत्ययोमनुष्योहमित्येवमादिरहंप्रत्ययायोग्येपिव्यवह्रियतेसर्वैः ॥ लौकिकाश्चशास्त्रसंस्काररहितादेवदत्तोजानाति
गच्छतीतिचदेहस्यैवज्ञातृत्वंवदंतितद्वद्बुद्धेर्ज्ञानकर्तृत्वंतथात्मनोज्ञानाश्रयत्वंविकारवत्त्वंचव्यवहारास्पदंभवतीत्यर्थः ॥ ६२ ॥

नतु तार्किकाज्ञानस्योत्पत्तिविनाशौ यद्रूपं तोज्ञानमात्मना क्रियत इत्याहुः तत्कथं नित्यं ज्ञानमात्मरूपमित्युक्तमित्यत आह बौद्धास्त्विति ॥ एवं पूर्वोक्तप्र
कारेण त्वबुद्धोसौ ध्यासात् विभ्रमैः विभ्रमोपाययत्या विद्विभासमाने बौद्धे बुद्धिप्रत्ययैः क्रियमाणेः प्रत्ययैरिति विशेषैर्मोहितास्तार्किकाजना ज्ञानं क्रि
१२८ यत इत्याहुर्वदन्तीति ते बौद्धास्तु ह्या अविवेक एवापराधो न तु ज्ञानं क्रियते तथा सति प्रत्ययोत्पत्तिविनाशयोरसाक्षिकत्वाय सिद्धिप्रसंगादिति भा
वः ॥६८॥ तस्मादेवं विचार्य मातो प्रमाणात् सिद्धं कौटस्थ्यमात्मनो न विकारित्वं प्रामाणिकं यस्माद् ज्ञानमात्मस्वरूपत्वश्रवणान्नित्यमेवेति न
केनापि क्रियते यस्माद्बुद्धिसंसर्गं विनात्मनो न ज्ञानत्वमुपलभ्यते सुषुप्तावदर्शनात् बुद्धिस्वभात्मनः पृथक्कृतात् त्वाद्याकारो पलभ्यते न

बौद्धास्तु प्रत्ययैरेवं क्रियमाणोऽथ विभ्रमैः ॥ मोहिताः क्रियते ज्ञानमित्याहुस्तार्किका जनाः ॥ ६८ ॥
तस्मात्तदाभासबुद्धीनामविवेकात्प्रवर्तिताः ॥ ज्ञानातीत्यादिशब्दश्च प्रत्ययो यावतस्मृतिः ॥ ६९ ॥

तस्मादात्मबुद्धितदाभासा नामविवेकाद्यथा प्रसिद्धमेव व्याहारं किं तु ध्यात्मनोरेकत्वं गृहीत्वा जानातीत्यादिव्यपदेश उपपद्यते न परमार्थतो मुख्य राम
मन्यदालंबनमस्तीति प्रकृतमुपसंहरति तस्मादिति ॥ जानातीत्यादिशब्दश्च तदनंतरभावी तद्विषयः प्रत्ययश्च यातत्संस्कारजा स्मृतिः सा चेति १२८
त्रयोर्थाः ज्ञाभासबुद्धीनामविवेकात्प्रवर्तिता इति योजना ॥ ६९ ॥

ज्ञाभासबुद्धीनामविवेकमूलः सर्वो व्यवहारो न पारमार्थिक इत्युक्तमर्थं दृष्टांतेन स्पष्टयत्यादर्शेति ॥ छायायाः मुखाभासस्य यदादर्शानुवि
धायित्वं तत्मुखे स्यात्तेऽध्यस्यते यथेति शेषः ॥ तथाऽध्यस्तस्य चिदाभासस्य बुद्धिधर्मानुकारित्वं ज्ञे आत्मनीष्यतेऽध्यस्य व्यवह्रियत इत्यर्थः ॥ ७० ॥
यस्मादेवं चिदाभासाविविक्ताद्बुद्धिस्तस्मात्तत्परिणामेषु ग्राहकत्वप्रतिभासः सिद्धिरित्याह बुद्धेस्त्विति ॥ निगदव्याख्यातं पद्यं ॥ ७१ ॥ एवमा

आदर्शानुविधायित्वं छायाया अस्यते मुखे ॥ बुद्धिधर्मानुकारित्वं ज्ञाभासस्य तथेष्यते ॥ ७० ॥
बुद्धेस्तु प्रत्ययास्तस्मादात्माभासेन दीपिताः ॥ ग्राहकादव भासंते दहंतीवोल्मुकादयः ॥ ७१ ॥
स्वयमेवावभासंते ग्राहकाः स्वयमेव च ॥ इत्येवं ग्राहकास्तित्वं प्रतिषेधंति सौगताः ॥ ७२ ॥

आसविविक्तपदार्थस्वरूपाज्ञानाद्यथा तार्किकाणां व्यामोहस्तानं क्रियत इति तथा बौद्धानामपि बुद्धिव्यतिरिक्तो ग्राहको नास्तीति व्यामो
हः एवं त्याह स्वयमेवेति स्वयमेव च प्रत्ययाः इति शेषः ॥ ७२ ॥

१२९ यद्येवं प्रत्ययानां ग्राहकमन्यं स्थिरमनाहत्य प्रत्ययमेव ग्राह्यग्राहकाकारं बौद्धा मन्यन्ते तर्हि तन्मतस्यानुभावानुसारित्वादाभासानभ्युपगमे कथं
ति निराकर्त्तव्या इत्याशयेन स्वरूपं प्रकटयति यद्येवमिति ॥ ते प्रत्यया नान्यदृश्या अस्मिन्साक्षिणि नित्यसिद्धे न न ग्राह्या इति यद्येवं बौद्धा वदंति तन्म
तवारणं किमस्ति तदुच्यतामित्युक्ते स्वरूपं प्रत्याह भावाभावाविति ॥ तेषां प्रत्ययानां यौ भावाभावावुत्पत्तिविनाशौ सदा स्वतःसिद्धे न साक्षि
णान्येन न ग्राह्यौ यद्यपि तथापि तस्मिन्प्रत्ययानां भावाभावौ स्तोऽहमिति प्रत्यभिज्ञावर्त्मनि तेषां ग्राहकोन्वयी स्थाय्यात्मास्ति इति किमाभासक
ल्पनयेति योजना ॥ एवं स्वरूपे बौद्धोक्ते तावत्तावौ द्वौ वारयितुं शक्यत इति दूषयति एतदपीति एतदपि प्रत्यभिज्ञानसिद्धमपि ग्राहक

यद्येवं नान्यदृश्यास्ते किं तद्धारणमुच्यतां ॥ भावाभावौ हि तेषां यौ नान्यग्राह्यौ सदा यदि ॥ ७३ ॥
अन्वयी ग्राहकस्तेषामित्येतदपि तत्समं अचितित्वस्य तुल्यत्वादन्यस्मिन्ग्राहकेऽसति ॥ ७४ ॥

रूपं तत्समं प्रत्ययसमं जडमेवेत्यत्र हेतुमाह अचितित्वस्येति ॥ अयमर्थः ॥ प्रत्ययग्राहकः प्रत्यभिज्ञासिद्धोपि ग्राह्यः स्वप्रकाशो वा अ
यं प्रत्याह अचितित्वस्येति ॥ अन्यस्मिन्ग्राहकेऽसति ग्राह्यकोऽपि तितत्वेन ज्ञाधापरिहारात्स्वयमप्यसिद्धः कथं प्रत्ययानां ग्राहकः स्या राम
र्थः ॥ अथवाऽन्यस्मिन्ग्राहकेऽसति स्वतःसिद्धे साक्षिण्यविद्यमाने प्रत्यभिज्ञाग्राह्यस्याप्यचितित्वस्य तुल्यत्वाद्ग्राहकत्वासिद्धिरित्यर्थः ॥ १२९
द्वितीये स्वप्रकाशस्य साक्षिणो निर्विकारत्वादाभाससिद्धिरिति द्रष्टव्यं ॥ ७४ ॥

स्वप्रकाशसाक्षिरूपसति प्रत्ययानां भावाभावासिद्धिश्चेत्तर्हि साक्षिसान्निध्यमात्रेणैव तत्सिद्धिः कृतमाभासाभ्युपगमेनेति शंकते अध्यक्षस्येति ॥
तत्रवक्तव्यं किं साक्षिसन्निधानमात्रं प्रत्ययसिद्धिहेतुः किं वा तत्कृतविशेषयोगोपीति तत्राद्ये तीर्थं तावद्दूषयति नेति निर्विकारेऽध्यक्षे उपकारित्वानि
रूपणादित्यर्थः ॥ यद्वांतरम् अध्यक्षे साक्षिण्यहंकारादावनुपकारित्वादुपकारपदवाच्यातिशयाजनकत्वादित्यर्थः ॥ प्रपंचं दूषयति अन्यत्रापीति ॥ सा
क्षिणः पूर्णतया सर्वत्र सदा सान्निध्याविशेषात्काष्ठलोष्टादीनामपि सिद्धिप्रसंगादित्यर्थः ॥ ७५ ॥ एवमाभासानभ्युपगमे बौद्धादिमतेन साम्यादोषमपि
हायानुपपत्तिस्वरूपमाह अनुत्काशाध्वीयो बंधमोक्षव्यवहारोपि तेषां न सिध्यतीति वक्तुं विकल्पयति धीति ॥ बोद्धुः स्थितिनमोक्षार्थित्वेन च प्रसिद्धेः

अध्यक्षस्य समीपेऽत्र सिद्धिः स्यादिति चेन्मतं ॥ नाध्यक्षेऽनुपकारित्वादन्यत्रापि प्रसंगतः ॥ ७५ ॥ त१
अथ धीबोद्धुः स्थितिश्च यः श्रोता सत्वधूर्मोक्षविस्तरः ॥ अध्यक्षस्य च बुद्धिस्थित्वमर्थित्वं च न ते मतं ॥ ७६ ॥

गुरूपदेशश्रोता सत्वबाध्यक्षो मनसा तो स्योवेति विकल्पार्थः ॥ आद्येविरनुग्रहाध्यक्षस्वादिनः तवापसिद्धांतप्रसंग इति दूषयति अध्यक्षस्येति ॥
आत्माभासानंगीकारवादिनस्तेहाराभावादविद्यातत्कार्यसंबंधासिद्धेस्तेन च विनार्थित्वासिद्धेराभासाभ्युपगमप्रसंग इत्यर्थः ॥ ७६ ॥

१३० द्वितीयं दूषयति कर्त्रेति श्रोतुरर्थिनो ध्यद्रूपस्य च भेदपक्षे कर्त्ता कर्तृत्वादिधर्मको विकारी श्रोता जडवर्गपतितत्वात् सदहमध्यक्षोस्मीति सद्रूहं सदादि
शब्दनिर्दिष्टं ब्रह्मात्मग्रहं नार्हति विरोधादित्यर्थः ॥ यद्वा सदध्यक्षो निर्विकार आत्माहमस्मीति सद्रूहं पराथर्वबोधं नार्हति न लभते इत्यर्थः ॥ मु

॥ ॥ कर्त्ताध्यक्षः सदस्मीति नैव सद्रूहमर्हति सदे
॥ ॥ वासीति मिथ्योक्तिः श्रुतेरपि न युज्यते ॥ ७७ ॥

तिवाधप्रसंगाच्चायं पक्षो न युक्त इत्याह सदेवेति ॥ ७७ ॥ राम १३०

विदाभासानभ्युपगमपक्षे वेधमोऽन्योन्यानुपपत्तिमुपपाद्य स्वपक्षे तदुपपत्तिमाह विविच्येति उभयमात्मानमहंकारं चद्रूपमाभासद्वारेण विवेकापन्नम
विविच्य विविक्तं कृत्वा यथाप्राप्तमर्पयित्वा घुपादाय श्रोत्रे त्वेन छित्तं प्रतितत्त्वमसीति श्रुतिर्वदेदात्मनत्त्वमितिचेत्सहस्तदा तथा यथा श्रुत्युक्तस्य ग्रहे
ग्रहणं स्यादिति योजना ॥ अयममभिप्रायः ॥ अंतःकरणादौ विदाभासोदये सति तं द्रष्टा विकाराध्यासाद्विविच्याहंकार आत्माऽर्थयित्वादि संप्र
न्नो मुमुक्षुस्तं प्रतिपद्यते तेन तथैवाविवेकावच्छन्नत्वमित्यन्वयाभासद्वारा साभासांतःकरणसाक्षितया लक्षयित्वा तेजोवन्नादिजगत्कारणत्वेनो
पलक्षिते सच्छब्दवाच्यं ब्रह्म तदित्यन्वयजीवेनात्मनानामरूपसंघातानुप्रविष्टत्वेनापरोक्षप्रत्यक्तयालक्षयित्वा त्वं तदसीति श्रुतिरुपदिश

अविविच्योभयं वक्ति श्रुतिश्चेत्स्यादहं तथा ॥ ॥ अस्मदस्तु विविच्यैव
त्वमेवेति वदेद्यदि ॥ प्रत्ययाच्चापि निष्ठत्वमुक्तो दोषः प्रसज्यते ॥ ७८ ॥

त्यात्मतत्त्वमिति तत्पदार्थग्रहणमुपपद्यत इति ॥ अहंकार एव श्रोता स्यात् किमात्माभासाभ्युपगमेनेति सांख्यमतमनूद्य दूषयत्यस्मदस्त्विति प्र
त्ययान्वय्यहंकारः ॥ यदि वाक्यमस्मदः प्रत्ययैक्यं तस्मादहंकारं विविच्यैव त्वमेवेति प्रत्ययाच्चापि निष्ठत्वं वदेत्तदोक्तो दोषः श्रुतेर्मिथ्यार्थि
त्वप्रसंगरूपः प्रसज्यत इत्यर्थः ॥ ७८ ॥

१३१ नर्थ्यहंकर्तृविषयोऽप्युपदेशोऽध्यस्तेऽपर्यवस्यतीत्याशंक्याभासानभ्युपगमेनत्वद्विदुर्त्थमित्याहत्वमिति ॥ त्वमितिपदमहंकारत्वाविसदध्यस्तेऽबोधय
ति चेदहंकाराध्यस्तयोः संबंधग्रहणमंतरेणावाक्यार्थबोधानुपपत्तेरहमध्यस्तयोः संबंधोऽत्रवाच्य एव सकथमुपपद्यते येन संबंधेन त्वमितिपदमध्य
स्तं लक्षयेदित्यर्थः ॥७९॥ अस्तिसंबंधइत्याशंक्यापरिहरति दृष्टृदृश्यत्वेति ॥ यदि दृष्टृदृश्यत्वसंबंधोऽभ्युपगम्यते तदापि संबंधग्रहणमनुपपन्नं ॥ अ
हंकारस्य जडत्वात्संबंधग्रहणायोगादध्यस्तस्य न ग्रहणमिति वक्तव्यमक्रियेनिर्विकारेऽध्यस्ते कथं संबंधग्रहणकर्तृत्वमित्यर्थः ॥८०॥ मास्तु

त्वमित्यध्यस्तनिष्ठश्चेदहमध्यस्तयोः कथं ॥ संबंधो वाच्य एवात्र येन त्वमिति लक्षयेत ॥७९॥ दृष्टृदृश्यत्वसंबंधोपगमेऽध्यस्तेऽक्रिये
कथं ॥८०॥ अक्रियत्वेऽपि तादात्म्यमध्यस्तस्य भवेद्यदि ॥ आत्माध्यस्तो ममास्तीति संबंधग्रहणं न धीः ॥८१॥

संबंधग्रहणं तथापि तादात्म्योपदेशो भविष्यतीति शंकामनूद्य विरोधान्नैवमिति परिहरति ॥ अक्रियत्वेपीति यथात्मो
केयस्यशोक्तमितिवृद्धशीलवायोः संबंधाग्रहणेऽमुक्तो वदेदिति वाक्यान्न तादात्म्यधीर्भवेदिति तथा ममात्माध्यस्तोऽस्तीति संबं राम
धग्रहणे सति न तादात्म्यधीः स्फुरति ततो ज्ञायेतेत्यर्थः ॥८१॥ १३१

एषम आत्मांतर्हृदये इतीयानेषम आत्मांतर्हृदय एतद्ब्रह्मेति शास्त्राद्वस्त्वहंकाराध्यस्तयोः संबंधग्रह इति शंकामुद्भाव्य निराकरोति संबंधग्रहणादि
ति न्हीत्युक्तं व्यनक्ति पूर्वोक्ता इति ॥ अहंकारस्य जडत्वात्संबंधग्रहीतृत्वं न घटते नाप्यध्यस्तस्य निर्विकारित्वादिति द्विदोषौ जडं प्रति श्रुतेर्बोधकत्वा
संभवस्तृतीयो दोष इति त्रिधा दोषाः स्युः पटिकधर्मचित्संबंधग्रहणं कल्प्येत तदापि ममाध्यस्तोस्तीति संबंधग्रहणं स्यात्तत्त्वहमेवाध्यस्तोस्मीति तादा
त्म्याध्यासो नंगीकारात् ॥ चकारान्ममाध्यस्तोस्तीत्यपि न घटते अहंकारस्य जडत्वादित्यप्युक्तं ॥ ८१ ॥ एवमात्मानात्मनोः परस्परं संबंधासिद्धि

संबंधग्रहणं शास्त्रादिति चेन्मन्यसे न हि ॥ पूर्वोक्ताः स्युस्त्रिधा दोषा ग्रहे वास्यान्ममेति वा ॥ ८१ ॥
अहंधीर्दृशिरूपेण भाति बुद्धिर्यदा सदा ॥ अन्यथा अर्पितस्याः सुस्वप्नाद्यो विस्फुलिंगवत् ॥ ८२ ॥

मुक्ताश्चपक्षे [illegible] तादात्म्यसंबंध इति तद्दर्शयत्यहंधीरिति ॥ यदा अहंधीरचेतनात्तु बुद्धिर्दृशिरूपेणासदा भातीत्यभ्युपगम्यते तदा
न स्यात्तु दुःखं अन्यथाहन्तयार्पितत्वाद्यो विस्फुलिंगानामग्न्यात्मत्ववत् दृशिरूपाः स्युरित्यर्थः ॥ ८३ ॥

अस्मिन्पक्षे लौकिकवैदिकव्यवहारसिद्धिरपि सुसंपादेत्याह आभासइति ॥ सौ ग्रीवधिभूतायाः दृशोश्चिदात्मनः सकाशादेव लोकस्याभासत्व
१३२ भावश्चस्यात्तांमुक्तितोपुत्तेरुपपन्नेर्न्नचान्यथा तथासति आभासाऽभ्युपगमे सति प्रत्ययभावाभावयोः प्रत्ययग्रा
हकत्वायोगान्नेत्रो स्तमेवविविक्तस्य चात्मनस्तद्ग्राहकत्वानुपपत्तेराभासद्वारा तु सर्वंधादात्मनो बुद्धिवृत्तिभावाभावसाक्षित्वमुपपद्यते बुद्धेश्चत
द्रूह आत्मग्रहोहमस्मीत्युपपन्नः स्यादित्यर्थः ॥८४॥ तत्प्रायो विस्फुलिंगवदितिदृष्टांताभिधानादात्मनो विकारप्राप्तिं शंकते नन्वेवमिति ॥ अयः पि

आभासस्तदभावश्च दृशेः सौ ग्रीन चान्यथा ॥ लोकस्य मुक्तितः स्यात्तं तद्

स हश्चेत पासति ॥८३॥ नन्वेवं दृशि संक्रांतिरयः पिंडे ग्निवद्भवेत् ॥ मुखाभासवदित्येतत् आदर्शेतन्नि

राकृतं ॥८४॥

डेऽग्निसंक्रांतिवत्तबुद्धौ दृशि संक्रांतिर्विकारो भवेदित्यर्थः ॥ परिहरति मुखाभासवदितितदेतच्चोद्यमादर्शे मुखाभासवदितिदृष्टांतप्रबंधेन नि
राकृतमित्यर्थः ॥ यथा मुखस्यादर्शे प्रतिबिंबितस्य तत्स्थत्वेन रूपेण मिथ्यात्वं बुद्धौ प्रतिबिंबितस्य चिदात्मनो बुद्धिधर्मत्वेनावभासो मृषैवेति राम
पूर्वमुक्तं सर्वमिहानुसंधेयमिति भावः ॥८५॥ १३२

. त्वं तत्पार

तर्हि कथं तप्तायोविस्फुलिंगदृष्टान्त उक्तः स च विकारप्रसिद्धेर्दार्ष्टान्तिकाननुरूपत्वादित्याशंक्याविवक्षितांशस्येहापि संभावान्नैवमित्याह कृष्णाय इति कृष्णवर्णमयो लोहिताभासं लोहितवर्णमवभासत इत्येतद्देतावद्दृष्टं दृष्टान्त उच्यते नत्वयायाबुद्धेश्चैतन्याभासत्वेऽस्यर्थः सर्वांशसाम्यमनुपपन्नमित्याह दृष्टदार्ष्टान्तेति अप्रकाशाद्यात्मनो मुखादेश्चिद्रूपादिदृष्टान्ताभावप्रसंगादिति भावः ८६ दृष्टान्ते विवक्षितमंशमुक्त्वा दार्ष्टान्तिकेपि तथाविधमंशं दर्शयति तथैवेति चेतनाया आभासो यस्मिंस्तच्चेतनाभासं चित्तं चैतन्यवद्भवेन्न त्विव भवेत्स चाभासो यथादर्शे मुखाभा

कृष्णायो रोहिताभासमित्येतद्दृष्टमुच्यते दृष्टदार्ष्टान्ततुल्यत्वं न तु सर्वात्मना क्वचित् ८५
तथैव चेतनाभासं चित्तं चैतन्यवद्भवेत् मुखाभासो यथादर्शे आभासश्चोदितो मया ८६
चित्तं चेतनमित्येतद्बहुयुक्तिविवर्जितं देहस्यापि प्रसंगः स्याच्चक्षुरादेस्तथैव च ८७

सोऽविकृत एवं मिवेहापि द्रष्टव्यः आभासश्चोपाधिस्थतया दृश्यमानो मुखादिमिथ्येत्यस्तित्युक्त एवेत्यर्थः ८७ कस्माच्चिदाभासव्याप्तचित्तस्य चेतनतावभासो मुख्य एव तेन स्वतः इति शंका न कार्या तत्र प्रमाणाभावाद्दोषाभावादित्याह चित्तमिति युक्तिविनाशवन्नयाऽन्यदृश्यस्यापि चित्तस्य चेद्धेतनता स्वभावः स्यात्तदातिप्रसंगश्च दुष्परिहर इत्याह देहस्येति ८८

रष्टापत्तिमाशंक्य परिहरति तदपीति अवैदिकत्वप्रसंगादित्यर्थः किंचाभासानभ्युपगमे द्वाराभावादहं ब्रह्मास्मीत्यागमेनुक्तं वाक्यान्तन्यमेक्य
१३३ ज्ञानं न सिद्ध्येदित्याह नचधीरिति चेत्तत्प्रत्यगाभासेन भवेत्तदादृशिर्ब्रह्मास्मीतिधीर्न्न भवेत्केवलस्य चित्तस्य जडत्वाद्बुद्धित्वस्य च कूटस्थत्वादि
त्यर्थः ८८ ब्रह्मास्मीतिधियोऽभावे का हानिरित्यत आह सदस्मीति अपिरवधारणार्थः तत्त्वमसीवाक्यमेवाग्राहकमुक्तधियोऽभावेव्य न्मा

तदप्यस्त्विति चेन्न तल्लोकापत्तिकसंगतेः नचधीर्दृशिरस्मीति प्रत्यगाभासेन चेन्नसि ८८
सदस्मीति धियोऽभावे व्यर्थं स्यात्तत्त्वमस्यपि युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ८९

१३४ र्थमेवाप्रमाणमेव स्यादित्यर्थः अस्त्वेवं पर्यन्तं हा का श्रोतृणां सर्वेषां तु प्रतिब्रह्मास्मीतिबुद्ध्युत्पत्त्यदर्शनादित्याशंक्याह युष्मदस्म राम
द्विति अधिकारिणः प्रमितिजनकोऽवेदर्तिनाप्रमात्स्वरूपपदार्थविज्ञानवन एव वाक्यार्थबोधेऽधिकारादात्मानात्मविभागज्ञान १३३
वत्येव युक्तिसीदं वाक्यमर्थवत्सर्वास्मृति न इति तात्पर्यः ९० १३४

तमेव युष्मदस्मद्विवेकं दर्शयितुमुपक्रमते ममेदमित्यादिना इदं पुत्रादि ममेति च प्रत्ययौ युष्मद्यनात्मन्येव वर्त्तेते पुत्रादिबाह्यार्थस्य देहाध्यासद्वा
रा लिंकपर्यंतस्मदर्थे प्रवेशाद्बाह्यार्थसंबंधोप्यनात्मधर्म एवेति पुत्रं पुत्रं ममेति प्रत्ययौ युष्मद्येवेति न संशय इति सर्वत्रानुषज्यते अहमिति प्र
त्यय आभासद्वारात्मभूते व्यावहारिके ऽस्मद्यात्मन्यहंकर्त्तरीष्टः स्यादहमित्येवोल्लेखदर्शनात् अयं देहादिरस्मीति चोभयोरात्मानात्मनोः

ममेदंप्रत्ययौ ज्ञेयौ युष्मद्येव न संशयः अहमित्यस्मदीष्टः स्यादयमस्मीति चोभयोः ६०
अन्योन्याध्यासयोगात्तेषां प्रधानगुणता तेष्यते विशेषणविशेष्यत्वं तथा ग्राह्यं हि युक्तितः ६१

प्रत्ययद्वयार्थः ६१ आत्मानात्मविषयाणां प्रत्ययानामसंकीर्णतया संकीर्णतया च विषयानुक्तोक्तविवेकसिद्ध्यर्थं तेषां गुण
प्रधानभावेन विशेषणविशेष्यभावो ग्राह्य इत्याह द्वाभ्यामिति ६०

त

१३५ विशेषणविशेष्यत्वं युक्तितोग्राह्यमित्युक्तमेवविविच्यदर्शयति ममेदंरूपमिति मध्यमस्यपूर्वश्लोकेमध्येनिर्दिष्टस्यास्मदर्थस्यात्मनोविशेषणत्वमि ऽ१
दं ममेतिचहेयं ममसोस्योहमिति प्रत्ययापेक्षयेत्यर्थः तत्रोदाहरणं धनीगोमान्यथेति यथाधनादीनांस्वस्वदेहापेक्षयाममत्वास्पदमहंकर्तुः
स्थूलोनहिस्थूलोदेहोहंकर्तुरात्मनोवाह्यधनाद्यपेक्षयाहन्त्वास्पदतयाविशेषणमेवेत्यर्थः चकारादात्मनोपिसोहंतातेत्यापुत्रोपिस्थूलदे
हमपेक्ष्यप्रधानभूतोप्यहंकर्ताविशेषणमितिद्योत्यते ८३ एतत्सर्वंयदधीनसत्ताप्रकाशंतत्तारोपितसत्तस्यसदाविशेषणंभवदपितेनसा
ह्रितानसंस्पृशतत्स्वेषुयोनिरपेक्षसिद्धःसशुद्धःसआत्मेतिपुष्पदस्यफलभागस्यसभवेदेवंवाक्यार्थज्ञानमितिप्रमाणमेवेवेदांतवाक्यमित्य
वाक्यात्

ममेदंरूपमप्येतन्मध्यमस्यविशेषणं धनीगोमान्यथानहंदेहोहंकर्तुरेवच ८२ त।
उद्यारूढंसदासर्वंसाहंकर्ताचसाहितः तस्मात्सर्वावभासोत्तःकिंचिदप्यस्पृशन्सदा ८३

मितत्रेणोपसंहरति उद्यारूढमिति उद्यारूढंबुद्धिवृत्तिक्रोडीकृतंसर्वंदेहतत्सेवेक्षविषयजातंसाहित्वोविशेषणंगुणभूतमपिति
पोजनात केवलमेतावत्किंचसाहंकर्ता अहंकर्तासाभासमनसासहितः सूक्ष्मोपिसंघातःसाहितत्वोविशेषणंतस्मिन्नध्यस्तत्वात्तद
वभासत्वादित्यर्थः यस्मादेवंपरमार्थतः किंचिदप्यस्पृशन्सदासर्वस्वाभासद्वारावभासयतीतिसर्वावभासस्तस्मात्सोज्ञानस्वरूप

[illegible]

एषां विविकिनां मार्गो विपरीतं त्वविवेकिनां स्वेच्छादावप्यात्मनो विशेषणात्वप्रतीतेरित्याह प्रतिलोममिति वा स्यात् यो पह्नवश्चेन्नालोकस्य बुद्धिलौ-
कबुद्धिस्तस्या इति वा सार्थसत्त्वप्रधानां लोकबुद्धिमपेक्ष्येति यावन्न तथा च बाह्यार्थप्रधानीकृत्य यदिदं यथोक्तं विशेषणविशेष्यादि सर्वं प्र-
तिलोममननात्मभूतेन तदविवेकधियां विवेकज्ञानमूल्यानां ह्याऽस्ति वर्त्तते विविकिनां तु हृस्यात् सर्वमेतद्विशेषणादिकं दृश्यरूपं नास्ति न
वर्त्तते अविविकिनां बुद्धिमात्मन्यवनात् अपि तु विशेषणविशेष्यादिप्रबंधकल्पना यथाप्रतीतिसत्तामादाय कल्पितेः ध्यारोपापवादस्या

प्रतिलोममिदं सर्वं तथोक्तं लोकबुद्धितः अविवेकधियामस्ति नास्ति सर्वं विविकिनां ९४
अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च स्यादेतदहमित्यत्र युक्तिरेवावधारणे ९५

येनेतिभावः नन्वन्वयव्यतिरेकाभ्यामेव सर्वसंसारविनिर्मुक्तात्मावगमात्किं वाक्येनेत्याशंक्याहान्वयव्यतिरेकौ हीति पदा-
र्थस्यान्वयव्यतिरेकौ नाम आत्मपदार्थे ऽद्रष्टासाक्षी न कदापि दृश्यः साक्षी वा भवति न स्यात्तु प्रकाशसन्मात्रत्वात्स्वतः सिद्धत्वा-
दतोऽनन्याश्रय॥ ॥

१३६ पत्वान्न कदापि कस्यापि विशेषणमात्मानं तथापि दृश्यमानं संचाहंकारादिविषयांतं तदन्याधीनप्रकाशमानकतयाऽन्याश्रयं सत्सदा विशेष
णभावेन व्यभिचरति तस्मादनागमापायिदृगात्मरूपं सत्यं सुषुप्त्यादिवत्तद्विपरीतमसत्यरजतादिवदित्यनृतजडपरिछिन्नपराधीनप
दार्थव्यावृत्तः सत्यज्ञानानंतप्रत्यगानंदरूप आत्मेति विवेचनं ॥ पदस्यान्वयव्यतिरेकौ नाम आत्मा चैतन्यं प्रज्ञानं ब्रह्म सदित्यादि पदानि
कर्तृत्वाद्युपपदविधुराणि केवलस्यैवात्मनः समर्पकाणि न विशेषणात तद्विशिष्टविषयाणि अस्य सामर्थ्यात्कर्त्राभोक्ता ज्ञाता तादृश्यश्रोताव
क्ता गंता कृशः स्थूल इत्यादीनि तु न केवलपूर्णात्मविषयाणि अपि तु स्वाधीनक्रियाद्युपरागदशायामेव प्रयुज्यमानत्वादिति विवेचनं एवं प
दस्य पदार्थस्य चान्वयव्यतिरेकाविति यदेतदहमित्यत्रास्मदर्थविषयेऽवधारणं बुद्धिरेव स्याद्धि विवेकावधारणं पायमात्रं स्यात्तत्तत्त्वा
च्यार्थपदार्थैक्यव्यापारोऽस्येत्यर्थः तस्माद्देहोऽवतापि विवेकेन देहादिवैलक्षण्येऽवधारितेऽपि कोऽहं तर्हीति जिज्ञासायामनुत्पन्ने तत्त्व
त्वमसीति वाक्यं जिज्ञासितस्वरूपविशेषसमर्पकमवश्यमपेक्षितव्यमेवेति भावः॥ ॥ ॥ राम

राम
१३६

किंवावस्थात्रयंपरस्परव्यभिचारिचैतन्यात्मा तु नकदापिव्यभिचारीतिप्रकारांतरेणात्मानात्मविवेकंदर्शयतिनाद्राक्षमिति अस्मिन्नहसुषुप्तेऽन्य
न्नतिसुप्तस्त्वेनैवामनागपीषदप्यन्यदात्मस्वरूपातिरिक्तमहंनाद्राक्षंनदृष्टवानस्मीतिपरामृशन्नहंसोन स्वांस्वात्मनोदृष्टिंचैतन्यंवारयतिप्र
त्ययंतुपुनर्निषेधतिप्रतीयतइतिप्रत्ययइतिव्युत्पत्त्या प्रमातृप्रमाणप्रमेयादिरूपःसर्वएवविशेषोगृह्यतेतस्मात्परस्परव्यभिचारिणयादृष्टस्व
भावाभ्यावस्थाभ्यांमिथ्याभूताभ्यांऽव्यभिचारीचिद्रूपःसाक्षीसत्य आत्मेतिविवेकःसिध्यतीत्यर्थः ९७ एवमुक्तमन्वयव्यतिरेकौशास्त्रसंमतौ
नस्वबुद्ध्युत्प्रेक्षामात्रकृताविति विश्वासायशास्त्रमुदाहरतिस्वयंज्योतिरितिसार्द्धेन अत्रायंपुरुषःस्वयंज्योतिःनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्य

नाद्राक्षमहमित्यस्मिन्सुषुप्तेऽन्यन्मनागपि नवारयतिदृष्टिंस्वांप्रत्ययंतुनिषेधति ९६ स्वयंज्योतिर्नहिद्रष्टुरित्येवंसं
विदोक्तितः ९७ कौटस्थ्यंचतथातस्याःप्रत्ययस्यतुलुप्ततां स्वयमेवाब्रवीच्छास्त्रंप्रत्ययोवगतिःपृथक् ९८

तदस्यैवमादिशास्त्रं संविदस्तु तनायात्रोक्तितोसद्भावं तस्याःसंविदःकौटस्थ्यंनिर्विकारत्वंवस्वयमेवाब्रवीदितिसंबंधः तथाप्रत्ययस्यप्रमा
त त्रादिभेदस्यतुलुप्ततामसत्तां चनतुततद्वितीयमस्ति नततोन्यद्विभक्तंमित्यादिशास्त्रंस्वयमेवाब्रवीदितिपुनरेवान्वयः एवंप्रत्ययावगतीपृ
थगसंकीर्णेशास्त्रेणोक्तेविविच्यतेइतिशेषः प्रत्ययोव्याख्यातःअवगतिश्चैतन्यं ९८

एवमवांतरवाक्यकृतंसुषुप्तदस्य हृद्विवेकमुपपतितंगत्वा विज्ञातपदार्थतत्त्वेगुरुमुखे महावाक्यंफलवद्विज्ञानंजनयतीत्याहएवमिति एवमुक्तप्रकारे
१२७ णश्रुतिप्रसिद्धितोलोकप्रसिद्धितोऽन्वयव्यतिरेकतश्चविज्ञातावांतरवाक्यार्थेपुंसिसतिमहावाक्यात्मिकाश्रुतिः श्रोतुर्दुस्तमोमोहापनुत्तयेसका
र्यविद्यानिवृत्तिप्रयोजनायतत्सदाख्यंब्रह्मत्वमसीत्याहोपदिशतीत्यर्थः ९९ वाक्यश्रवणमात्रान्मोहापोहेदृष्टांतंपुराणप्रसिद्धमाहब्रह्मेति
दाशरथिनारामेणदेवकार्यसिद्धयेमनुष्यावतारनाट्येनस्वमाहात्म्याच्छादनेसंकल्पपूर्वकंयत्कृतंतदिहतमःशब्देनोच्यतेनतुजीवस्यमोहः

एवंविज्ञातवाक्यार्थेश्रुतिर्लोकप्रसिद्धितः श्रुतिस्तत्त्वमसीत्याहश्रोतुर्मोहापनुत्तये ९८
ब्रह्मादाशरथेर्यद्वदुक्त्यैवापानुदत्तमः तस्यापिश्रवणात्त्वसंबोधेनयत्नोजनस्तूचिवान् ९९

संभवतीत्युक्तंसंक्षेपशारीरके ॥ संकल्पपूर्वकममुंरघुनंदनस्यनाहंविज्ञानइतिकंचनकालमेतत्ब्रह्मोपदेशमुपलभ्यनिमित्त
मात्रेनतत्त्वोत्सवर्त्तसहतेसतिदेवकार्यइति हेरामत्वंविष्णुरसिनदशरथपुत्रमात्रइत्युक्तेवब्रह्मादाशरथेःसंकल्पमात्रकृतंतमोवि राम
धूयाच्छादनरूपमपानुदत्एवकारार्थमाहतस्येतिपवित्रांतरवाक्योपदेशग्रहणातिरिक्तमित्यर्थः १०० १२७

दार्ष्टांतिकमाहाहंशब्दस्येति एवंशब्दः प्रथमंयोज्यः यथायंदृष्टांतएवंसदसीतिवाक्येनसानिष्ठानैवकेवलेनानुष्ठापितेति योजना साकानिष्ठे
तितामाहाहंशब्दस्येति प्रत्यगात्मनि परागर्थेभ्योव्यावृत्तेशोधितेआत्मनि निरुपाधिकेज्योतिषिसाक्षिस्वप्रकाशस्वभावेअहंशब्दस्ययानिष्ठालक्ष
णापर्यवसितावृत्तिः सैवेत्यर्थः तत्त्वंतदसीत्युपदेशमात्रादहंसद्ब्रह्मास्मीतिवाक्यार्थज्ञानोदयमात्रेसतिविमुक्ततामोहापोहरूपाफलंभव
तीत्यर्थः यद्वादृष्टांतस्यदार्ष्टांतिकमेवंविज्ञानवाक्यार्थइतिपूर्वश्लोकएवस्थितंद्रष्टव्यं अयंत्वमस्यर्थोख्याप्यतेननुदाशरथेर्भवेदेवविष्णुत्वो

अहंशब्दस्ययानिष्ठाज्योतिषिप्रत्यगात्मनि सैवोक्तासदसीत्येवंफलंतत्रविमुक्तता १००

पदेशमात्राद्विष्णुरहमस्मीतिमतिरितिबोधोदयस्तस्यमहामहिमसंपन्नत्वात्कथमिदानींतनस्यकर्त्तृभोक्तृत्वादिप्रत्ययाभिमानमिथ्या
प्रत्ययग्रहीतस्योपदेशमात्रादहंब्रह्मास्मीतिनिर्विचिकित्सज्ञानंसंभाव्यतइत्याशंक्यशोधितत्वंपदार्थस्यतुंसःकर्त्रादिसाक्षित्वादेवाह
मादिशब्दलक्षितस्यब्रह्मत्वोपदेशान्नानुपपत्तिरत्रापीतिपरिहरति अहंशब्दस्येति सदसीत्येवंवाक्येनसैवनिष्ठोक्तेतिसंबंधः अत्य
त्समाने १

वे

एवमवगतपदार्थेन तत्त्वमस्यादिवाक्यादेव समूलसंसारनिवृत्तिफलं ज्ञानं जायत एवेति स्थिते श्रुतेः प्रामाण्यसिद्ध्यर्थं कार्यपरत्वं कल्प्यमित्याग्रहो निर
१२८ र्थक इति दर्शयितुं सिद्धत्वादित्यपि श्लोकमाह श्रुतमात्रेणेति यदि श्रुत्या येन वाक्यस्य श्रुतमात्रेणोचेदुक्तफलं विज्ञानं न स्यात्तर्हि तदा कार्यं कल्प्यं ध्रुवमव
श्यं भवेत् यथार्थवादादिवाक्यवत्स्वार्थे प्रामाण्यानुपपत्तेः इह तु न तथा कल्प्यमस्ति फलस्य सद्य एवानुभवसिद्धत्वादित्यर्थः स्वयंज्योतिर्निर्वि
द्रष्टृत्वेति श्लोके पूर्वमर्द्धश्लोकोऽधिकः स्थितः इह त्वपमर्द्ध एव श्लोकः इति सहगणनायां २ किंच सिद्धे ब्रह्मात्मनि शास्त्रस्य प्रामाण्यं नाम वि
षयासत्त्वलक्षणं वा निष्फलत्वं वा संशयत्वलक्षणं वानुत्पत्तिलक्षणं चेति विकल्पान्न क्रमेण दूषयति व्यवहारादित्यादिना नाद्यः पक्ष इत्याह व्यवहारा

श्रुतमात्रेण चेत्स्यात्कार्यं नात्र भवेद्ध्रुवं १ व्यवहारातुरापीष्टः सद्भावः स्वयमात्मनः अश
नायादिनिर्मुक्त्यैतत्कालाज्ज्ञायते प्रमा २ तत्त्वमस्यादिवाक्यार्थे त्रिषु कालेष्वसंशय ३

इहैव ब्रह्मास्मीति शास्त्रोपदेशाद्व्यवहारातुरापूर्वमप्यात्मनः स्वयमेव सद्भावस्य बाधकाभावात्स्यात् यथावस्थितात्मस्वरूपस्यैव श्रुत्या निवेदना
न्न श्रुतिर्निष्फलाऽनवद्यप्रामाण्यमित्यर्थः न द्वितीयोऽनुभवविरोधादित्याह अशनायादीति तत्कालात्प्रवाक्यश्रवणकाल एव कालो यस्याः सा
तत्कालात्प्रमा अशनायाद्युपलक्षितसंसारस्य निर्मुक्त्यै निवृत्त्यर्थं जायते विदुषोऽप्रत्यक्षमेवैतदित्यर्थः तेन न निष्फलत्वशंकावकाश इत्यर्थः
ः ३ तृतीयमप्यनुभवविरोधेन निराकरोति तत्त्वमसीति असंशयः संशयो नास्तीत्यर्थः ४ १२८

चक्षुर्थप्रत्याहप्रतिबंधेति। पदार्थज्ञानं हि वाक्यार्थज्ञानोत्पत्तिप्रतिबंधस्तद्विहीनत्वादवगतपदार्थस्य पुंसस्तत्त्वमसीत्येववाक्यश्रवणकाले आ
त्मन्येव प्रमाज्ञायेतैव न संशय इति योजना॥ आकाशपुष्पमस्मीत्यादिवाक्यार्थवदनुभवायोग्यार्थत्वशंकां वारयति स्वयं चेति॥ अनुभवस्वरूप
त्वात्स्वयमात्मनः प्रत्याख्यातुमशक्यत्वादित्यर्थः॥ अतो डुंफडादिशब्दवदनुत्पत्तिलक्षणमप्यप्रामाण्यं नास्तीति सिद्धं सिद्धे ब्रह्मात्मनि वाक्य
स्यप्रामाण्यमिति भावः॥४॥ एवं प्रमातृस्वरूपनिरूपणेनाहं ब्रह्मास्मीति ज्ञानमुपपाद्येदानीं प्रतिपत्तव्यार्थस्वभावनिरूपणेनापि[illegible]पपा

प्रतिबंधविहीनत्वात्स्वयं चानुभवात्मनः॥ ज्ञायेतैव प्रमातृत्वात्स्वात्मन्येव न संशयः॥४॥
किं सदेवाहमस्मीति किं वान्यत्प्रतिपद्यते॥ सदेव चेदहंशब्दः सत्तामुख्यार्थदृष्टितः॥५॥

दपि तद्विकल्पयति॥ किं सदेवेति तत्त्वमसीति वाक्यश्रवणसमनंतरं प्रतिपत्तावहमस्मीति किं सदेव प्रतिपद्यते किं वान्यदिति विकल्पा
र्थः॥ आद्यं प[illegible]रस्यानिष्टापत्तिरित्याह सदेव चेदिति॥ सत्तासच्छब्दार्थेनाहंशब्दो मुख्यार्थः दृष्टिनोतदा च सच्छब्दाहंशब्द
योरेकार्थपर्यवसानादेकात्म्यमेव वाक्यार्थो निःसंसर्गैकरसपरोक्षज्ञानसिद्धिरित्यर्थः॥५॥

स्मि

१२९ द्वितीये दोषमाहान्यस्मिन्निति प्रत्यगात्मनोन्यस्मिंस्तदन्नेदाहंग्राहप्रतिपत्तिरहंग्रहरूपा या प्रतिपत्तिर्मृषैव सा भवेत्संपदादिज्ञानवत्तत्र वाक्य
स्याप्रामाण्यमेव प्रसज्येतेत्यर्थः प्रमाणप्रमेयस्वभावपर्यालोचनया वाक्यादेवापरोक्षफलवदात्मतत्त्ववित्तानमुत्पद्यत इत्युपपत्तिमित्युप
संहरति तस्मादिति इह वाक्ये मुख्यग्रहे सति अवगन्तव्यार्थानुभवस्य वारणं निवारणं नास्तीत्यर्थः ६ न चात्मनः कूटस्थत्वेन प्रतिपत्
त्यनुपपत्तौ फलसंबंधोनोपपद्यत इत्यस्यात्मग्रहे निवारणमित्याशंक्याह प्रत्ययीति प्रत्ययी परिणाम्यंतःकरणं प्रत्ययस्तत्परिणामस्तद्वयं यदाभा

अन्यस्मिन्सदहंग्राहप्रतिपत्तिर्मृषैव सा तस्मान्मुख्यग्रहे नास्ति वारणावगतेरिह ६
प्रत्ययी प्रत्ययश्चैव यदाभासौ न दर्थता तयोरविविक्तिमत्वाद्धु चेतने कल्प्यते फलं ७

सोयस्य चिदात्मन आभासो ययोस्तौ यदाभासौ तयोस्तदर्थता तान्तत्रैव भवतीति यावत्तस्मिंश्चैतन्ये चिदात्मनि तदाभासद्वारा फलं क राम
ल्प्यते किंच तयोः प्रत्ययिप्रत्यययोरविविक्तिमत्वात्तद्वत्त्वादपि फलसंबंधयोगात्फलस्यात्मसंबंधः स्यादित्यर्थः ७ १२९

वृत्ति

निर्व्यापारस्यापि फलसंबंधे दृष्टांतमाह कूटस्थ इति नचु राजतद्भृत्ययोः स्वस्वामिभावसंबंधोस्ति राजनि जयादिसंबंधनिमित्तमिह
त्वध्यक्षाध्यक्ष्ययोस्तादृशस्यादर्शनात्कथमयं दृष्टांतः प्रकृते संगतः स्यादित्याशंक्य आप्यस्याधिष्ठानाधिष्ठेयभावः फलसंबंधहेतु
रित्याह तद् इति हेतुभ्यामित्यत्र हेतुत्वाभ्यामिति भावप्रधानतायोज्या क्रियाः हमात्मिकाहतिः प्रत्यर्थमयतीतिव्युत्पत्तेः प्रत्ययोंतःक
रणोसाभासस्तु चायतेसाभासस्तन्निमित्तोरितियावत् आत्मत्वंचहेतुत्वंचात्मत्वहेतुत्वे तस्य फलस्य न आत्मत्वहेतुत्वे तदनात्मत्वहेतुत्वे

कूटस्थेपि फलं योग्यं राजनीव जयादिकं तदनात्मत्वहेतुभ्यां क्रियायाः प्रत्ययस्य च ८

ताभ्यां तदनात्मत्वहेतुत्वाभ्यामिति योजना तथा च क्रियाप्रत्यययोर्जडयोः फलस्वरूपत्वाभावात्फलोत्पादनत्वाभावाच्च तद्व्यापारनि
बंधनं फलं तदधिष्ठान एव निर्व्यापारेपि कूटस्थे योग्यमित्यस्ति दृष्टांतदार्ष्टांतिकसंगतिरित्यर्थः ८

शुद्धस्यात्मनः प्रमातृत्वंनास्तीत्यभिप्रेत्येदंविशिष्टप्रमातृकृतंफलंकूटस्थेउपचर्यतइतिराजदृष्टांतेनोक्तंवस्तुतस्तुचित्प्रतिबिंबस्यैवस्वोपा
१४० धिव्यापारेणस्वात्मन्यध्यस्तेनविघतएवप्रमातृत्वमितिचिदात्मनएवाविकृतस्यप्रतिबिंबभावनिबंधनः फलसंबंधः इतिसदृष्टांतमाहादर्शस्त्विति
येनमुखाकारेणविशिष्टतयाआभासतइतियदाभासः सचादर्शोमुखाकारः सएवग्रीवास्थएवसन्नततोन्योयथाबिंबप्रतिबिंबयोरैक्यं

आदर्शस्तुयदाभासोमुखाकारःसएवसः यथैवंप्रत्ययादर्शोयदाभासस्तथाप्यहं ६

लोकेप्रसिद्धमित्यर्थः एवंप्रत्ययादर्शोऽहंकारोयदाभासोयेनचित्प्रतिबिंबेनाभासतइतियदाभासःसचित्प्रतिबिंबपरमात्मैवनततो राम
न्योहंकारेऽहमवभासगोचरस्तथासत्यहंब्रह्मेतिवाक्यार्थधीर्घटतेऽध्यस्तांशापोहमात्रेणविनात्मनःकर्म्मत्वमित्यर्थः ६ १४०

अपमेवपक्ष आदरणीय इत्याह इत्थेवमिति एवंसति विदाभासाभ्युपगमे सति सदहमस्मि चकारादहं सदस्मीत्येवमाकारा प्रतिपत्तिः स्याच्चान्य
था आत्मन एव वाहंकारस्यैव वा प्रमातृत्वाभ्युपगमे इति पक्षोऽनोयमेव मार्गोऽनिक्षुण्णत्वादादरणीय इति योजना एवमनभ्युपगमे न केवलं प्रति
पत्त्यनुपपत्तिः विन्तूपदेशस्याप्यनुपपत्तिरित्याह तत्त्वमिति त्वमर्थानुवादद्वारेणाहितदर्थभावत्वोपदेशस्य तत्राध्यमानस्य चित्त्वप्रतिविंबस्या
भावेन तदर्थोपदेशो निरालंबनो नर्थकः स्यादित्येतदाहद्वाराभावादिति १०० एतदेव विशदयति श्रोतुरिति तथा सतीत्यर्थः तत्त्वश्रोतृत्वम
ध्यस्तादन्यत्र न संभवतीत्याहाध्यस्तस्येति न कस्यापीत्यर्थः ११ यद्यप्यध्यस्तस्यनोपदेशस्तथापि नवैयर्थ्यमितिशंकतेऽध्यस्तस्येति तत्र

इत्येवं प्रतिपत्तिः स्यात्सदस्मीति चुनान्यथा तत्त्वमित्युपदेशोपिद्वाराभावादनर्थकः १० श्रोतुः स्यादुपदेशश्चेदर्थवत्त्वं त
थाभवेत् अध्यस्तस्य न चेदिष्टं श्रोतृत्वं कस्य तद्भवेत् ११ अध्यस्तस्य समीपेस्थाद्बुद्धेरेवेतिचेन्मतं नं तत्कृतोपकारोस्तिकाष्ठ
घटवन्न कल्पते १२

बुद्धेः श्रोतृत्वं किमध्यस्तसन्निधिसत्तामात्रापेक्षमाहोस्वित्तत्कृतोपकारापेक्षमिति विकल्प्याद्यं प्रत्याह नतदिति न कृतः सन्निहिताध्य
स्तेन तदुपकारोऽतिशयो बुद्धेर्नास्त्येव यद्वत्काष्ठादिषुं नादेः सन्निहिताद्बुद्धावतिशयो न कल्पते तद्वदित्यर्थः १२

श्री ४

द्वितीयमुदाहरणद्वयमति बुद्धौ चेदिति एवंसति आभासानभ्युपगमे ऽध्यस्तस्यपरिणामितानन्तुनिष्पत्तिंप्रसज्येतेत्यर्थः अतोरूपंरूपंप्रतिरूपोब
भूवएकधाबहुधाचैवदृश्यतेजलचंद्रवदित्यादिश्रुतिस्मृत्युपगृहीतआभासपक्षोनिर्दुष्टउपादेयइत्यभिप्रेत्याहाभासेपिचेति यद्वाअस्तु
१४१ परिणामिताध्यस्तस्येतिचेत् आभासेपिचप्रमाणासिद्ध्यभ्युपगम्यमानेनतवकोदोषोभविष्यतीत्याहाभासेपीति १३ आभासपक्षेविदात्मनः
परिणामप्रसंगाभावंवक्तुंशंकामुद्भावयति आभासेपरिणामश्चेदिति नैवमाभासस्यमृषात्वोपपत्तेरितिपरिहारमाहनरज्ज्वादीति रज्जुज्ञानक
ल्पितस्यसर्पादेरज्जुनिभत्ववदिदमात्मकस्यरजतादेरिदमात्मत्ववच्चचिदात्मानानकल्पितस्यबुद्ध्यादेर्मृषैवचिन्निभत्वंचकारादभ्र

बुद्धौचेन्नकृता कश्चिच्चिच्चैवंपरिणामिता आभासेपिचकोदोषःसतिश्रुत्याद्यनुग्रहे १३
आभासेपरिणामश्चेन्नरज्ज्वादिनिभत्ववत् सर्पादेश्चतथावोचमादर्शेचमुखत्ववत् १४

रूत्वरूपस्यात्मनोभोक्तृत्वाभासोमृषैवेतिसूच्यतेयथैवंमृषात्वंतथापूर्वमवोचमादर्शेचमुखत्ववन्मुखाकारत्ववदितिदृष्टा राम
तप्रतायेनेत्यर्थः चकारान्मुखस्येवात्मनोऽविकृतत्वमप्यवोचमित्यर्थः १४ १४१

अहंकृतेरेवात्मत्वमितिमन्यमानस्तस्यविचिन्त्यत्वमाक्षिपतिनात्मेति आत्मनः केवलस्यग्रहणाद्दवभासनात्पृथगेवात्माभासत्वस्यसिद्धिश्चेन्नभवे
दाभासावभासिनैवात्मभासोऽभ्यक्तेतदाहंत्वस्मिन्नन्ततेः अन्योन्यसंश्रयइतिचोक्तनाहंपंतस्यविषमइत्याहसुखादेरितिदर्पणादिगताभासव्यतिरेके
णीवास्थत्वेनसुखस्यसदासिद्धिरस्तीतिनतत्रान्योन्यसंश्रयस्तेत्यर्थः १५ अन्योन्याश्रयमिवस्पष्टयत्यध्यक्षस्येति तथाचाहमितिप्रती
यमानोऽहंकृत्यात्मकएवचेतनआत्मेतियुक्तमितिअभिप्रायः १६ अहंकृत्यात्मकस्यान्तःकरणस्यस्वप्नेह…शयत्वेनैवव्यवस्थितत्वात्तदा
भासनिरपेक्षएवात्मातत्रसिद्धइतिनोक्तदृष्टान्तासंगतिरितिपरिहरति नैवंस्वप्नइति प्रत्ययस्यान्तःकरणस्यदृशेरात्मनश्चस्वप्नावस्थायांतथा

नात्माभासत्वसिद्धिःस्याद्दात्मनोग्रहणात्पृथक् सुखादेश्चपृथक्सिद्धिरिहत्वमन्योन्यसंश्रयः १५
अध्यक्षस्यपृथक्सिद्धावाभासस्यतदीयता आभासस्यतदीयत्वेग्राह्यग्राहकव्यतिरिक्तता १६
नैवंस्वप्नेपृथक्सिद्धेःप्रत्ययस्यदृशेस्तथा रथादेस्तत्रशून्यत्वात्प्रत्ययस्यात्मनाग्रहः १७

सुखवत्प्रतिबिंबवत्पृथगन्योन्यनिरपेक्षतयैवसिद्धेरित्यर्थः कुतएतदित्यपेक्षायामाहरथादेरिति नतत्ररथानरथयोगानपंथानोभ
वंतीत्यादिनास्वप्नेरथादिदृश्यरहितत्वस्यश्रुयमाणत्वात्प्रत्ययस्यैवरथाद्याकारमापन्नस्यतत्रात्मनास्वप्रकाशचैतन्येनग्रहः तथाचात्मा
प्रत्ययसंवलनविनिर्मुक्तः स्वप्रकाशतयाभासमानएवस्वप्नेविषयाकाराकारितप्रत्ययसाक्षीसिद्धइत्यर्थः १७

१४२ स्वप्नपर्यालोचनया विदात्मनः प्रत्ययाद्विवेकं दर्शयित्वा जाग्रत्स्वभावालोचनयापि तमाहावगत्याहीत्यादिना विषयस्याकृतिरिवाकृतिर्यस्य
अथ वा विषस्याकृतिरिवाकृतिर्यस्य स विषयाकृतिरिति विग्रहः आत्मचैतन्यव्याप्ते विषयाकारे प्रत्यये जायमाने तस्मिन्न्यो विषयाकारः स वाह्यो
विषय इत्यर्थः १८ किंच स वाह्यो विषय ईप्सिततमत्वात्कर्तुः साध्यतयोद्देश्यत्वेनेष्टतमत्वात्कर्म भवति तदीप्सा हि प्रयेच्छा वाक्यार्थे निवृत्य
ते कुर्विति प्रेर्यते यत इत्यध्याहारः आकारसमर्पकस्य कर्मकारकतया विषयत्वमुक्त्वा प्रत्ययस्य करणत्वमाहाकारोऽर्प्यत्रेति यत्र बुद्धिपरि

अवगत्या हि संव्याप्तः प्रत्ययो विषयाकृतिः ज्ञायते स यदाकारः स वाह्यो विषयो मतः १८
कर्मेप्सिततमत्वात्स हि कार्यं निवृत्यते आकारोऽर्प्यत्र चार्थेन करणं तदिहोच्यते १९

णामे विषयेणाकारोऽर्प्यते तार्प्यते तदिह विषयाभिव्यक्तौ करणमुच्यते तत्र बुद्धेरिंद्रियविशेषितात्तदर्थाकारा बुद्धिवृत्ति राम
विषयप्रमितिं प्रति करणमित्यर्थः १९ ॥ ॥ १४२

विषयकरणीभूतापाद्यकर्त्तारंअनुत्पादयति यदाभासेनेति यस्यचित्प्रतिबिंबस्याभासेनसंव्याप्तोहंकारःपरिणमतेसचिदात्मप्रतिबिंबोज्ञातेति
निगद्यतेकथ्यते एवंसाक्ष्यंनिर्दिश्यततःसाक्षिणंपृथगुपलंभयति त्रयमिति एतत्त्रयंज्ञाताज्ञानंज्ञेयंचेतिविविच्यासाधारणरूपेणावगम्या
त्रत्वेपरस्परापेक्षसिद्धिके आगमापायिनिवर्त्तमानंस्वतःसिद्धंतदवधिभूतमनागमापायिसाक्षिणंयोजानाति सम्यगवगच्छतिसआत्मवि
त्त्वंपदलक्ष्यप्रत्यगात्मविदितियोजना तदुक्तंश्रीभगवतेएकमेकतराभावेयदानोपलभामहेत्रितयंतत्रयोवेदसआत्मास्वाश्रयाश्रयः

यदाभासेनसंव्याप्तःसज्ज्ञातेतिनिगद्यते त्रयमेतद्विविच्यात्रयोजानातिसआत्मवित ९०
सम्यक्संशयमिथ्योक्ताःप्रत्ययाव्यभिचारिणः एकैवावगतिस्तेषुभेदस्तुप्रत्ययार्पितः ९१
आधिभेदाद्यथाभेदोमणोरवगतेस्तथा आत्मबुद्धिःपरिणामस्यसर्वप्रत्ययसंश्रयात ९२

ति ९० विवेकप्रकारमेवविदर्शयतिसम्यगिति ९१ भेदस्तुप्रत्ययार्पितइत्येतद्दृष्टांतेनस्पष्टयत्याधिभेदादिति मणेःस्फटिकादेःप्रत्य
यसंश्रयादहंकारप्रतिबिंबकृताभाससंश्रयान्निमित्तादित्यर्थः॥ ॥

ननु ग्राह्यग्रहणग्राहकातिरिक्तात्मसिद्धौ किं प्रमाणमुक्तमेतावता भवतीत्यपेक्षायां तदाह प्रथनमिति प्रत्ययानां विषयाकाराणां ज्ञानस्वप्नावस्था
१४३ नां प्रथनं स्फुरणं ग्रहणमुपादानं स्थितिर्वा व्यावहारिकी वा सिद्धिः स्वरूपसत्ता मधुहव्यवहारभूमौ अन्यतोन्यस्मादात्मनो परोक्ष्यादपरोक्षस्वभावान्द
वितुमर्हति अवित्स्वभावत्वाद् अवित्स्वभावत्वं चागमापायित्वात् प्रदीपवदित्येतदेवानुमानमिहोक्तमित्यर्थः विमताः प्रत्ययाः स्वव्यतिरिक्तात्मा
धीनप्रथनग्रहणसिद्धिका अवित्स्वभावत्वात् प्रदीपादिवदिति प्रयोगः। एवं सामान्यतोदृष्टानुमानेनाचार्यचरणैः स्वयंज्योतिरात्मैवास्य ज्योतिरस्त
स्य भासा सर्वमिदं विभातीत्यादि श्रुति प्रसिद्धस्वप्रकाश आत्मनि संभावना दर्शितेति द्रष्टव्यं २३ एवमनुमानमात्मन्युपन्यस्य विधिमुखेन प्रमा

प्रथनं ग्रहणं सिद्धिः प्रत्ययानामिहान्यतः आपरोक्ष्यात्त्वदेवोक्तमनुमानं प्रदीपवत् २३ किम
न्यग्राहपेक्ष्य किंचित्प्रमाणेन तु केनचित् विनैव तु प्रमाणेन निवृत्त्यान्यस्य शेषतः २४

णेनात्मसिद्धिरुक्ता तत्र केचिद्विशेषघस्त विनैव प्रमाणेनात्मसिद्धिर्न विप्रिमुखेनापीति मन्यन्ते तन्मतं निराकरणाय विकल्पयति किमन्यपि
ति प्रथमस्तु शब्द एवकारार्थः ॥ द्वितीयस्तु वाशब्दार्थः किं कश्चिद्दार्ढीके नचित्प्रमाणेनैव देहादिभ्योऽन्यदात्मतत्त्वं ग्राह्यपेक्ष्य किं वा प्रमा राम
णेन विनैवान्यस्य निवृत्त्या परिशेषतः इति विकल्पार्थः २४ ॥ ॥ १४३

प्रथमपक्षे विप्रमुखे नैव प्रमाणप्रवृत्तिः सिद्ध्यतीतीष्टहानिः स्पष्टेत्यभिप्रेत्य द्वितीयं प्रत्याह शब्देनैवेति शब्देन प्रमाणेनानात्मनिवृत्तिरेव चेदि
होच्यत इति संबंधः तदाध्यक्षस्य अध्यक्षसद्भावस्यान्यतोऽप्रसिद्धत्वात्परिशेषासिद्धेः शून्यतैवावशिष्येत नात्मेत्यर्थः २५ ननु चेतनाचेतन
योर्विरुद्धरूपत्वकथनेनान्यनिवृत्तिः शब्देन क्रियते तथा चाचेतनविरुद्धश्चेतनः परिशिष्यत इति न शून्यताप्रसंग इत्याशंक्य परिहरति चेतन
त्वमिति अप्रसिद्धितो नैव प्रिन्तु त्वं साधयति चेतनस्येति अयमर्थः सिद्धे हि धर्मिणि प्रतियोगिनि स्वापमर्पनं भवतीति तादात्म्यनिषेधेन विरुद्धरू
पत्वोपदेशः स्यान्न चाद्यापि चेतनपदार्थः पृथक् सिद्ध इत्यनेनैव तत्साधनेन्योन्याश्रयः स्यादिति २६ आत्मानात्मनमप्रसिद्धत्वस्य स्वतः

शब्देनैव प्रमाणेन निवृत्तिश्चेदिहोच्यते अध्यक्षस्याप्रसिद्धित्वाच्छून्यतैव प्रसज्यते २५
चेतनत्वं कथं देह इति चेन्नाप्रसिद्धितः चैतनस्यान्यतः सिद्धावेवं स्यादन्यहानतः २६
अध्यक्षः स्वयमत्येव चेतनस्यापरोक्षतः तुल्य एवं प्रबोधः स्यादन्यस्यासत्त्ववादिना २७

सिद्धत्वादित्याशंक्यते अध्यक्ष इति चेतनस्य स्वतोऽपरोक्षत्वादित्यर्थः दूषयति तुल्य इति एवं सत्यन्यस्यासत्त्ववादिना शून्यवादिना तुल्य
ः समः प्रबोधः स्यात् यथा शून्यवादिनः प्रमाणेन विनात्वतः सिद्धः शून्यमात्मेति न प्रबोधसिद्धिस्तथाध्यक्षस्यापि तवेत्यर्थः २७

१४४ इदानीं स्मृतिबलेन स्वतःसिद्धाध्यक्षासिद्धिं शंकते ऽहमज्ञासिषमिति अहमिदमज्ञासिषमितीह व्यवहारे लोकस्य युगपत्स्मृतिदर्शनाद् ननु भूतेस्म
त्यभावात्करणाकर्मकर्त्तॄरस्तु यो व्येकक्षणो द्राग्येन सिद्धाः सोऽस्य ध्वस्तः स्वतःसिद्धतेति गम्यते किलेत्यनभिमतत्वद्योतनात् अपूर्वपद्धताद्योतितेत्यर्थः २८
एतन्निराकरोति प्रमातर्यपीति स्मृतेः पूर्वानुभवगमकत्वेन प्रमातर्यपि न युगपत्त्रितयसिद्धिगमकत्वं यतः पूर्वं क्रमेण करणादीनां ग्रहणमभूत्तथैव च
पश्चादुत्तरकालं स्मृतेः संभवोऽन्तःशेषव्यापारे तर्पणाविलत्वाद्योगपद्यं विभाव्यते प्रत्येवेत्यक्षरार्थः अर्थत्रयस्यैकस्य यत्वभासत्वे निश्चिते सत्यैव
स्याच्च तत्तन्निश्चितं शक्यते यतो हमिदं ज्ञानामीति क्रमेणाव्यपदिश्यते ऽतो ग्राह्यस्फुरणस्य ग्राहकग्रहणाकारनो संभवात्तत्कालेन यो नभानेहं

अहमज्ञासिषं चेदमिति लोकस्मृतेरिह करणाकर्मकर्त्री च सिद्धास्त्वेकक्षणे किल २८ प्रमातर्यपि
स्मृतेः शेषव्यापारयोगपद्यं विभाव्यते क्रमेणैव ग्रहः पूर्वं स्मृतेः पश्चात्तथैव च २९

भवति एवं ग्राहकस्य प्रतीचः स्फुरणासमये ग्राह्यस्य पराचो नास्ति स्फुरणं विरुद्धाकारद्वयस्यैकस्मिन्प्रमातरि ज्ञाने स्फुरणासंभवात् न याज्ञान राम
स्याविविषयैकाकारत्वात्तत्स्फुरणे न ज्ञात्स्फूर्तिरिति क्रमेणैव ज्ञात्रादिसिद्धिः प्रागुक्तेयात्तस्माद् उत्पलपत्रशतभेदनयोगपद्याभिमानवद् यु १४४
गपत्स्मृतिरित्यभिमानः शैघ्र्यनिबंधन इति भावः २९

स्यते यौगपद्याभावे कर्त्रान्तरमाह ज्ञातिष्वमिति इदमित्याकारो हि प्रत्यगपेक्षयोल्लिख्यते तथामामिति परागपेक्षया धीर्न्त्यपतते तथा च यत्र विशेषो
न्यप्रतियोगिकोपि स्पतेत त्रैवैककालता यौगपद्यं नैव दृश्यत इत्यर्थः ३० स्यतेर्विषयतः स्वरूपतश्च यौगपद्यासंभवात्कर्त्रादिसिद्धेः कानुमापकत्वान्नु
पपत्तिरित्युक्तं संप्रति कर्त्रादीनां युगपदनुभवसाधनाभावादपि न युगपत्प्रतिसिद्धिसंभावनेत्याहात्मन इति अयमर्थः यथा विषयस्य ग्रहणे
कर्त्ता करणं कर्म चेति त्रितयमपेक्षते एवं प्रत्येकं कर्त्रादिग्रहणेपि त्रितयमपेक्षणीयं तथा चात्मनः प्रमातृत्वकारत्वमेयस्य प्रमाणज्ञान
स्य च ग्रहणेपि त्रयाणां कर्त्रादीनामिहापेक्षासंभवात् कर्त्रादिस्फुरणमन्तरेणानतेदर्थस्य तदनुभूततन्नियमासिद्धेः कर्त्राद्यनवस्था

अस्ताविषमिदं मां चेत्यपेक्षा जायते ध्रुवं विशेषोपेक्ष्यते यत्र तत्र नैवैककालता ३०
आत्मनो ग्रहणे चापि त्रयाणामिह संभवात् आत्मन्यासक्तकर्तृत्वेन स्यात्करणकर्मता ३१

प्रसङ्गेनेत्यर्थः तैरेव कर्त्रादिभिः स्वस्वरूपसिद्धिसंभवात्किमित्यनवस्थेति शंकां वारयत्यात्मनीति आत्मन्येकस्मिन्नेव स्वसिद्धावासक्तत्व
पक्षीणां यत्कर्तृत्वं तदेव करणकर्मतोः सिद्धौ तत्र स्यादित्यर्थः तथा चैकस्मिन्नवभासे कर्त्रादिभावेनान्वीयमानानां तदेव चावभासांतरसा
धनत्वान्वयायोगात्र कर्त्रादित्रितयस्य युगपदनुभवसाधनसंभावनेति तदसिद्धिस्तदवस्थेत्यर्थः ३१

कर्त्रादीनां युगपत्सिद्ध्यभ्युपगमे व्याकरणविरोधोपि स्यादित्याह व्याप्तुमिति कर्तुः क्रियया व्याप्तुमिष्टं तत्कर्मेति स्मृतं कर्तुरीप्सिततमं कर्मेति पा
१४५ णिनिनाप्युक्तमित्यर्थः हि यस्मादेवमतस्तस्य कर्मणः सकलकारकप्रयोक्तृत्वं च कर्तृत्वं तत्र त्वमिष्टं न तद्व्यतिरिक्ताध्यक्षत्वं तद्वत्ता च कृत्याये
न तत्साध्यकर्मसिद्धिरित्यर्थः ३२ तस्माद्विप्रतिपत्तेरपहत्यादेव प्रमाणादभिमतवस्तुसिद्धिर्न्यायनिबंधमात्रावसाना स्यादिति निर्णीतमित्युप

व्याप्तुमिष्टं च यत्कर्तुः क्रियया कर्म तत्स्मृतं अतो हि कर्तृतं त्रत्वं तस्येष्टं नान्यतं त्वता ३१
शब्दाद्यनुमितेर्वापि प्रमाणाद्यात्ततोन्यतः सिद्धिः सर्वपदार्थानां स्यादत्तं प्रतिनान्यथा ३२
अध्यक्षस्यापि सिद्धिः स्यात्प्रमाणेन विनैव वा विनास्य स्यप्रसिद्धिस्तु नातंत्र्यस्तुपपद्यते ३३

संहरति शब्दाद्येति अन्यतोऽस्मात्प्रत्यक्षादेवेत्यर्थः ३३ जडानां प्रवृत्तप्रमाणादेव सिद्धिरस्तु न स्वयं चेतनस्येत्याशंक्याह
अध्यक्षस्यापीति वेयमध्यक्षस्य सिद्धिरतस्य सा प्रमाणाधीना न वेति विकल्प्याद्यं न्पेत्वरूपप्रकाशमात्रस्य विनाप्रमाणेन सिद्ध्यावपि राम
नाध्यक्षस्य ध्यक्षतातत्त्वसिद्ध्यतीति दूषयति विनास्व स्येति ३४ १४५

अथ ज्ञानस्य स्वरूपस्यापि विकल्प्य प्रमाणाधीनसिद्धिकत्वात् तस्य दर्शयन्नाद्यं पक्षमभ्यनुजानाति तस्यैवेति तस्यैव ज्ञानस्वरूपस्य चेतनस्यैवाज्ञत्वमि
ष्टं चेत्तदा तस्य ज्ञानत्वे चेतनत्वे स्यात्प्रमाणाजन्या मतिर्वेद्यतीया भवेत् अन्यस्यैवाचेतनस्याहंकारस्यैवाज्ञतायां तद्विज्ञानेध्यक्षविज्ञाने वा
न्याश्रमतिर्ध्रुवा भवेदिति योजना उभयथापि विविधमुक्त्वा प्रमाणाधीनाध्यक्षसिद्धिरित्यर्थः ३५ अथ ज्ञानस्य स्वसिद्धस्वरूपत्वात्मानापेक्षा नास्ती
त्यपक्षं व्याक्षिप्य शब्दार्थ एव तर्हि वक्तव्य इत्याह ज्ञाततेति किं ज्ञानसिद्धिः स्वरूपलाभो वा स्यादन्यदेव वोभयान्यप्रकारा वेति विकल्पाद्यं तत्राद्ये
दोषमाह ज्ञातत्वेति अनंतरोक्तो तस्यैवाज्ञत्वमिष्टं चेदित्यादिना पूर्वश्लोकोक्तो पूर्वोक्तविकल्पदूषणप्रसरान्नाद्यः कल्पः साधुरित्यर्थः ३६

तस्यैवाज्ञत्वमिष्टं चेत्तज्ज्ञानत्वे स्यान्मतिर्भवेत् अन्यस्यैवाज्ञतायां चेत्तद्विज्ञानेध्रुवा भवेत् ३५
ज्ञातता स्वात्मलाभो वा सिद्धिः स्यादन्यदेव वा ज्ञातत्वेऽनंतरोक्तौ त्वं पक्षौ संस्मर्तुमर्हसि ३६
सिद्धिः स्यात्स्वात्मलाभश्चेद्यत्नस्तत्र निरर्थकः सर्वलोकप्रसिद्धत्वात्स्वहेतुभ्यस्तु वस्तुनः ३७

द्वितीयमनूद्य दूषयति सिद्धिः स्यादिति निरर्थकत्वे हेतुमाह सर्वलोकेति वस्तुनः सर्वस्य स्वहेतुभ्यः स्वात्मलाभरूपा सिद्धिरिति सर्व
लोकप्रसिद्धत्वात्तत्र प्रमातृप्रमाणप्रयासो व्यर्थः स्यादित्यर्थः ३७

त्तीयं पक्षमप्रसिद्धं परिहरति तं मत्वा वत्प्रमाणपक्षविशेषणतापनार्थमुक्तं पक्षं निगमयति ज्ञानत्वेत्यादीति ज्ञानत्वेयं ज्ञानताचास्तीति यस्यवादस्तस्मिन्वा
१४६ देज्ञानत्वमेव सिद्धिरुच्यते अध्यस्तौयोस्तु पुनः दैत्यमेव सिद्धिर्नत्वात्मलभ्यतेत्यर्थः अध्यस्तस्यापीत्यादेरपरायोजना अहमज्ञासिषं चेदपि
त्यारभ्येयता ग्रंथेन कर्तृकर्मकरणानां विधिमुखेन प्रवृत्तप्रमाणादेव सिद्धिर्नान्यथेति प्रासंगिकमुपपादितमुपसंहृत्याध्यस्तस्यापि वस्तुत्वाद्विशेषा
त्प्रवृत्तप्रमाणादेव सिद्धिरिति प्रकृतमनुसरन्नाह अध्यस्तस्यापीति वाशब्दः कल्पान्ते अध्यस्तस्यापि दुष्टरपि प्रमाणेन विनैव सिद्धिः स्याद्वेतिचेन
नानैव स्यादित्यर्थः चेतनत्वादध्यस्तस्य प्रमाणेन विना कथं न सिद्धिरित्यत आह विनेति प्रमाणेन विना स्वस्य वस्तुनः प्रसिद्धिः स्तु ज्ञानं प्रत्यु
पपद्यते ज्ञानस्येव स्वरूपस्फुरणे प्रमाणानपेक्षात्वात्तदध्यस्तस्येत्यर्थः कथमिति चेन्न वक्तव्यं अध्यस्तत्वात्तः सन्न प्रमाणेनार्थसिद्धिसाध विना
पीषति किंवान्योन्यःकरणादिरितित्राघमन्घट्टयतितस्येवेति चेतनस्याध्यस्तस्येवेत्यर्थः ज्ञानत्वेऽहमध्यस्तइतिज्ञानवत्त्वेऽप्या

ज्ञानत्वेपादिवादेऽतः सिद्धिर्ज्ञानत्वमुच्यते अध्यस्ताध्यस्तयोः सिद्धिर्दैत्यत्वे नात्मलाभता २८

मतिः प्रवृत्तप्रमाणजन्यामतिरपेक्षिता म्भवेदागंतुकसिद्धेरन्यनिमित्तत्वादित्यर्थः द्वितीयमन्वघद्दूषयत्यन्यस्येवेति तद्धि ज्ञानरतितस्या
न्यस्यातः कारणादेरध्यस्तविषयविज्ञाने अन्याप्रमाणजन्यामतिर्ध्रुवाभवेदितियोजना उभयथापि विधिमुखेन प्रवृत्तप्रमाणादेवाध्य
स्तसिद्धिरित्यर्थः ज्ञानताज्ञानवन्नासिद्धिरितिपक्षे तस्यैवाज्ञत्वमिष्टं चेदिति सर्वश्लोकोक्तविकल्पदूषणप्रसरणमनिवारणं स्यादित्य राम
हज्ञानत्वेऽनंतरोक्ताविति यथाव्याख्यातौ स्वपक्षाविन्यर्थः अन्यत्समानं २८ १४६

ननुज्ञातता मन्मते भाति रिक्ताप्यस्ति स्पष्टता नाम सिद्धिरतो नाप्रसिद्धं पदान्तरमिति भट्टमतमाशंक्य परिहरति स्पष्टत्वमिति स्पष्टत्वं प्राकट्यं कर्मकर्त्रादिस्प
ष्टतास्पष्टते अप्यन्यस्यैव कर्त्रादि किं त्वज्ञातस्य साक्षिणश्चिदाभासज्ञानत्वेन स्यातां नात्मनः कर्त्रादिस्वरूपस्य जडत्वादित्यर्थः ३९ एतदेव व्यति
रेकप्रदर्शनेन स्पष्टयति अदृष्टेरिति अर्थस्य दर्शनवृत्तिरहितस्याज्ञातविषयीभूतस्यावस्थया स्पष्टीभावः सत्त्वेनाज्ञानविषयतातिरिक्तो भट्टमते
संभवतीत्यर्थः एवं सति भाट्टमतानुसारिणा कर्त्रादेः स्पष्टता प्राकट्यरूपेष्टा चेत्तदादृष्टता तद्वित्तद्वाराध्यस्तकर्त्तृकाऽवशपमेष्वातस्यात्कर्म

स्पष्टत्वं कर्मकर्त्रादेः सिद्धिता पदिकल्पते स्पष्टतास्पष्टते स्यातामन्यस्यैव न चात्मनः ३९
अदृष्टेर्नैव बाधस्यास्पष्टीभावो ह्यवस्थया तु कर्त्रादेः स्पष्टतेष्टा चेद्दृष्टताध्यस्तकर्त्तृका ४० त

देर्जडस्यास्पष्टतायाः प्रकाशापरपर्यायाया असंभवाच्च स्पष्टतासिद्धिशब्दार्थः किं तु ज्ञानविषयत्वेनेति कर्त्रादिगतविदाभासनद्वारा तदधि
ष्ठानभूतस्वचिदात्मा विधिमुखेनैव प्रदीपादिदृष्टान्तानुमानादिना प्रमाणेनावगन्तव्य इति भावः ४०

मा॰हिम

अत्रकर्तृकर्म्मविहीनएवप्रत्ययःस्वप्रमाभासनइतिवदन्विज्ञानवादीबौद्धःप्रत्यवतिष्ठते अनुभूतेरिति अनुभूतेःसंवेदनस्यान्यस्मिन्कर्त्रादावपे
क्षयातव किंफलंस्यान्नहृद्नकिंचित्फलंतस्याःस्वप्रकाशत्वादित्यर्थः अनुभवितरि आश्रयभूतेसेयंव्याप्यात्तस्यास्तदधीनत्वदर्शनादितिचेत्त्वंबु
१४७ ध्यस्तर्हिसोप्यनुभविता नोस्माकंमतेऽनुभूतिरेवनततःपृथक्कृतस्तत्वेप्रमाणाभावादित्यर्थः ४१ कथंतर्ह्यनुभूतिरनुभविताऽनुभाव्यइतिभेददर्शन
मित्यतआहभिन्नोपि हीति बुद्ध्यात्माबुद्धिस्वभावोऽभिन्नोप्येकोपिविपर्यासितदर्शनैर्भ्रान्तैबुद्धिभिःपुरुषैर्ग्राह्यग्राहकसंवित्तिभेदवानिवलक्ष्यते
प्रतीयते संवित्तिशब्दोग्रहणशब्दपर्यायः ४२ बुद्धेःकारकत्वानंगीकाराच्चनकर्त्रपेक्षेत्याह भूतिरिति येषांमतेयाभूतिरनुभूतिःसैवक्रियासै

अनुभूतेःकिमन्यस्मिन्नस्यात्तवापेक्षयावद अनुभवितरीक्षास्यात्सोप्यनुभूतिरेवनः ४१ अभिन्नोपिहिबु
द्ध्यात्माविपर्यासितदर्शनैः ग्राह्यग्राहकसंवित्तिभेदवानिवलक्ष्यते ४२ भूतिर्येषांक्रियासैवकारकंसैव
चोच्यते क्षणत्वंनाशित्वमस्याश्चनसकर्तृत्वंतथेष्यतां ४३ नकश्चिच्चेष्यतेधर्म्मइतिचेत्पक्षहानतः ४४

वकारकमुच्यते क्षणभंगुरत्वेनविरम्यव्यापारादौगात्रेषांमतेकर्त्तस्याःस्वव्यतिरिक्तोपेक्षणीयःस्यादित्यर्थः ४३ प्रथममनुभूतेरन्यान
पेक्षत्वंनिराकरोतिसिद्धोनीसत्वमिति अनुभूतेरस्याःसत्वंस्वरूपसत्वंनाशित्वंक्षणभंगरत्वमिष्टंचेत्तदर्नाहितथासकर्त्तृत्वमपीष्यतां राम
मनुभवस्यात्राप्यसम्भवादित्यर्थः अथसत्वादिरपिधर्म्मोनेष्यतेइतिमतंतदाक्षणिकत्वपक्षस्याप्यसिद्धिरित्याहनकश्चिदिति १४७
४४

न तु नास्माभिर्विज्ञानस्य क्षणिकत्वादयो धर्मा निरूप्यन्ते किं त्वक्षणिकत्वाद्यपोहरूप एव क्षणिकत्वादिरिष्यते तो नो क्तदोष इति शंकते नन्विति निराकरोति नेति
ते एवं चेत्तर्हि भूतेर तु भूतेर्नाशित्वं न सिध्येत हि यस्मान्नेतद्भूतेः स्वात्मलक्षणं मतं किं त्वेतल्लक्ष्यते तावत् तदिति स्वलक्षणात् स्वभावः स्वात्मलक्षणं निर्विकल्पक
मात्रविषयात्ततः सविकल्पकत्वाऽक्षणिकत्वासत्त्वानाशित्वात्त्वादिव्यावृत्तेरतु भूतेष्वसविकल्पकज्ञानागोचरत्वात्सत्त्वनाशित्वस्यादिधर्मासि
द्धिरित्यर्थः ४४ एतदेव स्फुटयति स्वलक्षणेति अयमर्थः कार्यं विनश्यत्तनिरवधिनश्यतीदमत्रनास्तीदमिदानीं नास्ति नष्टमिति वा नाशो व्यव
ह्रियते यस्मात्किमप्यस्ति विनाशावधिभूतमविनश्वरं तु स्यात्तत्स्वतः सिद्धं चेत्सभ्युपेयं तदेतदाह स्वलक्षणावधिर्नाश इति स्वरूपमेव लक्षणं प्रमाता
धर्मो वा यस्य स स्वलक्षणः सो वधिः सीमा यस्य विनाशस्य स तथेति विग्रहः तथा च तन्मते आविर्भावतिरोभावयोरवधिभूतस्य स्थिरस्याभावात्त
सत्त्वविनाशयोः सिद्धिरित्यर्थः किं चापोहपक्षे न्योन्याश्रयश्च प्रसज्येतेत्याह नाश इति सिद्धे नाशे तद्धि ते धिनोऽनाशस्य सिद्धिस्तत्सिद्धौ तदपोहरूप

न त्वस्तित्वादयो धर्मा नास्तित्वादिनिवृत्तयः न भूतेस्तर्हि नाशित्वं स्वात्मलक्षणं मतं हि ते ४४ स्वलक्षणावधिर्नाशो नाशोऽ
नाशनिवृत्तिता ४५ अगोरसत्त्वं गोत्वं तेन तत्तद्धीत्वलक्षणा कृतावान्योन्यविरोधः स्यात्सोऽप्यन्याभाव एव ते ४६

नाशसिद्धिरित्यर्थः ४५ यत्तु सामान्यमनभ्युपगच्छता वौद्धेनागोव्यावृत्तिर्गोत्वलक्षणमित्यभ्युपगम्यते तदप्यनुपपन्नमन्योन्याश्रयस्यतादवस्था
दित्यभिप्रेत्याह अगोरिति गोरन्यस्याश्वत्वादेरगोपदाभिधेयस्यासत्त्वं निवृत्तिरभावो गोत्वमिति ते मतं तत्र न गोत्वलक्षणं सिध्यति अश्वत्वस्या
पि गोत्वव्यावृत्तिलक्षणतया परस्पराविरुद्धसिद्धित्वादित्यर्थः अपोहवादे दोषांतरमाह लक्षणा वा न्योपीति अन्याभावो क्षणिकाभावः लक्षणाइ
तिते प्रसज्यते अतः क्षिते पि क्षणिकता विरोधीत्वयाभ्युपगतः स्यादित्यर्थः ४६

नन्वभावो नाम न सत्तो ऽनिवृत्तिरिष्यते येनातिप्रसंगः स्यात्किंतु विरूपाख्यगोत्वं स्वान्यव्यावृत्त्यात्मनापि नेष्यत इति शंकते भेदाभावेपीति अभाव
१४८ स्यस्वरूपतो भेदाभावेपि अगोत्वमश्वत्वमनश्वत्वं गोत्वमित्यादिनामभिः स्वरूपभेद इष्यत इष्यत इत्यर्थः दूषयति नामभेदैरिति एकस्य निःस्वभावस्या
भावस्य नामभेदैर्द्विरर्थकसंज्ञाभेदैरनेकत्वमनेकपदार्थासाधारणतया व्यावृत्त्यात्मत्वं तव कथं घटते इत्यर्थः ४७ किंच भिन्नानां व्यावृत्तिरपो
हो ऽभिन्नानां वा तत्राद्यमनूद्य दूषयति अपोहो यदीति भेदप्रतियोगिनामानंत्यात्तदवगममंतरेण तदपोहानवगमात्तस्यापोहस्य गविहत्ति

भेदाभावे ऽप्यभावस्य भेदो नामभिरिष्यते नामभेदैरनेकत्वमेकस्य स्यात्कथं तव ४७
अपोहो यदि भिन्नानां वृत्तिस्तस्य कथं गवि नाभावा भेदकाः सर्वे विशेषा वा कथं च न ४८

कथं सिद्ध्येदिति शेषः तदसिद्धौ च किंचिदभावस्य कचित्तुल्यत्वाद्व्यवहारानियमप्रसंग इति भावः द्वितीये दोषमाह नाभावा इति
सर्वे ऽप्यभावा अजत्वाश्वत्वाद्यपोहरूपा न भेदका न गोरितरेतरव्यावृत्तत्वबुद्धिजनकाः सुवर्णाद्या विशेषा वा भावरूपाः खंडमुंडत्वादयो राम
भेदका न स्युर्भेद्यभेदकयोर्भेदासिद्धेरित्यर्थः ४८ १४८

एवं चापोहवादे खण्डो गौर्नीलमुत्पलमित्यादिविशिष्टव्यवहारासिद्धिरयं गौरित्याद्याधाराधारस्वरूपव्यवहारासिद्धिश्च स्यादित्यभिप्रेत्यापीह निराकरण
मुपसंहरति नामजात्यादयस्तद्वैन तेनैव मते संविदोऽविशेषत्वान्निर्विशेषत्वान्नामजात्यादयोऽप्यत्र विशेषणं एवं गवादीनामगवादिव्यावृत्तयः
खण्डादयो वान विशेषणमिति विशिष्टव्यवहारलोप एवेति जीवनमपि ते दुर्लभमिति भावः ४९ यदुक्तं भूतिर्येषां क्रियास्वेव तत्र संविदः क्रियाकार

नामजात्यादयोऽप्यत्र संविदस्तेऽविशेषणं ४९ प्रत्यक्षमनुमानं वा व्यवहारे यदीच्छसि क्रियाकारकभेदैश्च तदभ्युपेयं ध्रुवं भ
वेत् ५० तस्मान्नीलं तथा पीतं घटादिर्वा विशेषणं संविदस्तद्रुपेयं स्याद्येन चाप्यनुभूयते ५२

कभेदापेक्षानास्तीति तत्प्रत्यक्षमनुमानं वेति प्रमाणद्वयाभ्युपगमविरुद्धमित्याह प्रत्यक्षमिति स्पष्टार्थः ५० तथा च संवेदनातिरिक्त
ज्ञेयवेद्यस्वरूपमनिच्छताप्यभ्युपेयमिति बौद्धमतनिराकरणमुपसंहरति तस्मादिति येन चाप्यनुभूयते सो विज्ञाताभ्युपेयः स्यादित्य
र्थः ५१

१५९ संवित्साक्षिरूपन्तु मानं प्रमातामाह रूपादीनामिति यद्ग्राह्यं तत्स्वान्यग्राह्यं यथाहरूपादिग्राह्यासंविदितिबौद्धप्रतिप्रयोगो योज्या तथावभासकोऽवभास्या
दन्योऽव्यंजकत्वाद्घटादेः प्रदीपवदित्यात्मिकान्वप्रतिप्रयोक्तव्य इत्यर्थः यथारूपादीनां ग्राह्यत्वाद्ग्राहकोऽन्यः स्यात्तथा प्रत्ययस्य ग्राह्यत्वाद्ग्राहकोऽन्यः
स्यान्नथायाहत्वाद्ग्राह्याद् अन्यः स्याद्व्यंजकत्वात्प्रदीपवदिति श्लोकयोजना ५२ कस्तर्हि प्रत्ययात्मदृशोः संबंध इत्यपेक्षायामाह अध्यस्तस्येति उष्टद ५३

रूपादीनां यथान्यः स्याद्ग्राह्यत्वाद्ग्राहकस्तथा प्रत्ययस्य तथान्यः स्याद्व्यंजकत्वाच्च दीपवत् ५२
अध्यस्तस्य दृशेः कीदृक् संबंधः संभविष्यति अध्यस्तेन तदृशेन तु न्धोन्योऽदृष्टदृश्यताम् ५३
अध्यस्तेनाहृताद्दृष्टिर्दृश्यत्वान्नोन्यथापि वा नित्याध्यस्तकृतः कश्चिदुपकारो भवेद्धियां ५४

श्यसंबंधाभ्युपगमेवत्तादात्मासोऽभ्युपगंतव्य इति दर्शयितुं विकल्पयसध्यस्तेति ५३ अध्यस्तेन प्रत्ययेन दृशेरात्मनः कीदृक् संबंधो भविष्यति राम
पारमार्थिको वाऽपारमार्थिको वेति विमर्शार्थः तत्राद्योदृशेः परिणामादिविकारप्राप्तिप्रसंगात्सावद्य इत्यभिप्रेत्य द्वितीयमंगीकरोतीति नित्या १५९
ध्यस्तेति ५४

कोसावुपकार इत्यपेक्षायामाह सचोक्त इति सचनित्याध्यक्षकृतो बुद्धेरुपकारस्तन्निभत्वं चित्रिभत्वं प्राक्पूर्वमेव मुख्य प्रतिबिंबदृष्टांते नोक्त इत्यर्थः
उक्ताभासद्वारात्मनो दृश्यं वाद्य विषयसंबंधं वक्तुं साभासाया बुद्धेर्विषय व्याप्तिं सदृष्टांतमाह संव्याप्तिश्चेति यथा घटादिष्वालोकादिसंव्याप्तिर्व्यंजकत्वा
त्तथाधियो दृश्यघटादिव्याप्तिरित्यर्थः ५४ उक्तमेव स्फुटयति आलोकस्थ इति यद्वद्यथा लोकनिविष्टे घट आलोकारूढो भवेत्तथा बुद्धिनिविष्टेषु

सचोक्तस्तन्निभत्वं प्राक्संव्याप्तिश्च घटादिषु यथालोकादिसंव्याप्तिर्व्यंजकत्वाद्धियस्तथा ५५
आलोकस्थो घटो यद्वद्बुद्ध्यारूढो भवेत्तथा धीव्याप्तिः स्याद्धटारोहो धियो व्याप्तौ क्रमो भवे
त् ५६

ध्यारूढो भवेत् आरूढ इत्युक्ते पुरुषाम्बुयोरिवोपर्यधोभाव इति शंकां वारयति धीव्याप्तिः स्यादिति यद्येवं विषयव्याप्तिमात्रमेव धियो विषय
व्यंजकत्वं न दीपात्मनो बुद्धिस्थ को विशेष इत्याशंक्य विशेषमाह धियो व्याप्तौ क्रमो भवेदिति ५५

+ शाद्विवदिति॥५६॥ नन्वध्यक्षस्यापि भोग्यविषयाव ६/

धियो विषयव्याप्तौ क्रमो भवेत्तत्रात्मन इत्यर्थः तदुक्तं विशेषं विशदयति पूर्वमिति धियो विषयव्याप्तिः पूर्वं प्रथममिव प्रथमं स्यात्ततो विषयाकारतां सिद्धा
१५० यामात्मनोऽनुग्रहस्तदाकारप्रतिबिंबभावस्तद्वत्तात्वविषयव्यंजकत्वमिति क्रमदृष्टत्वमन्यशेषत्वं च धियः सिध्यति न तथात्मन इत्याह कृत्स्नाध्यक्ष
स्येति प्रत्यर्थपरिणामभेदेन व्यंजकत्वाद्बुद्धेरेव क्रमो युक्तः कृत्स्नाध्यक्षस्य सर्वविद्रूपास्पदतया ऽऽदिवदिति ५६ नन्वध्यक्षस्यापि भोग्यविषयाव
सर्वदा सर्वज्ञानुगतप्रकाशरूपस्यापरिच्छिन्नस्यात्मनो न युक्तः स क्रम इत्यर्थः देशतः कालतो वा क्रमाभावे दृष्टांतः कालाकाशावभासकत्वाद्बुद्धे

पूर्वं स्यात्प्रत्ययव्याप्तिस्ततोऽनुग्रह आत्मनः । कृत्स्नाध्यक्षस्य सोऽयुक्तः कालाकाशादिवत्क्रमः ५७
विषयग्रहणं यस्य करणापेक्षया भवेत् । तस्यैव ग्राह्यशेषे च परिणामी स चित्तवत् ५८

रिव परिणामः प्राप्नोतीत्याशंक्याह विषयग्रहणमिति करणापेक्षया कर्त्रादिकारकापेक्षया ग्राह्यशेषे स्वासंस्पृष्टविषयांतरावशेषे च सति
यस्य विषयग्रहणं भवेत्स परिणामी स्याच्चित्तवत् नैवमात्मनो विषयावभासनं किंतु नित्यसिद्धप्रकाशस्वभावेन युगपत्स्वाध्यस्तसमस्ता राम
वभासनमित्यतो नात्मनः परिणामशंकावकाश इत्यर्थः ५८ १५०

यद्यपि तस्योक्तरीत्या भोग्यविषयाकारपरिणामो नास्ति तथापि बुद्ध्युपलब्धतानाकारेण परिणामः स्यात् बुद्धिगुणाः स्वात्मत्वे सत्यपि तदाकारावभासस्यागंतुक
ज्ञानस्यावेद्यत्वादित्याशंक्याह अध्यक्षोहमितीति तत्त्वमस्यादिवाक्यादध्यक्षः परमात्मैवाहमिति यत्ज्ञानं जायते तेन नाध्यक्षस्य साक्षिणः परिणामस्त
स्याविशेषत्वात् स्वतः परतो वा निरवयवस्यासंगस्य विशेषासंभवात् किंतु बुद्धेरेव साभासाया विनिश्चयोऽवस्थाविशेषस्तत्पदार्थः एतदुक्तं भव
ति अनेकजन्मानुष्ठितयज्ञादिकृताहृष्टदोषनिवृत्तिसंस्कारवत्याः सगुणब्रह्मोपासनानिराकृतचांचल्यायाः संप्रतं विवेकवैराग्यशमादिगुण
संस्कृतायाः पदार्थद्वयपरिशोधनज्ञानाहितदृढसंस्कारायाश्च बुद्धेस्तत्त्वमस्यादिवाक्यश्रवणसमनंतरं शोधितपदार्थगतकल्पितभेदांशतिरो

अध्यक्षोहमिति ज्ञानं बुद्धेरेव विनिश्चयः नाध्यक्षस्याविशेषत्वान्न तस्यास्ति परीणतः ५९

धानेनाखंडाकाराकारितावस्था जायते तस्यां प्रतिबिंबितश्चिदात्मा तादृग्वृत्त्यविविक्ताकारेणाहमिति परामृश्यते ततो विविक्ताकारमेवोपाध्यंशा
पोहेन स्वमेव रूपं ब्रह्मेति प्रतिपद्यत इति न तस्मिन्कोपि विशेष उपजायत इति चिदात्मनः परिणामाभ्युपगमे परिणामिनश्चिन्नत्ववत्त्वान्य
वेद्यत्वनियमादात्मनोप्यन्यः साक्षी कल्प्येत तदनुपपन्नमनवस्थानादप्रमाणकत्वाच्चेत्यभिप्रेत्याह न तस्यास्ति परिणतिरिति ५९

यद्यप्येवमंतःकरणस्यैव ज्ञानाकारपरिणामस्तथापि तस्य न ज्ञानफलभागिता किं त्वात्मन एवेत्यभिप्रेत्याहं कर्तुः फलसंबंधे दोषमाह कर्त्ता चेदिति
१५१ कर्त्ताविकारिणा चेदहं मुक्त इति मुक्तताऽनुभूयेत तदा नाहं कर्त्तेति कर्तृत्वोपमर्द्देन सुखदुःखविनिर्मोकोऽसंबंधस्तस्मिन्नुत्पद्यते कर्तुः सुखादिम
त्वान्न भवविरोधादित्यर्थः कर्तुरपि क्रियया सह तदा विलीयमानत्वान्न तस्य फलसंबंध इति भावः ५९ आत्मन्यपि कथं फलसंबंधस्तस्य कूट
स्थनित्यत्वादित्याशंक्य तत्त्वज्ञानोदयानंतरीयकतया बाध्यमानाध्यस्तानात्मसंभेदावभासस्य फलत्वोपचारात्तस्य चात्मन्येवोपपत्तेरित्यभिप्रे
त्याह देहादाविति दुःखीत्युपलक्षणं सुखी कृशः स्थूलः कामी क्रोधीत्यादेः कुंडलस्य स्वसंबंधित्वाभिमानकृतेन तत्संयोगवियोगयोः सुखदुःखे

कर्त्ता चेद्देहमित्येवमनुभूयेत मुक्तता सुखदुःखविनिर्मोको नाहं कर्त्तेति युज्यते ६० देहादावभिमानी
स्त्रीदुःखीति प्रत्ययो ध्रुवं कुंडलिप्रत्ययो यद्वत्प्रत्यगात्माभिमानिना बाध्यते प्रत्ययेनेह विवेकेनाविवेक
वान् ६१

यद्वदिति दृष्टांतार्थः एवं बाध्यस्याध्यस्तत्वमुक्त्वा तस्य बाधमाह प्रत्यगात्माभिमानिनेति अविवेकवानाभिमानिकप्रत्ययो विवेकेन राम
प्रत्यगात्माभिमानिना शुद्धत्वंपदार्थात्माभिमानिना प्रत्ययेन बाध्यत इत्यन्वयः प्रत्यगात्माभिगाभिनेति पाठांतरं सुगमं अत्र प्राग्व १५१
द्वैना ई नसह गणानपेहरद्वमहं मेकीकृत्य ६१

अविवेकवताविवेकीप्रत्ययः कस्मान्नबाध्यतेविरोधस्यसमत्वादित्यतआह विपर्यासइति वैपरीत्येप्रमाणस्याप्रमाणतापातात्सर्वमसदंतं
शून्यांतंस्यात् प्रामाणिकस्यार्थस्यासत्वेप्रतिभासस्यनिरालंबनत्वापत्तौनिरवधिकोबाधइतिशून्यांततापसंगइत्यर्थः अप्रमहोप्यकः ६२
विवेकेनाविवेकबाधोभवतीतिपूर्वमुक्तंप्रपंचयतिदाहछेदेति दाहादिदेहोपघातनिमित्तंहिदुःखमनुभूयतेनान्यथातत्तुदेहाभिमाननिबं
धनमन्यथात्वतुप्रावप्रसंगादात्माचदेहादेरन्यइतिप्रमाणसिद्धमतोन्यगतदाहादिनान्यस्यदुःखेऽतिप्रसंगादध्यासनिबंधनंदुःखमहम

विपर्यासेऽसदंतंस्यात्प्रमाणस्याप्रमाणतः ६२ दाहछेदविनाशेषुदुःखित्वंनान्यथात्मनः नैव
ह्यन्यस्यदाहादावन्योदुःखीभवेत्क्वचित् ६३ अस्पर्शत्वाददेहत्वान्नाहंदाह्योयतःसदा तस्मान्नि
ष्याभिमानोत्थंम्नेतुद्वेमतिर्यथा ६४ कुंडल्यहमितिह्येतद्धाध्येनैवविवेकिना दुःखीतिप्रत्ययस्त
द्वत्केवलाहंधियासदा ६५

स्मीतिज्ञानमित्यर्थः ६३ आत्मनःस्वतोदाहादिसंबंधाभावेप्रमाणमाह अस्पर्शत्वादिति फलितंसदृष्टांसदृष्टांतमुपसंहरतितस्मादि
ति ६४ प्रागुक्तंदृष्टांतंविवृणावविवेकिप्रत्ययेनैवाविवेकीबाध्यतइत्युपपादितमुपसंहरतिकुंडलीति केवलेशुद्धेब्रह्मरूपेवाहंधीः
केवलाहंधीस्तयेतिविग्रहः ६५

नन्वदुःखिनो मोक्षोपदेशाद्युपपत्तेरात्मनोपि दुःखित्वमवगम्यते ततः स्तन्निरुद्धये शक्तिमत्त्वं गम्यते ततो नान्यगतेन निमित्तेनैव दुःखी किं तु स्व
१५२ तोपीति हेतुरुपपादाद्व्यपि शक्तिमत्त्वमनिवारितमित्तिचेत्तत्राह सिद्धे इति कस्याचिदप्यवस्थायामात्मनः केवलस्य दुःखित्वप्रमाता सिद्धं स्यान्न
घासति हेतुं साद्दृश्यानन्तु ध्यानहेतुनिर्दुःखित्वशक्तिः कल्पेन न तु साकल्पेन तु शक्यते दुःखदर्शनस्यान्यथोपपत्तेरित्याह मिथ्येति अत्रह्य
न्वयव्यतिरेकौ दर्शितौ तेन मिथ्याभिमानेनैव धनत्वेनार्थोपादनन्तमो दुःखित्वानुभव इति योजना अर्थादनुपपत्त्यापन दुःखित्व

सिद्धे दुःखित्वे दुःखं स्यात्तच्छक्ति[illegible]स्यात्मनः मिथ्याभिमानतो दुःखितेनार्थोपादनं च मे ६६
अस्पर्शेपि यथा स्पर्शमिच चलनादि च अविवेकात्तथा दुःखमानसं चात्मनीष्यते ६७

शक्तिमत्त्वापादनं तत्स्वक्षमः समर्थो यमनुभवत्यन्यथोपपत्तिरित्यर्थः तथा च यथादर्शनं दुःखशक्तिमत्त्वमपि मिथ्यैवेति भाव
ः ६६ तामेवान्यथोपपत्तिं साधयन्नस्पर्शेपीति निरवयवस्य पूर्तस्यात्मनो यथा स्पर्शचलनादिदर्शनमविवेकादेव आदि राम
शब्दाच्छेदनोपवेशनादिग्रहः तेन चकारात्परिच्छिन्नत्वाभिमानः तथा मानसं मनःकल्पितं च दुःखमविवेकादेवात्मा १५२
त्मनीष्यत इत्यर्थः ६७

+ चलनादिवत्॥ यस्मात्स्थूलदेहविवेकात्मज्ञानेन चलनादिस्थूलदेहसंबंधिमिथ्याध्यस्तमात्मनि निवर्त्यते॥ तथा सूक्ष्मदेहाविवेकनिमित्तं दुःखं ब्रह्मात्म
ज्ञानेन समूलं निवर्त्यत इत्यर्थः॥१

वा
अविवेकादेवदुःखदर्शनमात्मनीत्येतदन्वयव्यतिरेकाभ्यामुपपादयति विवेकेति विवेकरूपयात्मधियेत्यर्थः ६७ अनिश्चितोप्यविवेकस्वभावात्मनस्थूल
तीति निमित्तमुक्त्वा नैमित्तिकमाह तदेति नैष्कर्म्ये सति तस्यात्मनः ततदुःखं नैवेत्यन्वयः उपसंहरति प्रत्यगात्मनि तस्मादिति ६८ एवंयुक्तितः प्रत्यगा
त्मनो निर्दुःखत्वाभावे सिद्धे वाक्यादेव ब्रह्मास्मीत्यपरोक्षं ज्ञानं भवतीत्याह त्वंसतोरिति सार्द्धेन इदं बौद्धसमखंडार्थनिष्ठं भवेत् त्वंसतोस्त्वंसत्पदयोस्तुल्य
नीडत्वादेकार्थवृत्तित्वान्नीलाश्ववदित्यन्वयार्थः नीलोश्व इति पदयोर्यद्यपि गुणगुणिरूपेणासंस्पृष्टार्थविषयत्वं तथाप्येकद्रव्यपर्यवसायित्वेन

विवेकात्मधियादुःखं नुद्यते चलनादिवत् अविवेकस्वभावेन मनो गच्छत्यनिश्चितः ६७ तदातु दृश्यते दुःखं नैष्कर्म्ये नैवत
स्य तत् प्रत्यगात्मनि तस्मान्न तद्दुःखं नैवोपपद्यते ६८ त्वंसतोस्तुल्यनीडत्वान्नीलाश्ववदिदं भवेत् निर्दुःखवाचिना यो
गात्त्वंशब्दस्य तदर्थता प्रत्यगात्माभिधानेन तच्छब्दस्य युतेस्तथा ७० दशमस्त्वमसीत्येवं वाक्यस्या प्रत्यगात्मनि ७१

सामानाधिकरण्ये दृष्टांत इति द्रष्टव्यं कथं पदयोरेकार्थनिष्ठत्वं तद्दर्शयति निर्दुःखवाचिना सच्छब्देन योगात्सामानाधिकरण्यात् त्वंशब्दस्य त
दर्थता सच्छब्दार्थता तथा प्रत्यगात्माभिधानेन त्वंशब्देन तच्छब्दस्य सच्छब्दस्य युतेर्योगात्सामानाधिकरण्यात्परोक्षात्मता सिद्धेतीत्यर्थः ७०
वाक्यमप्यपरोक्षवस्तुप्रतिपादकमित्यत्र दृष्टांतमाह दशमस्त्वमसीति ७१

निर्दुःखेति

ननुतत्वंपदयोरेकार्थनिष्ठत्वेपर्यायत्वापत्तौसहप्रयोगायोग इतिचेन्नास्तिपर्यायत्वंप्रवृत्तिनिमित्तभेदादित्यभिप्रेत्याह स्वार्थस्येति प्रत्यक्त्वपरोक्ष
त्वलक्षणस्वार्थस्यस्ववाच्यार्थस्याप्रहाणेनापरित्यागेनैवत्वंसद्भावेविशिष्टार्थसमर्पकौ अतोवा च्यमेवात्रपर्यायत्वंत्वपर्थः एवंतर्ह्यखण्डार्थत्वं
१५३ नस्यादित्याशंक्याह प्रत्यगात्मेति प्रत्यगात्मनः शुद्धसाक्षिणोवगतिस्तत्वावगतिरंतोवसानंययोस्तौतथाभूयमाणौपदयोः सामानाधिकरण्यमि
थोविरुद्धवाच्यार्थसंसर्गेऽन्यतरविशिष्टेन्यतरेवापर्यवसानमगत्वाकल्पितभेदपरामर्शेनलक्षणयाविगतपरोक्षत्वापरोक्षत्वांशस्वरूपमात्रेसो
यंदेवदत्तइतिवदखण्डेपर्यवस्यतीतिप्रत्यगात्मावगत्यंतौतत्त्वंशब्दावुक्तावित्यर्थः ननुतत्त्वंपदयोःसामानाधिकरण्यमंशांशित्वादिविषयतयाप्युप धं
पत्स्यतेकिमित्यखण्डार्थतापक्षमात्रस्यतआह नान्योर्थइति अतोस्माद्युक्तादखण्डादर्थादेकरसाद्विरोधी अन्योर्थोनवेदान्तैःप्रतिपाद्यतइत्यर्थः

स्वार्थस्याप्रहाणेनविशिष्टार्थसमर्पकौ प्रत्यगात्मावगत्यंतौनान्योर्थोर्थाद्विरोधतः ७२

तदिदंविवक्षितंतत्त्वमर्थयोःहुवर्तौकुण्डलमितिवन्नकार्यकारणभावेनसंसर्गःसंभवति अन्यत्रास्मात्कृताकृतादितिश्रुतिविरोधात् नापिभूम्युष
रादिवदंशांशिभावेननिष्कलंनिःक्रियमित्यादिकूटस्थैकरसप्रतिपादकश्रुतिविरोधात् नापिगुणगुणिभावेननीलमुत्पलमितिवन्निर्गुणत्वश्रु
तिविरोधात्नापिजातिव्यक्तिविशिष्टस्वरूपादिप्रकारेणसंसर्गःएकमेवाद्वितीयमसंगोह्ययंपुरुषइत्यादिश्रुतिविरोधात्तस्माद्विशिष्टसंसर्गविरो ३ राम
धिवस्तुमात्रनिष्ठत्वेवाक्यस्याखण्डार्थत्वमिहविवक्षितंतथाचविमतमखण्डार्थनिष्ठमुपाधिपरामर्शमंतरेणाविभाव्यमानभेदवस्तुनिष्ठत्वा १५३
त्सोयंदेवदत्तःखंछिद्रमित्यादिवाक्यवदिति ७२

नन्वेवमखंडार्थनिष्ठत्वेपिवाक्यस्यनतावन्मात्रेपर्यवसानंयुक्तंवोधमात्रात्फलासिद्धेर्यत्नांतरमेष्टव्यमितिक्रियापर्यवसायितावाक्यस्यान्नकल्पनइत्याशं
क्य मुमुक्षोर्जिज्ञासितमर्थंविहायार्थांतरपरत्वकल्पनेऽश्रुतमितार्थपरत्वेनवाक्यस्याप्रामाण्यप्रसंगान्नैवमित्यभिप्रेत्यज्ञानमात्रादेवफलसिद्धिं
दृष्टांतेनोपपादयति नवबुद्धीत्यादिना नवैवप्रवयमितिबुद्ध्याभ्रमरूपयाऽपहारात्तिरोहितत्वात्तिरोधानमात्रनिवृत्तिफलत्वनयादशत्वसंख्यापूरणात्स्वात्मा
नमपश्यंज्ञातुमेवेच्छेन्नतुकिंचित्कर्तुमित्यर्थः यथायंदशांतस्तथातनोमुमुक्षुरपितिस्वमात्मानंकेनापिहेतुनाविस्मृतंज्ञातुमेवेच्छतिभ्रमनिवृत्तिफ
लापेक्षत्वात्क्रियापरत्वकल्पनानावकाशंलभतइत्यर्थः ७२ प्रकृतस्यात्मनःकेनापहारःकृतइत्यपेक्षायांदार्ष्टांतिकंविवृण्वंस्तदाहाविद्या

नवबुद्ध्यपहाराद्धिस्वात्मानंदशपूरणं अपश्यञ्ज्ञातुमेवेच्छेत्स्वमात्मानंजनस्तथा ७३
अविद्याबद्धचक्षुष्ट्वात्कामापहृतधीःसदा विविक्तंदृशिमात्मानंनेक्षतेदशमंयथा ७४

बद्धेति अविद्याऽनाद्यज्ञानंतयाबद्धमाच्छादितंचक्षुर्विवेकदर्शनंयस्यसजीवस्तथातस्यभावस्तत्त्वंतस्मादितिविग्रहः आवरणमुक्त्वाविक्षेपमा
ह कामापहृतधीरितिवहिर्विक्षिप्तचित्तइत्यर्थः सदासर्वदादृश्यसंघाताद्धिविविक्तमेवपरमार्थदृगात्मतत्त्वंनेक्षतेनपश्यतियथानवबुद्ध्यपहृ
तस्वात्मतत्त्वोनवस्वेवविक्षिप्तचित्तोदशमंनवभ्योवस्तुतोविविक्तंनेक्षतेतथेत्यर्थः ७४

कथं तर्ह्यात्मानं जानातीत्यपेक्षायां शास्त्राचार्योपदेशान्निमित्तमात्राज्जानातीति सदृष्टांतमाह दशमस्त्वमसीत्येवमिति कृत्स्नांतः करोतीत्वाम
१५४ हंकर्तुरविविक्तत्वाद्दितामित्यर्थः ७५ ननुपच्छद्वयोगः प्राथम्यमित्याद्युद्देश्यलक्षणं तच्छब्दस्यैवकारश्रुत्याद्युपादेयलक्षणमिति न्यायेन
प्रथमनिर्दिष्टमुद्देश्यं चरमनिर्दिष्टमुपादेयमिति नियमेन वक्तव्यः इह नोपपद्यते यतस्तत्त्वमित्यत्र तदर्थस्य प्राथम्यं श्रूयते अहं ब्रह्मास्मीत्यत्र
त्वमर्थस्य एवं तत्र तत्रान्यथान्यथाश्रूयमाणत्वात्कथमिहोद्देश्यविधेयनियम इत्याशंक्यावेदपदानामर्थवशादेव संबंधो नपाठवशादाहरपा

दशमस्त्वमसीत्येवं तत्त्वमस्यादिवाक्यतः स्वमात्मानं विजानाति कृत्स्नांतःकरोत्कृतां ७५
इदं पूर्वमिदं पश्चात्पदं वाक्यं भवेदिति नियमो नैव वेदेऽस्ति पदसांगत्यमर्थतः ७६

तं पात्रमाहरेति वेदार्थनियमं विवक्षन्नाह इदं पूर्वमिति पाठस्यानियमे विप्रसिद्धमुद्दिश्यानूद्याप्रसिद्धो बोध्यत इति न्यायादिदं प्रसिद्धा
र्थकत्वमहमादिपदं पूर्वमिदमप्रसिद्धार्थकं ब्रह्मसदादिपदं पश्चादित्येवं पदं विन्यस्तं वाक्यं भवेदित्यन्वयव्यतिरेकाभ्यामवधार्य ततो राम
वाक्यार्थबोधनं त्वमर्थस्य तदर्थात्मत्वप्रतिपत्तिरूपं भवेदित्यर्थः ७६ १५४

उक्तेर्थे हेतुमाह वाक्येहीति ७७ आचार्येणाब्रह्मास्मीत्युपदिष्टः खलु शिष्यः कथमहं ब्रह्मास्मीति पृच्छति तदन्यथानुपपत्त्या वाक्यस्याज्ञानबोधनन
न स्वसमर्थेन भवतीति गम्यते तदुत्थां शंकामाह यदानित्येष्विति नित्येष्वर्थाव्यभिचारिष्वित्यर्थः ७८ पदार्थतत्वानभिज्ञस्यैव प्रश्नो घटत इत्युक्तस्यैव प
त्पत्त्वयेति अन्वयव्यतिरेकोक्तिशब्देनावांतरवाक्यैस्तदुक्तलेशैस्तर्कै रात्मानात्मविवेचनमुच्यते पदार्थस्मृतिः पदोपस्थापित वाक्यार्थज्ञा
नकारणमित्यत्र लोकप्रसिद्धिमाह स्मृत्यभावइति ७९ तत्रापि त्वंपदार्थविवेकेन्नैव यत्नः कार्यः इत्यभिप्रेत्याह तत्त्वमस्यादीतित्रिभिः श्लो

|८०|

वाक्ये हि श्रूयमाणानां पदानामर्थसंस्मृतिः ॥ अन्वयव्यतिरेकाभ्यां ततो वाक्यार्थबोधनं ७७ यदा नित्येषु वाक्ये
षु पदार्थस्तु विविच्यते ॥ वाक्यार्थज्ञानसंक्रान्त्यै तदा प्रश्नो न युज्यते ॥ ७८ अन्वयव्यतिरेकोक्तिः पदार्थस्मरणा
य तु ॥ स्मृत्यभावेन वाक्यार्थो ज्ञातुं शक्यो हि केनचित् ७९ तत्त्वमस्यादिवाक्येषु त्वंपदार्थविवेकतः ॥ व्युत्पन्नेनैव
वाक्यार्थो नित्यमुक्तोहमित्यतः ॥ ८० अन्वयव्यतिरेकोक्तिस्तद्विवेकाय नान्यथा ॥ त्वंपदार्थविवेके हि पाणिस्थापित
बिल्ववत् ८१ वाक्यार्थो व्यज्यते चैवं केवलोहंपदार्थतः ॥ दुःखीत्येतदपोहेन प्रत्यगात्मविनिश्चयात् ८२

कैः द्विचारप्रयोजनं तदुपपत्त्यन्वयव्यतिरेकोक्तिरिति अत इति पूर्वश्लोकगतं पदमस्मिन्योज्यं तद्विवेकाय त्वंपदार्थविविक्तायेत्यर्थः पदार्थविवे
कफलस्य दर्शयति त्वंपदार्थविवेके हीति केवलो भेदसंसर्गशून्यो वाक्यार्थ इत्यन्वयः तत्र हेतुमाह अहंपदार्थतो दुःखीत्येतदपोहेनेति अह
मिति प्रतीयमानात्पदार्थाद् दुःखीत्येतस्येदमंशस्यापोहेन प्रत्यगात्मनः सच्चिदाणो विशेषित्तनिश्चयादित्यर्थः ८२

एवमुक्तेन न्यायेन वाक्यादेवापरोक्षात्वंउब्रह्मात्मज्ञानमुपपाद्येदानीं पूर्ववादिकल्पनाया निर्मूलतामाह तत्रैवमिति ८३ यथाव्याख्यानं वाक्य
१५५ स्य यथाश्रुतार्थसंभवति श्रुतहान्यादिकल्पनमनवकाशमित्युक्तं प्रत्यक्षादिविरुद्धार्थे वाक्यस्य वाधदर्शनादिति पूर्ववादीदृष्टांतेन शंकते
प्रत्यक्षादीनीति यथा कृष्णलान् श्रपयेदिति कृष्णलशब्दवाच्यसुवर्णमयकणेषु श्रुतो विपाकः प्रत्यक्षेण वाध्यते तेषु विक्लित्तेरदर्शनात् क्लिं
न्नहश्चार्थ एव संस्कारस्तत्र पाकक्रियासाध्यः एवमिहाप्यखंडार्थता वाक्यस्य प्रत्यक्षादौ निश्रमाणानि भेदग्राहकाणि वाध्येरन् श्रुतेर्यात्मनो
ब्रह्मत्वे पूर्णत्वादर्शनादतः प्रसंख्यानेनात्मसंस्कारार्थता वाक्यस्येति चेन्नेत्युत्तरमाह वाक्यादीति भवेदेवं यदि कर्तृत्वादिप्रतिभासस्य प्रत्यक्षस्य

तत्रैवं संभवत्यर्थे श्रुतहानाश्रुतार्थधीः नैव कल्पयितुं युक्ता यद्वाक्यार्थकोविदैः ८३
प्रत्यक्षादीनि वाध्येरन् कृष्णलादिषु पाकवत् अखंडज्ञानविभेरेनैः कथं स्याद्वाक्यवाधनं ८४

मायानास्याचैन दक्षिणस्थाहंकाराद्युपरागमंतरेणास्वतन्त्र्यात्मनिदुःखित्वादिधर्मसंबंधस्य निराकृतत्वादतः प्रत्यक्षाद्याभासैरेतैः प्र राम
माणाभूतवाक्यवाधनं कथं स्यान्नैव स्यादित्यर्थः यथा त्वेष्यात्वेकृष्णलं तु होनीत्विवड्हजज्ञानसंस्कृतस्यात्मनो न्यत्रविनियोगादर्शना १५५
दिह न संस्कारार्थत्वं वाक्यस्योपपद्यते सद्योब्रह्मत्वादर्शनं तु पदार्थमतिदार्ढ्याभावादित्युक्तमेवेति भावः ८४

नन्वेवंविरोधितात्वद्वाक्यप्रामाण्याभावेपिस्यादतस्तन्निवृत्त्यर्थमप्रामाण्यंवाक्यस्येतिपूर्ववादीशंकते दुःखमस्मीतिसतीति दुःखित्वादिभानस्योक्त-
रीत्याप्रत्यक्षाद्याभासत्वेपिदुःखमस्मीतिविरोधीर्गंधिनिज्ञानेसतिवाक्यान्निर्दुःखीतिविज्ञानंनजायतइतियोजना पूर्वसिद्धतयाप्रत्यक्षस्यासंजातविरोधि-
त्वेनप्राबल्यमस्तीत्यभिप्रायः दूषयतिनव्यभिचारतइति ८५ तमेवव्यभिचारमाह स्वप्नइति स्वप्नेदाहच्छेदादिहेतुतोनिमित्तादहंदुःख्यासंतदा
प्तोपदेशान्निर्दुःखोभवमित्यनुभवसिद्धत्वात्तत्तन्मधर्मोदुःखित्वादीत्यर्थः। तत्रपूर्वापरनिवेशमनुवदति तत्कालेति ८६ तथापिदुःखमात्मव्यभि-
चारीत्याह समाप्तेरीति दुःखस्यसमाप्तेरूर्ध्वंतद्बाधोदुःखबाधस्तेनैवंप्राक्पूर्वमपिदुःखेनाभूदितितद्बाधरूप्यतामस्योदृश्यमानस्यस्थितिरू-

दुःखमस्मीतिसतिज्ञानेनिर्दुःखीतिनजायते प्रत्यक्षादिनिमित्तेपिवाक्यत्रव्यभिचारतः ८५
स्वप्नेदुःखमहंघोरात्सदाहच्छेदादिहेतुतः तत्कालभाविभिर्वाक्यैर्नवाधः क्रियतेयदि ८६
समाप्तेस्तर्हिदुःखस्यप्राक्तद्बाधःप्रसज्यतां नहिदुःखस्यसत्तानोभ्रांतेर्वादृश्यतेक्वचित् ८७

प्यवाग्मिथ्यात्वाव्यभिचारादित्यर्थः कुतोवाधरूप्यतइत्यत्रहेतुमाह नहीति भ्रांतेर्वेतिदृष्टांतार्थोवाशब्दः तस्माद्दुःखित्वादेरात्म-
निसतिव्यभिचारादागंतुकस्यचाद्वविकारितयात्मन्यनुपपत्तेरारोपितत्वसिद्धौप्रमाणान्ताजंघ्रुतत्वतानभिवर्जनाद्दिवाधनेनदुः-
खित्वादिवाधनंकुर्वदेववाक्यादुदेतीति नवाक्यस्याप्रामाण्यशंकावकाशइतितात्पर्यार्थः ॥८७॥

१५६

इतस्ववाक्यं न प्रत्यक्षात् दुर्बलमित्याह प्रत्यगात्मन इति स्पष्टार्थः ॥८८॥ विस्तरेणोक्तस्यार्थस्य संक्षिप्याह श्लोकचतुष्टयेन नित्यमुक्तत्वेना

प्रत्यगात्मन आत्मत्वं दुःख्यस्मीत्यस्य बाधया दशमं नवमस्येव वेद्यं चेद्वि
हृता ॥८८॥ नित्यमुक्तत्वविज्ञानं वाक्याद्भवति नान्यतः वाक्यार्थस्यापि
विज्ञानं पदार्थस्मृतिपूर्वकं ॥८९॥ अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रु
वं एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ॥९०॥ सदेवेत्यादिवाक्येभ्यः
प्रमा स्फुटतरा भवेत् दशमस्त्वमसीत्यस्माद्यथैवं प्रत्यगात्मनि ॥९१॥ प्रबोधे
न यथा स्वाप्नं सर्वदुःखं निवर्तते प्रत्यगात्मधिया तद्वद्दुःखित्वं सर्वदात्मनः ॥९२॥

दिना प्रमा स्फुटतरा अपरोक्षा निगदव्याख्याताः श्लोकाः ॥८९॥

राम
१५६

पुरोक्तकृषाणालादियाकदर्थांतवे घम्पंसकुटयति कृषाणालादाविति प्रमाया अजन्मपत्र कृषाणालादौन घुस्पते यतस्तत्रान्यार्थप्रमाऽदृष्टार्थ
त्पाकार्याऽस्फुटत्वतोऽस्फुटत्वात्कृषाणालानामितियोजना कृषाणालपाके पुरुषस्यानैश्वर्याद शक्यार्थत्वनियोगानुपपत्तेरित्यर्थः प्रकृतेनत
थाविधोविरोधोऽस्तीत्याहतत्वमिति ९२ तत्वमस्यादिवाक्येषु त्वंपदार्थाविविक्तं व्युत्पत्तिनैववाक्यार्थः इत्युक्तं प्रपंचयंस्त्वंपदार्थविविच
नेयत्वाधिकंसूचयतिवाक्येतत्वमिति पदत्रयात्मकेस्मिन्वाक्येतत्पदमसिपदं चेतिद्वयंज्ञातार्थप्रसिद्धार्थं त्वमर्थस्त्वंपदार्थोऽसत्यक्ता

कृषालादौ प्रमाजन्मतदन्यार्थास्फुटत्वतः तत्त्वमस्यादिवाक्येषु नत्वेवमविरोधतः ९३ वाक्येतत्वमसीत्यस्मि
न्ज्ञातार्थंतदसिद्धयं त्वमर्थेसत्यसाहाय्याद्वाक्यंनोत्पादयेत्प्रमां ९४ त्वमोस्तु त्वनीज्ञार्थमसीत्येतत्पदंभवेत् ९५
न

तेऽसाहाय्यात्सहायशून्यत्वात्सहकारिविरहाद्वाक्यमेतत्प्रमांनोत्पादयेदपरोक्षनिश्चयं नाप्नोतीत्यर्थः ९५ असिपदस्योपयो
गमाहतत्वमोरिति त्वेत्यनीज्ञार्थंकुरु चिंतयेत्यादिक्रियाकांक्षानिवारणेन सामानाधिकरण्यसिद्धौ वाक्ये वनत्वस्पष्टीकरणार्थमस्य
स्मीत्यादिपदमुपयुज्यत इत्यर्थः ९५

१५७ निराकांक्षे सामानाधिकरण्ये सति को लाभ इत्यपेक्षायामाह तद्बुद्धेरिति प्रत्यगात्मार्थोपस्थापकप्रत्यगात्मार्थस्तद्बुद्धेः स्यात्त्वंपदेन सामानाधिकरण्या
द्वितीयोऽर्थः तथा त्वमस्त्वंपदस्य तद्बुद्ध्यर्थोऽर्थो भवेत्त्वंपदे न सामानाधिकरण्यादिति योजना तदा वाक्ये को लाभ इतितमाह दुःखित्वेति उभावपि प्र
त्यक्त्वौ त्वमर्थस्य दुःखित्वांशं तदर्थस्यानात्मत्वं परोक्षत्वांशं च वारयेतामित्यर्थः ९६ एवं वाक्यार्थवर्णने द्वितीयत्वपरोक्षत्वविरोधः सिध्यतीत्य
भिप्रेत्योपसंहरत्येवं चेति नेति नेतिवाक्यसिद्धमर्थमित्यर्थः ९७ पूर्वपक्षोक्तहान्यपक्षतकल्पना निष्प्रमाणिकेत्युक्तमुपसंहरति एवमिति
कथंशब्द आक्षेपार्थः ९७ यस्मादेवं विचार्यमाणे क्रियाया अनवकाशस्तस्मादित्युपसंहरति तस्मादिति आदौ तत्त्वमसीति प्रथमोपदेशे
मध्ये पदार्थपरिशोधनान्वयव्यतिरेकग्रहणकालेऽन्ते च निर्विचिकित्सब्रह्मानुभवकाले कुत्रापि न तत्त्वुष्टानकल्पनं तत्तदर्थप्रतिपत्तिविरोधि

तद्बुद्धेः प्रत्यगात्मार्थस्तद्बुद्ध्यर्थस्त्वमस्तथा दुःखित्वादप्रत्यगात्मत्वं वारयेतामुभावपि ९६ एवं च नेति
नेत्यर्थागमपेतं परस्परं एवं तत्त्वमसीत्यस्य गम्यमाने फले कथं अप्रमाणत्वमस्यान्या क्रियापेक्ष्यत्वमुच्य
ते ९७ तस्मादाद्यन्तमध्येषु कुर्वित्यत्र द्विरोधतः नकल्प्यामोऽकृतत्वाच्च कृत्यागोऽप्यनर्थकः ९८

यतोऽतो न कल्प्यामः नकल्पयामः क्रियामिति शेषः किं चाऽकृतत्वादपि न कल्पयामः न केवलमकृतत्वात्क्रियायास्त्यागोऽप्यकृतत्या
गस्यानर्थकत्वादपीत्याह कृतेति नहि तत्त्वमर्थयोः स्वरूपमप्राप्तं विततीयतया विधातुं शक्यते तत्प्राप्तेश्च स्वतोऽसंभवात्तस्मादेव राम
तत्प्राप्तिमाशंसतो वाक्यभेदादिदोषप्राप्तिरपरिहार्या स्यात् न तत्त्वमोस्तत्वसिद्धिमनपेक्ष्यैव यथा कथंचिच्चिंतनविधानाभ्युपगमे १५७
चिंत्यब्रह्मसाक्षात्कारस्याप्रमात्वादविद्यानिवृत्तिफलासिद्धेर्निरर्थकः प्रसंख्यानविधिरिति भावः ९८

उक्तार्थानभिज्ञः पुनराक्षिपति यथेति भुंक्ते र्भोजनात्तृप्तिः फलं वाक्याद्वाक्यार्थज्ञानमात्रान्न गम्यते मोक्षफलमिति शेषः तस्माद्यथा गोशब्दतो गोम
यात्पायसी क्रिया पायसकरणं नोपपद्यते तस्मात् साधनत्वात्तद्वद्वाक्यस्य विध्यतिर्विधारणामर्थतोवधारणं न वाक्यार्थापरोक्षसाधनमित्यर्थः १९९
उत्सर्गतो वाक्यं नार्थापरोक्षार्थमित्येतदंगीकुर्वन्प्रकृते तस्यापवादकमाह सिद्धोंतीसत्यमिति प्रत्यगात्मनि तु नैवमध्रुवमनिश्चितं किंतु सं
ख्याप्राप्तिवद्दशमसंख्याप्राप्तिवदपरोक्षज्ञानसाधनत्वं वाक्यस्य ध्रुवमेवेत्यर्थः २०० कुत इत्यपेक्षायां स्वतोऽपरोक्षप्रत्यगात्मन एव ब्रह्म

यथा तु भूयते तृप्तिर्भुंक्ते र्वाक्यान्न गम्यते वाक्यस्य विध्यतिस्तद्वद्गोशब्दात्पायसी क्रिया १९९
सत्यमेवमनात्मार्थे वाक्यात्पारोक्ष्यबोधनं प्रत्यगात्मनि नैवं तु दशसंख्याप्राप्तिवद्ध्रुवम् २००
स्वसंवेद्यत्वपर्यायः स्वप्रमाणक इष्यतो निवृत्तावहमः सिद्धः स्वात्मनोऽनुभवस्तु नः २०१

त्वोपदेशादित्याह स्वसंवेद्यत्वेति स्वप्रमाणकः प्रमाणानिरपेक्षप्रकाशमानतास्वभावश्चात्मेष्यतो स्वयंज्योतिष्ट्वादिश्रुतेरित्यर्थः
तथा च वाक्याद्देहे मोहंकारस्य ब्रह्मभेदकस्य निवृत्तौ स्वात्मनोऽनुभवस्तु सिद्ध एव नोऽस्माकमिति न किंचिदनुपपन्नमित्यर्थः विमतं
परोक्षार्थज्ञानजनकं वाक्यत्वात् समनवदित्यादिप्रयोगेष्वनात्मविषयत्वमुपाधिर्दशमस्त्वमसीत्यादौ व्यभिचारश्चेत्युक्तं भवति २०१

अहंदुःखानुभवविरोधशंकानकार्यदुःखस्यव्यभिचारित्वेनात्मधर्मत्वस्यनिरस्तत्वाद्विषयधर्मत्वाच्चेत्यभिप्रेत्याहबुद्धीनामिति दुःख्यहमस्मी
१५८ तिहंदुःखधर्मवत्त्वेनाहंकर्तुरेवानुभवात्तस्यविषयभूतंदुःखंनबुद्धित्वाश्रयाहंकर्तृसाक्षिणआत्मनोधर्मःसंभवतीत्यर्थः १ सर्वधर्मरहि
तस्यप्रत्यगात्मकथंतस्यानुभवइत्यतआहदृशिरेवेतिदृशेरनुभवस्वभावत्वात्तस्यस्वरूपेकोनामान्योनुभवोपेक्ष्यतेइत्यर्थः ॥ नहिकथं

बुद्धीनांविषयोदुःखंनायस्यविषयामताः कुतोऽस्यदुःखसंबंधोदृशेःस्यात्प्रत्यगात्मनः २
दृशिरेवानुभूयेतस्वेनैवानुभवात्मना तदाभासतयाजन्मबुद्धेर्योप्यनुभवःस्मृतः ३ अश
नायादिनिर्मुक्तःसिद्धोमोक्षस्त्वमेवसः श्रोतव्यादिनवेत्त्येतद्विरुद्धंकथमुच्यते ४

तस्यविशेषानुभवइतितत्स्वरूपमाहतदाभासतयेतिचैतन्याभासव्याप्ततयाधियोजन्मैवात्मनआगंतुकोनुभवःस्मृतोविद्भिरित्यर्थ
ः ३ प्रकारांतरेणाप्रसंख्यानप्राप्तिंनिराकुरोतिअशनायादीति सर्वसंसारविनिर्मुक्तोनित्यसिद्धोमोक्षोब्रह्मत्वमेवेत्याचार्येणोपदिशेस
तिनवश्रोतव्याद्यनुष्ठेयंविधानइतिकथंविरुद्धमुच्यतेनह्यविक्रियंब्रह्मत्वंकर्त्ता चेतिवचःप्रमाणंस्यादित्यर्थः ४ राम १५८

अथतत्त्वंसेत्स्यतीति विपरिणामउपदेशवाक्यस्याभ्युपेयतइतिशंकामनूद्यतत्रैकंसंधित्सतोऽपरंप्रच्यवतइति न्यायेनमोक्षानित्यत्वप्रसंगदोष
माहसेत्स्यतीति एवमुभयथाविरोधेसतिवचोवाक्यंनान्यथानविपरिणामवद्युक्तमित्यर्थः ५ ज्ञानस्यप्रसंख्यानवादोनुपपन्नइत्याहश्रोतृश्रोत
व्ययोरिति श्रोत्रादिभेदोयदीष्टःस्यात्तदेदंप्रसंख्यानंभवेत्कर्तृकर्मभेदाभावेकार्यानुपपत्तेरित्यर्थः अस्तुभेदइतिचेत्तत्राहेष्टार्थेति जीवस्यब्रह्म

सेत्स्यतीत्येववेत्तत्स्याद्ध्रुवणादितदप्यवेत् मोक्षस्यानित्यतैवंस्याद्विरोधेनान्यथावचः ५
श्रोतृश्रोतव्ययोर्भेदोयदीष्टःस्याद्भवेदिदं इष्टार्थकोपस्त्वेवंस्यान्नयुक्तंसर्वथावचः ६
सिद्धोमोक्षोहमित्येवज्ञात्वात्मानंभवेद्यदि चिकीर्षुर्यःसमूढात्माशास्त्रंचोत्सादयत्यपि ७
नहिसिद्धस्यकर्तृत्वंसकार्यस्यनसिद्धता उभयालंबनंकुर्वन्नात्मानंवंचयत्यसौ ८

भावोहीष्टार्थःसोन्यस्यान्यभावायोगाद्विहन्येतातःसर्वथावचोवाक्यंनयुक्तमयुक्तमप्रमाणमेवप्रसंख्यानपक्षेभवेदित्यर्थः ६ नयुक्तं
वचइत्येतत्प्रकटयतिसिद्धइतिउक्तप्रकारेणात्मानंज्ञात्वायोयदिचिकीर्षुर्भवेत्समूढात्मेत्यन्वयःउत्साद्यतुत्सादयतीत्यर्थः ७ मूढात्म
त्वंप्रकटयतिनहीति ८

नतुकिमित्यस्मान्निंदथास्मदभिप्रायमज्ञात्वैवेतिपूर्ववादीस्वाभिप्रायमाविष्करोति सिद्धोमोक्षस्त्वमिति मत्तुद्बोधात्मविज्ञानेप्रवृत्त्यर्थंवि
१५९ ड्ढ्वह्मरूपोमोक्षस्त्वमसीतिवस्तुमात्रकथनपरमिदंवाक्यंनतत्त्वेपर्यवसितमित्यर्थः ९ उक्तमेवविवृणोति कर्त्रेति १० वाक्यश्रवणानंत
रमेतव्यदति श्रुत्याकर्तव्यविधानादप्येवमेवाभ्युपेयमित्याह तद्विज्ञानायेति त्वमितिकर्तव्यमनद्यवस्तुगत्यात्वेसिद्धमोक्षब्रह्मरूपोस्यतस्त्वद्वि

सिद्धो मोक्षस्त्व मित्येतद्वस्तुमात्रंप्रदर्श्यते श्रोतुस्तथात्वविज्ञानेप्रवृत्तिः स्यात्कथंत्विति ९
कर्त्ताऽहं दुःख्यहमस्मीतिप्रत्यक्षेणानुभूयते कर्त्ताऽहं दुःखीचमाभूवमितियत्नोभवेन्नतः १०
घु नद्विज्ञानायगुर्वादिकर्त्तव्यं श्रुतिर्ब्रवीत कर्त्तव्याद्यनुवादेनसिद्धत्वानुभवायतु ११
निर्दुःखोनिःक्रियोऽकामःसिद्धोमोक्षोऽहमित्यपि गृहीत्वैवविरुद्धार्थमादध्यात्कथमेवसः १२

नापयतस्त्वितिवाक्यतात्पर्यमित्यर्थः १० नेयंकल्पनाश्रुत्यनुसारिणीतिसिद्धांतीदूषयति निर्दुःखइति निर्दुःखादिविशेषणोमोक्षोऽह
महमितिगृहीत्वापीत्यन्वयः वाक्याद्वाक्यार्थज्ञानेनजायतएवेतिनवक्तुमुचितमप्रामाण्यप्रसंगादनुभवविरोधाच्चतथाचोत्पन्नेज्ञाने राम
तद्विरुद्धप्रतिपत्तिर्नसंजाघटीतीत्यभिप्रायः १२ १५९

६

यद्विवाकादेव निर्दुःखादिलक्षणमोक्षात्मसाक्षात्कारः कथं तर्हि तदा तद्विरुद्धाकारानुभव इति एवं तर्हि सकाम इति अतः सकामत्वादिरूपाद्वि
परीतस्य मे ब्रह्मभूतस्येत्यर्थः १३ अन्यस्वभावस्य ततो ममान्यस्वभावानुभवः कथमित्यस्मिन्नर्थे सहृदुक्तवाक्यस्थं सः प्रश्नो घटते पुनस्तेन ने
न कथमहं निर्दुःखादिरूप इति कृत्वानुभवार्थ इति प्रश्नविषयं विविच्य प्रतिवक्ति इहैवेति १४ अन्ततस्तावन्न स्वभावेन प्रमाणेनापूर्वार्थवा

सकामः सक्रियोऽसिद्ध इति मेऽनुभवः कथं अतो मे विपरीतस्य तत्त्वान्वक्तुमर्हति १३ इहैव घटते
प्रश्नो न मुक्तत्वानुभूतये प्रमाणेन विरोधी यः सोऽर्थः प्रश्नमर्हति १४ अहं निर्मुक्त इत्येव सदसीत्यन्य
मानजः प्रत्यक्षाभासजन्यत्वाद्दुःखित्वं प्रश्नमर्हति १५ एषमाकांक्षितं वा च्येहदुःखाभावमभीप्सिते १६

चितेन तद्विरोधीयः प्रमाणाभासगृहीतोऽर्थः स प्रश्नमर्हतीत्युक्तं प्रपंचयति अहं निर्मुक्त इति सदसीति यदन्यन्मानं तज्जत्वं इत्यर्थ १५ इ
त्यंशीभ्याकांक्षावशेनापि कार्यकल्पनं न घटते इत्याह एषमिति कांक्षितं दाकांक्षितं तदा हृदुःखाभावमभीप्सितमिति दुःखस्याभावो
यस्मिंस्तत् दुःखाभावं ब्रह्मरूपं मोक्षलक्षणमित्यर्थः १६

प्रश्नस्वरूपस्योपन्यस्ततदनुरूपत्वं प्रतिवचनस्य निगमयति कथं हीति १७ ननु पक्षमेवोच्यते प्रसंख्यानद्वारेण तद्व्यतिरेकेण श्रुतेर्दुःखापनय
१६० न सामर्थ्याभावादित्याशंक्य प्रमाणस्य प्रमेयावबोधनमेव कार्यं न कार्यान्तरमस्तीति परिहरति श्रुतेरिति श्रुतेः स्वतः सिद्धप्रामाण्ये सति स्वात्म
नि स्वप्रमेये नाशंका विद्यते स्वप्रमेयात्मासामर्थ्याभावाशंका न विद्यत इत्यर्थः किं ततः सिद्धं तदाह तस्मादिति मुक्तत्वप्रत्ययं प्रतिकारणत्वं या

कथं हीदं निवर्तेत दुःखं सर्वात्मनामम इति प्रश्नानुरूपं यद्वाच्यं दुःखनिवर्तकं १७ श्रुतेः स्वात्मनि नाशं
का प्रामाण्ये सति विद्यते तस्मादात्मविमुक्तत्वप्रत्ययं प्रति तद्वचः वक्तव्यं तन्न यथार्थं स्यात्क्रियते सति केन
चित् १८ इतो न्योनुभवः कश्चिदात्मनो नोपपद्यते अविज्ञातं विजानन्तो विज्ञातारमिति श्रुतेः १९

तीत्यर्थः विशेषपरिहारस्य कृतत्वादिति भावः १८ वाक्यस्योक्तार्थानुभवहेतुतां विहाय गत्यन्तरं नास्त्यनुभवमार्गगतमित्याह इ राम
तो न्य इति प्रकारान्तरकल्पनायात्रानुपपन्ना श्रुतिविरोधादित्याह अविज्ञातमिति १९ १६०

यदुक्तं पूर्वपक्षिणा प्राक् चर्यानो शास्त्रसंवेद्यास्यादनिष्टं तथा सतीति तदन्यथैवोपपन्ने त्वं प्रसंख्यानकल्पक्रमित्याह त्वंपदार्थेति शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुतेरुपरतिशब्दनिर्दिष्टस्य संन्यासस्यात्मज्ञानं प्रति साधनत्वावगमात्तस्य शास्त्रसंवेद्यत्वापरित्यागप्रसंग इत्यर्थः तथा च वाक्यार्थज्ञानस्य पदार्थज्ञानपूर्वकत्वात्पदार्थावधारणपर्यंतमेवाश्रमधर्माणां विधितो ऽनुष्ठानं

त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां साधनत्वं व्रजत्येवं शांतोदांतानुशासनात् २०

ततः परं तु वाक्यादवगतब्रह्मात्मतत्त्वस्य मयेदमस्यैव कर्तव्यमिति नियोज्यत्वविषयप्रयोजनबुद्धेरनुत्पन्नेश्च न तस्य क्वापि विधितः प्रवृत्तिः किं तु साधकावस्थायामभ्यस्तस्य निवृत्तिरूपस्याश्रमधर्मस्य ज्ञानादिति विधिनः संस्कारमात्रेण प्रवृत्तिर्भवतीति तस्य जनपथेष्वचेष्टाप्यवकाशं लभत इति सर्वमवदातमेवास्मन्मत इति भावः २०

१६२ एतदेवप्रपंचयिष्यन्वाक्यार्थोदयप्रकारं श्रोतृंश्चप्रत्याययति त्वमर्थमिति शान्त्यादिसाधनसंपन्नोभूत्वात्मन्येवात्माभासव्याप्तस्वकार्यकरणसं
घातएवनबहिरात्मानंप्रत्यक्तयैतपितारंनेपश्येदितिश्रुत्यर्थः प्रथमार्द्धेनोक्तः सर्वमेनंपश्यतीतिश्रुत्यर्थमुत्तरार्द्धेनाहततइति एवंशा
श्रितःप्रत्यगात्मनःसर्वंब्रह्मपश्यतीतिश्रुत्यर्थोदर्शितइतिद्योतयतिवाक्यार्थमिति २१ एवंविज्ञातवाक्यार्थस्यविधिप्रयोगोचरतानैवसंभवतीत्या
ह सर्वमात्मेति २२ वाक्यार्थविज्ञानात्प्रागेवविधयोवकाशंलभंतेनोर्ध्वमित्युपसंहरतितस्मादिति ऊर्द्धं विध्यसंभवेहेतुमाहनहीति २३

त्वमर्थंप्रत्यगात्मानंपश्येदात्मानमात्मनि वाक्यार्थंतत आत्मानंसर्वंपश्यतिकेवलं २१ सर्वमात्मेतिवाक्यार्थवि
ज्ञानेऽस्यप्रमाणतः असत्वेह्यमानस्यविधिस्तंयोजयेत्कथं २२ तस्माद्वाक्यार्थविज्ञानान्नोर्द्धंकर्मविधिर्भवेत् न
हिब्रह्मास्मिकर्त्तेतिविरुद्धंभवतोधियो २३ ब्रह्मास्मीतिचविद्येयंनैवंकर्त्रेतिबाध्यते सकामोबहुरत्येवंप्रमाणाभा
सजातया २४ शास्त्राद्ब्रह्मास्मिनान्योहमितिबुद्धिर्भवेद्दृढा यदाऽप्युक्तातदैवंधी र्यथादेहात्मधीरिति २५

नन्वेकत्वज्ञानेनभेदज्ञानमेवकिमितिबाध्यतेविपरीतमेवकिंनस्यादित्यतआहब्रह्मास्मीतिचेति प्रमाणाभासजन्यतांप्रमाणाभा सम
सजातत्येतिविग्रह २४ स्वभावप्रवृत्तयाबुद्धेःप्रमाणजन्ययाबाध्यत्वंदृष्टंतेनोपपादयतिशास्त्रादिति दृढायदाभवेत्तदैवंधीः
कर्ताहमित्येवंधीरप्युक्तेत्यन्वयः यथादेहात्मधीर्मनुष्योहमित्यादिरूपाशास्त्राद्धिदितात्मतत्त्वस्यनभवतितद्वदित्यर्थः २५ १६१

विदितात्मतत्वस्य कर्त्रीकाभीत्यादिधीरनवकाशेत्युक्तेर्थे दृष्टांतांतरमाह सभयादिति लोकप्रसिद्धार्थोतुवादीष्णोकास्यद्यार्थः २६ यद
त्तेनियोगाभावेत्तान्निनोपपद्येष्टचेष्टाघाप्तिरितितत्राह यथेष्टेति आदिशब्दात्तु वर्णादिविधिर्गृह्यते पदार्थयोगसंमेनात्तत्त्वानं पदार्थस्वरूपा
लोचनंतेनबुद्धस्यदेहाद्यभिमानशून्यस्येतिभावनत्यदार्थोत्तानाहुद्धस्यप्रतिबुद्धस्येतिवा वाक्यार्थोत्तुभवमर्थयमानस्यतत्त्वैवलग्नचित्तस्य

सभयादभयंप्राप्नुस्तदर्थंयततेचयः सपुनःसभयंगंतुंस्वतंत्रश्चेन्नहीयते २६ यथेष्टचरणप्राप्तिः
संन्यासादिविधौकुतः पदार्थज्ञानवृद्धस्यवाक्यार्थानुभवार्थिनः २७ अतःसर्वमिदंसिद्धंप्रक्रियागस्मा
री प्रीतिं २८ योहियस्माद्विरक्तःस्यान्नासौतस्मैप्रवर्त्तते लोकत्रयाद्विरक्तत्वान्मुमुक्षुःकिमितीहते २९

कुतोयथेष्टाचरणप्राप्तिर्निमित्ताभावादवसराभावाच्चेत्यर्थः प्रबुद्धवाक्यार्थस्य तु मिथ्याज्ञानलेशस्याप्यभावात्तन्मूलाययेष्टचेष्टानो
न्मिषतीतिभावः २७ प्रकरणार्थमुपसंहरति अतःसर्वमिदमिति २८ मुमुक्षोरपिनास्तियथेष्टचेष्टाकुतःसामुक्तस्यस्यादितिकै
मुतिकन्यायमाह योहीति २९

१६२ विदुषो नियोगपारतंत्र्याभावेपि मिष्टान्नादिप्रवृत्तिवद्विषयांतरेपि प्रवृत्तिः कदाचित्स्यादिति चेत्तत्राह क्षुधयेति विषपानेऽदुःखसाधनता
वधारणात्पूर्वकं प्रागेव विषवत्स्रक्चंदनवनितादिषु अनर्थमूलत्वस्य संभवति मिष्टान्नादेस्तु तान निषिद्धविरोधाभावाच्छरीरस्थितिमात्रहेतुतया

क्षुधया पीड्यमानोपि न विषं ह्यत्तुमिच्छति मिष्टान्नध्वस्ततृड् ज्ञानन्नामूढस्तज्जिघत्सति ३०
वेदांतवाक्यपुष्पेभ्यो ज्ञानामृतमधूत्तमं उज्जहारालिवद्यो नस्तस्मै सद्गुरवे नमः ३१
इति तत्त्वमसिप्रकरणं

(भाव) वश्यकत्वेप्यपूर्वोपचयहेतुत्वाभावात्संस्कारवशाद्यवृत्तिरिति न दोष इति द्रष्टव्यं ३० उत्पन्नतत्त्वज्ञानस्यापद्यपि किमपि कर्तव्यं ना राम
स्तीत्याह तथापि गुरुशास्त्रमाननीयत्वेनेति शिष्याच्छिष्यत्रिवगुरुप्रणामं निबध्नाति वेदांतवाक्येतिनोस्मदर्थं [illegible]र्थः ३१ इति १६२
तत्त्वमसिप्रकरणं मष्टादशं विवृतं १८

परमात्माभेदेन स्वस्याप्यचित्वाभाव उक्तस्तमेवाभेदमुपपादयति षडूर्मिमालेति अशनायापिपासाशोकौमोहो जरामृत्युरितिप्राणमनोदेहधर्मा षडूर्मयइवाविर्भावतिरोभावरूपास्तेषां माला अविच्छिन्नाः परंपरातामत्यतीत्य सर्वात्मनातद्वर्जितो इति प्रपंच इति यावत्तस्य एवंविधः स एव जगतः सर्वस्यात्मा चकारान्नवचाहमेवात्मा श्रुतेः यस्मात्तादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः इत्यादौ श्रवणादित्यर्थः अहमात्मा गुडाकेश सर्वभूताशयस्थितः इत्यादिस्मृतिप्रमाणात्तोपि चकारात्सर्वकारणोपाधिद्वयपरामर्शमंतरेण स्वतो भेदानिरूपणादित्यादिन्यायाद्विद्वदनुभवाद्वमयाप्रवेध्यते सम्यक्

षडूर्मिमालाव्यतिवृत्त एव यः स एव चात्मा नगतस्वतः श्रुतेः प्रमाणात्स्वापि मयाप्रवेधिते सुधैव तस्मात्त्व मनस्त्वहितं ४ त्वयि प्रशांते नहि चास्ति भेदधीर्यतो जगन्मोहमुपैति मायया ग्रहो हि मायाप्रभवस्य कारणं ग्रहाद्विमोके न हि सास्ति कस्यचित् ५

ज्ञायते सुधैवेति सुगमं ४ प्रत्यगात्मनः परमात्माभेदं प्रमाणादिकमुक्त्वा भेदप्रतिभासस्य मनः कल्पितत्वेनाभासतामुपपादयति त्वयीति पतो भेदधियो जगत्यातिज्ञानं मोहमाकुलीभावमहंताधृताभिमानलक्षणाया मायया याउपैति नित्यसंबंधस्तेसा भेदधीस्त्वयि मनसि प्रशांते न चास्ति सुषुप्तौ तदभावेन तदभावदर्शनादित्यर्थः अन्वयव्यतिरेकाभ्यां भेदग्रहस्यानर्थहेतुतामुपपादयति ग्रहो हीति सुषुप्तादौ भेदग्रहाभावे मायामोहयोरदर्शनादित्यर्थः ५

इत्युक्तमनन्वेषितेहर्षेत्याह नमेस्तीति अस्तित्वेवंधरहितः प्रबुद्धतत्त्वस्वभावमसितत्वमविक्रियत्वं चस्तुत्वादयतिनपूर्वेति पूर्वतत्त्वंपूर्वावस्था पूर्वेति
त्वाहुत्तरभेदताउत्तरकालेतत्त्वभेदतानोस्माकंनास्तितत्त्वप्रबोधात्पूर्वोत्तरकालयोर्न्नमेविशेषोस्तीत्यर्थः हियस्मादेवंतस्मात्त्वत्कृतातिशयाभावा
१६४ दित्यर्थः ६ सर्वदृश्यातिवर्तित्वाच्चात्मनआगंतुकातिशयायोगं साधयतियतश्चेति अन्यथाअनित्यतानचकुतोऽनित्यताप्राप्तिर्यानिषिध्य

नमेस्तिमोहस्तवचेष्टितेनहिप्रबुद्धतत्त्वस्वसितोह्यविक्रियः नपूर्वतत्त्वोत्तरभेदताहिनोवृथैवतस्माच्चमनस्तवेहितं ६
यतश्चनित्योहमतोनचान्यथाविकारयोगेहिभवेदनित्यता सदाप्रभातोऽहमतोहिचाद्वयोविकल्पितंचाप्यसदित्यवस्थि
ते ७

तेनत्वाहविकारेति परिस्पंदपरिणामादिरूपविक्रियाभावेपिप्रकाशाप्रकाशसंसर्गरूपविक्रियास्यादित्याशंक्याहसदेति सकृद्विभातोह्ये
वैषब्रह्मलोकः पश्यन्नेवैतन्नपश्यतीत्यादिश्रुतेरित्यर्थः सतिदृश्यभेदेकथमद्वयत्वमतआहविकल्पितमिति रज्जुसर्पादिवदागंतुकत्वा राम
दसदित्यवस्थितंनिश्चितमित्यर्थः ७ १६४

ज्ञा

मनसैवसद्वितीयत्वमात्मनइत्याशंक्याहाभावरूपमिति यद्वा भेदकल्पकस्यमनसोऽभावादपिसदाऽद्वयत्वमात्मनइत्याहाभावरूपमिति युक्तितो
निरीक्ष्यमाणेतवास्तितान्हीत्युक्तो युक्तिमाहसतोहीति तथाचाहभगवान्नासतोविद्यतेभावोनाभावोविद्यतेसतइतिद्वयंजन्मविनाशाख्येते
तत्रसतस्तवनास्तिनेष्यतेपरमार्थसत्त्वंनेष्यतइत्यर्थः ॥ वीर्भावेहेतुःकल्पमितिन्यायेनाद्वैतत्वमात्मनोविशदयतिद्रष्टाचेति तवकल्पित
सर्वंकृतः किंचागंतुकस्याविज्ञातसत्त्वादप्यात्माऽद्वयइत्याहदृशेश्चेति जडस्यस्वतःस्फुरणाभावादस्फुरतश्चसत्त्वेप्रमाणाभावादित्यर्थः

अभावरूपंत्वमसीहहेमनोनिरीक्ष्यमाणेनहियुक्तितोऽस्तिता सतोहिनाशादसतोऽप्यजन्म
तोद्वयंचतेनैवतवास्तिनेष्यते ॥ द्रष्टाचदृश्यंचनतथाचदर्शनंभ्रमस्तुसर्वस्तवकल्पितोहि
सः दृशेश्चभिन्नंनहिदृश्यमीक्ष्यतेस्वप्नप्रबोधेनतथानभिद्यते ॥

तथासतिस्वप्नात्माप्रबोधेनजाग्रदादिनानभिद्यतेयथास्वापावस्थायामद्वितीयएवतथावस्थांतरेपीत्यर्थः स्वापेचाद्वितीयत्वंसलिलए
कोद्रष्टाऽद्वैतोभवतिअथास्मिन्प्राणएवैकधाभवतितदेनंवाक्सर्वैर्नामभिःसहाप्येतीत्यादिश्रुतिसिद्धं ॥

तत

एवंविकल्पाभावेपिविकल्पनासत्यास्तीतिपुनरद्वैतानुपपत्तिरित्याशंक्याह विकल्पनाचापीति तथा द्रष्टव्यवदेवविकल्पनापिनभिद्यतइतिसर्वंप्रो
क्तमतानुकर्षणार्थोवाशब्दः किंत्ववस्तुयोगादवस्तुविषयकतयातन्निरूप्यत्वादद्वयाऽधिष्ठानातिरिक्तस्वरूपरहिताभवेत्नत्वलोकेऽलातचक्रव
१६५ लघु त्भ्रमदुल्मुकस्यचक्राकारत्ववदितियोजना यथाभ्रमतोऽलातस्यचक्राकारता नपृथग्वस्तुतथाविकल्पनापिचिदात्मातिरेकेणपृथग्वस्तुस
तीनभवतीत्यर्थः तथापिनात्मनोऽद्वयत्वंदृष्टिश्रुतिमत्यादिशान्तिरूपस्यस्वगतभेदस्यसत्त्वात्तथाप्रतिशरीरमात्मभेदप्रथनात्सजातीयभेदोपप

विकल्पनावापितथाऽद्वयाभवेदवस्तुयोगात्तदलातचक्रवत् नश
क्तिभेदोस्तियतोनचात्मनांततोऽद्वयत्वंश्रुतितोऽवसीयते १०

त्तेरित्याशंक्यश्रुतिविरोधान्मैवमित्याह नशक्तिभेदइति तथाचश्रुतिः त्रै कृत्स्नोहिसः प्राणन्नेवप्राणोनामभवतिवदन्वाक्पश्यंश्चक्षुःशृ
ण्वन्श्रोत्रंमन्वानोमनस्तान्यस्यैतानिकर्मनामान्येवेतिचिदात्मनोदृष्ट्यादिभेदस्यौपाधिकतांदर्शयति तथाएकोदेवोबहुधानिविष्ट
ः एकंसन्तंबहुधाकल्पयन्ति एकस्तथासर्वभूतान्तरात्मेत्यादिश्रुतिरात्मनः सर्वत्रैकत्वमाहतथाभेदनिषेधश्रुतिस्तुतयोपन्यस्तोदाहार्या राम
ः १० १६५

ननु यदुपलभ्यते तदस्तीत्यभ्युपगम्यते यन्नोपलभ्यते तन्नास्तीति निरूप्यते चेदेतन्मिथ्यार्थकं दर्शनादर्शने न खलु सत्त्वासत्त्वयोः कारणे किं त्व-
न्य एव तन्निश्चयहेतुरित्यभिप्रेत्याह। असद्रूपमिति। इमनस्तेन तद्गोचरीभूतं यद्यदीदृशनेन नेदृश्यत्वेन दृष्टमप्यसत्त्वमेव दृष्टनष्टस्वरूपत्वा-
त् यथा न दृष्टं न दृश्यते न दृश्येत एवमेतावस्तुनो नास्तिता न च नाहि नीरूपस्य वा योऽस्वरूपस्याऽनुपलंभोऽपि नास्तिता भवति। किं तर्हि सतोऽपि वस्तु-
नो स्फुरत्सामर्थ्याद्दर्शनादर्शनयोरुपलब्ध्याद्यदर्शनसंभवादित्यर्थः। नन्वदृष्टमपि नास्तीति शशशृङ्गादिप्रसिद्धेस्तत्पतथापि लब्धरूपस्य
विकिंचित्त्वाद्गोचवनिषिध्यते विधानमन्तरेण तेन निषेधस्य संभवादित्याह येन दृष्टेन मस्तिनास्तीति विप्रतिपत्त्याल्लयेन किमद्याख्येयमेवा-

असर्वदृग्यतोऽपि हि यद्यदीक्ष्यते न दृष्टमित्येव न चैव नास्तिता यतः।
प्रकृतासदसद्विकल्पनाद्विचारवद्वापि न याऽद्वयं च सत् १४

न्यथाविकल्पप्रसरायोगादित्यभिप्रेत्याह यतः प्रकृतासदसद्विकल्पनेति यतो यस्मिन्नधिष्ठाने प्रतीयमाना विकल्पना तद्दृश्यकल्पित-
रूपमित्यर्थः। विकल्पालंबनत्वेनाधिष्ठानसत्तामुल्लंघ्यऽवधित्वेनापि न तत्सत्त्वमपह्नु। विचारवद्वेति। वाशब्दश्चार्थे। यथा विचारो निराधिम-
न्तरेण न पर्यवस्यति तथाऽसदद्वयं विना न विकल्पः प्रशाम्यति। अतः सर्पधारादंडमालादिविकल्पेष्वनुगम्यमानतयाऽधिष्ठानत्वेन पुनः स-
र्वविकल्पनिषेधावसानतयाऽवधित्वेनानुवर्तमाना विकल्पितानां रज्जुस्वरूपवदव्याकृतादिविकल्पाधिष्ठानसन्मात्रत्वे-
न तन्निषेधावधित्वेन वा विकल्पितमनपोह्यं चात्मतत्त्वमद्वयमस्तीति वोपलभ्यमिति तात्पर्यार्थः १४ ए।

किंचोक्तविधयादर्शनादर्शनमात्रात्तत्वासत्वनिश्चयासंभवाद्विचारोऽभ्युपेयस्तस्मिंश्च क्रियमाणे सदेवाद्वयमवशिष्यतइत्यभिप्रेत्याह सदभ्युपेतमि
ति सद्वस्तु नास्तीति वदता तन्निर्णयाय विचारोऽभ्युपगम्यते न वा यदि सोऽभ्युपगम्यते तदा भवता सद्वस्त्वभ्युपेतं यतो विचारहेतोर्विचारसिद्ध्यर्थमुप
१६० कल्पितमुपस्थापितं किमपि वस्तु सर्वैर्विचारकैरिति योजना विचारो हि प्रमाणव्यापारस्य फलावसानत्वनिश्चयहेतुस्तर्कः स च न प्रमेय
मंतरेणाप्रसरमुपलभते प्रमितं च न बाध्यते इति सद्वस्तुसिद्धिरित्यर्थः विपक्षे बाधकमाह यदीति यदि तस्य वस्तुनो नास्तिता तदा प्रमाणाप्रमे
यप्रमाननिरूपणस्य विचारस्य हानादप्रवृत्तेः चकारात्सदभावनिर्णयहानाच्च तथैव संस्थितमनिर्णीतमेव संस्थितं तन्न थावत् वस्तुतत्वानवधार २
णादैहिकामुष्मिकार्थप्रवृत्तिहानिः स्यादिति भावः एतेन विचारानभ्युपगमपक्षे च दोष उक्तो वेदितव्यः अथाविचारितमनिर्णीतं च न तत्किम
पि नेष्टं चेत्तर्हि विचारनिर्णययोः सदवसानमंतरेणपर्यवसानाभावान्नितरां सदिष्यते सद्वस्त्विष्यत एवेत्यर्थः यद्वा हे मनो भवतोपकल्पितं हेतु
ना ते विचारहेतोर्विचारसिद्ध्यर्थं सदभ्युपेतमात्मतत्वनिश्चयफलविचारप्रवृत्तयेऽस्तीति हेतुमंगीकृतमित्यर्थः यदि पुनस्तस्य नास्तिता शून्यत्वेन वद्वै

सदभ्युपेतं भवतोपकल्पितं विचारहेतोर्यदि तस्य नास्तिता। विचारहानाद्वतथैव संस्थितं न चेत्तदिष्टं नितरां सदिष्यते १९

तस्य स्यात्तदा विचारहानाद्विचाराप्रवृत्तेश्चकारात्परमार्थनिर्णयाभावाच्च तथैवाविचारितमनिर्णीतं च तत्वं संस्थितं स्यात् अथ तत्वानिर्णये पुरु
षार्थासिद्धेस्तदनिर्णीतत्वभावमिष्टं न चेत्स्यात्तर्हि नितरां सदिष्यते विचार्य निर्णये सति सर्वस्य सदवसानत्वाव्यभिचारादित्यर्थः कोऽयं तर्कस्तु
णां विनानसंशयावतारस्तेन विना न विचारप्रवृत्तिस्तामंतेन वस्तुतत्वनिर्णयस्तेन च विनान पुरुषार्थलाभ इति विचारार्थं तमाव्यथाप्रतिपन्नं द्वैतम राम
भ्युपगतं न प्रामाणिकत्वेन तथा च भुजंगरज्जुत्वेन व्यवहारत इवानत्वतत्वबुध्या व्यवहरतोऽनर्थप्राप्तिसंभवात्तत्परिहाराय विचारोऽवश्यंभावि १६०
मि क्रियमाणे सर्वेषु विशेषेषु स्थितायाश्च व्यभिचाराद्विशेषाणां व्यभिचारान्मिथो व्यभिचारितांचान्तरत्वान्समात्रमेव सत्यं न द्वैतरूपो विशेषाक्रा

इति नितरां सदिष्टमिति भावः

ननु सर्वविकल्पहेतुत्वाद्द्वयस्य सर्वविकल्पपूरूक्ष्यमित्याशंक्याह विकल्पनाम्नापीति। विधर्मकं विहत्वस्वभावमित्यर्थः। निष्कलेति क्रियमि
त्यादिष्कलेनेः विकल्पनः पुराप्रसिद्धेरिति पुरेश्रेष्ठाप्यर्थः। अद्वयमिति छेदः। नेदं यदिदमुपासते नेति नेति नेति च निषिध्यमानचेतनाचेतनवि
कल्पावसानसिद्धये आपि निषेधवाक्येष्वपि विकल्पविधर्मकमद्वयं निर्विशेषं सिद्धमिसाहन चेनीति। पश्चा विकल्पितं नेति नेति नेति निषि
ध्यते न च तथा अद्वयमात्मतत्वं निषिध्यत इति योजना १८ यथोक्तेऽप्यर्थेपि विकल्पयतीति अनर्थप्राप्नुवंती न्याह केति। ल्पितद्वृति ॥ कूट

विकल्पनाम्नापि विधर्म्मकं कृतेः पुरा प्रसिद्धस्य विकल्पतोऽद्वये ॥ न चेति नेतीति तथा विकल्पितं न निषिध्यते वाप्य
वशेषसिद्धये १८ अकल्पितं यद्वमजोऽद्वयेऽस्मिन् विकल्पयंतः सदसद्वैजन्मभिः ॥ स्वचित्रमायाप्रभवं च तेभवं जरां च मृत्यु
च नियांति संततं १९

कर्ता

स्थूलेपि च विकारसंसर्गस्पर्शेऽस्पृष्टमिति सिद्धमुनियावत्सदसद्वृत्तिना लिंचकारात्कर्तासि विशेषो निर्विशेषत्वपादिप्रकारैः स्वचित्रमायाप्रभ
वं यथा स्यात्तथा विकल्पयंतो वेते जन्म मिलियंश्चानुषजाति मिर्भवमुद्भवं जरां मृत्युं मरणं च संततं निरंतरं नियांति नितरां गच्छंतीति यो
जना। स्वचित्रमायाप्रभवमिति भवविशेषणं वा बुद्धिस्थमकल्पितमित्यर्थः १९

रां

स्यनुभयस्वभावं

१६९ सद्वस्तुनः कूटस्थत्वाद्द्वयत्वं कृत्यादि प्रमाणासिद्धं तदन्यथा विकल्पने पुरुषापराधनिबंधनमित्युक्तमिदानीं तदेव युक्तितोपदर्शयितुमुपक्रम
ते भवाभवत्वमिति । तस्यार्थः । किंचेत्यर्थे । हि तदुत्पद्यमानस्वभावमनुत्पद्यमानस्वभावमुभयस्वभावं वा नाद्यः सदा सापेक्षत्वेन युक्तिरञ्जनादि
वन्मिथ्यात्वापातात् न द्वितीयः सदा नत्वापत्तेस्तदभावव्यवहारानुदयप्रसंगात् न तृतीयः एकस्य विरुद्धोभयस्वभावत्वायोगादित्यभिप्रेत्य चतुर्थमनूद्य
दूषयति भवाभवत्वमिति भवश्चाभवश्च भवाभवौ तयोर्भावः भवाभवत्वं अस्य हि तस्य भवाभवत्वं चेद्विरोधान्नेष्यते तदावस्थितिरवस्थानं सत्वं न च
स्यादिति शेषः नह्युभयस्वभावविलक्षणं किंचित्सदुपलब्धुमस्तीत्यर्थः च अपरं यदि हि तस्य जन्मेष्यते तदा स्वत एव जन्मासंभवादन्यस्मान्न हि तु
न्तदपि सत्स्वभावमसत्स्वभावं वा यतो हि तस्य जन्मेत्याकांक्षायां सर्वथापि नोपपद्यत इत्याह अन्यस्थितिजन्मनान्यथेति अन्यस्मिन् ह्यस्थितो सति न जन्म

भवाभवत्वे तु न चेदवस्थितिर्न चास्य चान्यस्थितिजन्मनान्यथा सतो ह्यसत्वादसतश्च सत्वतो न च क्रियाकारकमित्यतोऽप्यजं २०

सतो न जन्मेत्यर्थः अन्यथाऽन्यस्थितौ जन्मनेत्तु परज्यते असतोऽपि न जन्मेत्यर्थः पक्षद्वयेऽपि दूषणमाह सत इति सत उपादानत्वे विकारित्वापत्ते
विनाशादसत्वप्रसंगादसतश्चोपादानत्वे सत्वतः सत्वापत्तेः नहि शून्यमुपादानं स्यान्न स्यकार्ये घन अनुगमादित्यर्थः तथा च वस्तुनः स्वभाववैपरीत्या
योगान्न सत्कार्यं हि तात्मना जायते नाप्यसदित्युत्पत्तिपक्षोऽपि दुर्निरूप इति भावः एवमुत्पाद्योत्पादकयोः स्वभावनिरूपणे समुत्पत्तितत्कारकवि
शेषयोः सुतरामनिरूपणीयाकारता सिद्धेत्याह न च क्रियाकारकमिति उपसंहरत्यतोऽप्यजमिति उक्तयुक्तितोऽप्यजं निर्विशेषमद्वयमात्मतत्त्व राम
मित्यर्थः ॥ ॥ १६९

नचक्रियाकारकमित्युक्तमेवस्फुटमुपपन्नतत्त्वंवस्तुनःसाधयन्नकुर्वदिति अस्यहितत्त्वमनःकारकमकुर्वदपिनिर्व्यापारंकारकमिष्टंचेदित्यर्थः अन्यदि
तिद्वितीयपादस्यार्थंपदमादायपदिवाऽन्यत्कुर्वदपिष्टंचेत्यर्थः तत्राद्येऽतिप्रसंगदोषमाहनकिंचित्तुनास्तीतिनतुनिष्पन्नंकिंचिदपिकारकंनास्तीतिनअपि
तुसर्वंसर्वस्यसर्वदाकारकंस्यादित्यर्थः द्वितीयेकारकत्वानुपपत्तिदोषमाहाकारकमिति अक्रियस्याकुर्वत्त्वायोगात्क्रियावत्त्वेनित्यस्यसदाकार्यप्रसंगादनि
त्यत्वेचक्रियावदन्तरापेक्षायामनवस्थाप्रसंगात्तदनपेक्षायामात्माप्रत्यायनेः कुर्वत्त्वपक्षेकारकत्वासिद्धिरित्यर्थः अथवाप्रथमेविकल्पेनकिंचिदका
रकमितितिनिराकरणपदान्वयः सर्वमेवकारकंस्यादित्यर्थः द्वितीयपक्षनतुनास्तीतिकुर्वतःकारकत्वानिरूपणादित्यर्थः कथमनिरूपणमितिचेत्त
नवकृत्यंकिंसदवस्थंकुर्वदसदवस्थंवानोभयथापीत्याहसतोऽविशेषादसतेष्वेति असतश्चाविशेषादितिसंबध्यतेविशेषवत्त्वेचेहरूपापत्तेरविशे

अकुर्वदपिचेदपिचास्यकारकंनकिंचिदन्यत्तुनास्त्यकारकं सतोविशेषादसतश्चसत्युनौतुल्यानयोर्यद्वदनिष्पन्नत्वात्रहि २५

षेचसदाकार्यस्यान्नवास्यादित्यर्थः अथसतोऽसतोवापूर्वसत्वासत्त्वप्रच्युत्यवस्थायांकार्यस्यादितिमन्येत्कारकत्वमितिमतंतत्रावस्थाप्रच्युतिका
र्ययोर्योगपद्यमभिमतंक्रमोवानाद्यइत्याहसत्युत्ताविति उपलक्षणमसंच्युतौचतुल्यात्र्याद्यतयोःकोघोर्यद्वत्रमनोन्नमनमनुभवतीःकार्यकरणा
भावेननिष्पन्नयनेतथाकार्यकारणस्वरूपभेदोनहिनिष्पन्नयनइत्यर्थः द्वितीयेऽनवस्थाप्रसंगोऽवस्थाप्रच्युतेरपिकार्यतयातस्याअपितथा
विधपूर्वकत्वापेक्षणादितिद्रष्टव्यं २६

वस्तुनोऽवस्थांतरापत्तिमभ्युपगम्यैतदवोचाम वस्तुनस्तु सतो सतो वाऽवस्थांतरं नोपपद्यत इति न कस्यापि कार्यत्वं कारणत्वं वा विद्यत इत्याहन
१७० चेदिति एवमुक्तदोषापरिहारात्सदसद्विपर्ययश्चेन्नेष्टस्तदा सदसतोः स्वरूपव्यवस्थितौ भवः कथं स्यान्न कुतो यत एतदुपपन्नमपि सत्वासत्वविभक्तं
परस्परसंसर्गशून्यं व्यवस्थितं न पूर्वापरीभावोऽनयोर्विरोधो वा न्यायेनेच्छया वेत्यर्थः हेमनो हि यस्मादेवं तस्मान्न कस्यचिदपि जन्म विद्यत इत्यवधा
र्येत्यर्थः २२ भवतु वा जन्म यस्य कस्यापि तथापि न मे ब्रह्मभूतस्य काचिद्हानिर्वृद्धिर्वेत्याह तथाभ्युपेत्यापीति। मनसश्चाविद्येना

नचेत्सद्रूपः सदसद्विपर्ययः कथं भवः स्यात्सदसद्व्यवस्थितौ विभक्तमेतद्द्वयमप्यवस्थितं न जन्म तस्माद्भ्रमतो हि कस्यचित् २२ अ
भ्युपेत्यापि भवं तथैव छुतो ब्रवीमि नार्थः स्वबोधस्थितेन मे न हानकृच्छ्वलपनः स्वतोऽसतो न वोत्पत्तेर्वा यदि वा स्थितानयोः २३

त्मनोनाथस्थितो नोत्प्रपंचपातिन हानकृत्ये इति न स्वरूपेण कृत इत्युत्पत्त्याहत्यज्य कृति। यतो यस्मात्स्वतः आत्मन्यविद्यमानस्य हानस्य कृत्रै
वभिवद्भवः स्वतोऽन्यतो वा हित्वेन हानं संभवतीति योजना यो वियाततो वार्हणे नित्योपर्यायान्न परिनिष्ठितान्यथापितद्भवो वक्ष्ति तेन मे नार्थ इति सं
बंधः स्थितोर्थ त्वद्बोधयायाः किंचित्करत्वादित्यर्थः २२

हीयमानोपचीयमानयोरात्मनि संबंधानिरूपणाद्वन न हानं न ह्रीलइत्याह क्ववा इति। क्ववाः स्थिराः कूटस्था अनित्याः क्षणिकाश्च पदार्था हि निःस्पृहत्वेनमन्ययोगिनो न भवंति स्थिराणाम् अविकारित्वात् क्षणिकानामन्यसंबंधकालपर्यंतमवस्थानासंभवादित्यर्थः। मिथश्चान्योन्य मपि स्थिराः स्थिरयोरन्ये संबंधितासंभवति स च बध्यसंबंधिसं कल्पासंबंधत्वविकल्पासहत्वादित्यर्थः। अत एव तेषु न कार्यं किमपि कुर्व

क्ववाद्यनित्याश्चमयानपयोगिनो मिथश्च कार्यं न च तेषु कुर्वते
अतो न कस्यापि हि किंचिदिष्यते स्वयंवतत्वेन निरुक्तिगोचरः १८

नेयन्ते विकारभेदसत्त्वनिराकरणमुपसंहरन्यत इतीनकीमपि कस्यापि संबंधिपरमात्मार्थं न इत्यत इत्यर्थः। ननु कथमात्मनोऽन्यसंबंधाभावो वेदवाक्यप्रमाणप्रतिप्रमेयत्वावगमादित्यत आह स्वयंवेति। तत्त्वमात्मस्वरूपस्वयं निरूपाधिकेन निरुक्तेर्वाक्यस्य मुख्यपादत्यागोचरो विषयः शाहप्रवृत्तिनिमित्तधर्माभावात् किंतु लक्षणया शब्दस्य तत्र पर्यवसानमये -रूत्वे दान्तप्रमेयत्वं तस्यांगीकृतमिति न विरोध इत्यर्थः॥१८

तदेवं तुर्विरूपद्वैतसाक्षिणोऽसंगाऽद्वयानंदरूपस्य स्वप्रकाशतया प्रकाशमानं स्वरूपं श्रुतियुक्तिभ्यां निश्चित्य पुमान्कृतकृत्यो भवतीति द्वैताभा
सनिराकरणफलमुपसंहारव्याजेनाह समं त्विति सत्त्वासत्त्वाभ्यां विकल्पितात् तद्द्वयात् द्वैताभासात् मुक्तमिति संबंधः सततं समं विभानवत्प्र
१७१ काशमानमिति योजना दीपवत्सह सैवाशेषस्य बंधस्य निर्वाणं परिसमाप्तिमुपैति निरीक्षणनिर्वाणयोर्व्यवधानं किमप्यस्तीत्यर्थः २५
उक्तलक्षणस्यात्मतत्त्वस्य निरीक्षणं किं विषयत्वेनाविषयत्वेन वेतिजिज्ञासायाम विषयत्वेनैवेत्याहावेद्यमिति सर्वसाक्षिप्रत्यगात्मनोन्य
ते भवत्यद्वयं तद्ब्रह्मेति ये वेदिनस्तेषामनन्यवेदिनामवेद्यं अन्यथा भेदेन विषयतया वेदितॄणां कुतार्किकाणां स्ववेद्यं परिच्छिन्नतया स्वतेवंशात्प्रयुक्ति

समं तु तस्मात्सततं विभानवद्द्वयाद्विमुक्तं सदसद्विकल्पितात् निरीक्ष्य युक्त्या श्रुतितश्च बुद्धि
मानशेषनिर्वाणमुपैति दीपवत् २५ अवेद्यमेकं यदनन्यवेदिनां कुतार्किकाणां च सुवेद्यम
न्यथा निरीक्ष्य चैतत्त्वगुणाग्रहोऽगुणे न याति मोहं ग्रहदोषमुक्तितः २६

विचारप्रयासं विना स्वमत्यनुसारेण सुवेद्यमित्यर्थः गुणेषु सत्त्वादिषु सविकारेषु ग्रहोऽभिनिवेशो यस्य स गुणगुहो न गुणाग्रहोऽगु राम
णाग्रहः पुमान् देहादावभिमानहीनः [illegible]ति यावत् अगुणे निर्विशेषमात्मतत्त्वमित्युक्तमवेद्यमित्याद्युक्तरूपं निरीक्ष्यालोच्य चकारादपरोक्ष १७१
तयानुभूय मोहं न याति तत्र हेतुमाह ग्रहदोषमुक्तित इति ग्रहरूपाद्दोषान्मुक्तितो मुक्तेः मोहहेत्वज्ञानतत्कार्यबाधादित्यर्थः २६

कस्मादेवं महत्तायत्नेनाविषयतपाब्रह्मात्मनो वेदनमिष्यते तत्राह ॥ तोन्यथेति ॥ अन्नदूरूविद्यादात्मज्ञानादन्यथाऽन्यस्मादेवं तत्तदाप्रकारांतरणद्य
नग्रहनाशो मिथ्याज्ञाननिवृत्तिरिष्यते नान्यः पंथा विद्यतेऽयनायेति श्रुतेः ॥ मास्तु तर्हि ग्रहनाशाइत्यत आह विमोहेति ग्रहे सकारणे सति
विमोहबुद्धेर्देहगेहादावहंममेत्याद्यभिनिविष्टधियः सर्वानर्थबीजभूतायास्त्वनिवृत्तिः स्यादित्यनिर्मोक्षप्रसंग इत्यर्थः ननु भवतु ग्रहनाशान्मोहनाशोऽयहवा

अतोन्यथा न ग्रहनाश इष्यते विमोहबुद्धेर्ग्रह एव कारणं अहंकारणीयग्रहो
प्यहेतुस्त्वनलस्त्वनिंधनो यथा प्रशांतिं परमां तथा व्रजेत् २७

यएवकुतोब्रह्मात्मज्ञानादेवनिवृत्तिर्नज्ञानादज्ञानस्येवनिवृत्तिसंभवात् ग्रहनिवृत्तिः कारणमन्यदेष्टव्यमित्याशंक्याह यत्वाद्ग्रहस्यनचित्रत्रो ज्ञानका
स्वयमेव निवर्तते इतिसदृष्टांतमाह अहेति ॥ अहेतुर्निरुपादानः उपादाननिवृत्तौ पुनः प्ररोहहेत्वभावात्परमां निरतिशयां शांतिमुप
शांतिमोक्षलक्षणांव्रजेदित्यर्थः २७

21/13(B)

प्रकरणसमाप्तौ गुरुनमस्काररूपं मंगलमाचरति विमथ्येति यथा सुरैर्देवैर्महात्मभिर्महाब्धेः क्षीरसागरादमृतं स ९ मुद्धृतं पुरा पूर्वं तथा यैर्मह
१७२ त्मभिर्गुरुभिर्वेदरूपादुदधितो विमथ्या लोड्येदं प्रकरणरूपेणामया प्रकाशितं ज्ञानामृतं ज्ञानरूपममृतं समुद्धृतं पुरा एवं तथायैः परमात्मत

विमथ्य वेदोदधितः समुद्धृतं सुरैर्महाब्धेस्तु यथा महात्मभिः। तथामृतं ज्ञानमिदं हि यैः
पुरा नमो गुरुभ्यः परमीक्षितं च यैः। १८ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंद
भगवत्पादपूज्यशिष्यस्य श्रीशंकरभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसहस्री स
माप्ता॥ ॥

त्वं चेक्षितमपरोक्षीकृतं तेभ्यो गुरुभ्यो नम इति योजना अथवा यैर्गुरुभिर्निमित्तभूतैर्मया परं चेक्षितमिति योजना तस्मादात्मतत्त्वं चर्च्ये राम
भूतिकाम इति श्रुतेः निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनं अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिरिति भगवद्वचनाद्युक्तमत्र गुरुनमस्कार। १७२
नमिसर्पः २८

उपदेशसाहस्री

925